।त्रिग।लो का नोविनदानो
ध्यतेगतथाच भवनश्च
मार्दत्त बिक्रन्दा छितागु

भगवान स्वाम्इंदिनी

८-२२

No 86
B.9.

बृ.जा. नरी.नाथ. १।श

॥श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगणेशं च सिंहं च शार
दां गुरुपदांबुजे॥ नत्वा संक्षेपतो वच्मि बृहज्जातकटिप्पणं॥ १॥ शिष्टाचारपालनाय ग्रं
थाविघ्नसमाप्त्यर्थं चावंतिकाचार्यो वराहमिहिरो ऽर्कस्तवनो गणितस्कंधानंतरं हो
राग्रंथं चिकीर्षुरर्कोद्धा कुसिद्धिं शार्दूलविक्रीडितेनाह॥ मूर्तित्वे परिकल्पितः इति। नाना
करस्त्रैलोक्यदीपो रविः स्वस्वं वाणीं ददातु॥ अ:क:।य। शशांकत्वेन स्वमू
र्तित्वे परिकल्पितः शशांकत्वे परिकल्प्यते। यतो जलमयस्य शशिनः प्रकाशाद्यंनस्तत्र रविकिरणाः
प्रतिफलिता ज्योत्स्नां जनयंति॥ तदुक्तं॥ सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्त
मो नैशं॥ क्षपयंति दर्पणोदरनिहिता इव मंदिरस्यांतरिति॥ ॥योमोक्षमार्गिणां वर्त्मा मि
र्गेति। मोक्षगाजो रविं भित्वा गच्छंति॥ आत्मविदां योगिनां आत्मा तेजोरूपो हृदयांतस्थः
॥तथा च श्रुतिः॥ सूर्य आत्मा जगतस्तस्थुषश्चेति॥ यजतां क्रतुर्यज्ञः॥ उक्तं च॥ अग्नौ प्र
स्ताहुतिः सम्यगादित्यमुपतिष्ठत इति॥ तथा अमरा देवाः ज्योतिषां
ग्रहाप्रिसु॥ यहनक्षत्राणि तरुशोन नित्यमुदयास्तमयौ॥ तदुक्तं॥ तेज

इत्यस्यंबुगोलकाः॥ प्रभावंतो हि दृश्यंते सूर्यरश्मिदीपिता इति॥ लोकानां विनदानो
त्पत्तौ पालने च प्रभुः॥ लोऽवधारणे॥ अनेकधा यः श्रुतो श्रूयते॥ तथा च सर्वं खल्व
स्यांद्धिधा बहुधा वदंतीति॥ ४॥ अथास्य शास्त्रस्यो ऽस्य गुणवत्त्वं शार्दूलविक्रीडितेना
ह॥ ॥भूयोभिरिति॥ बहुभिः प्राज्ञैः पटुधियां चतुरबुद्धीनां होरा प्राक्तनकर्मसमीर पतिः
फलज्ञापनाय शब्दयुक्तिभिर्युक्ते शास्त्रे बहुवारं कृतेऽपि होराशास्त्रसमुद्रतरणे
उद्योगमानो अर्थे शास्त्रलेशेन ध्रुवं नावमारचये करोमि॥ स्वल्पां हांतेविविचित्रे अर्थे
न बहुलं॥ तस्मात्ते त्र्यमन्ये ऽनास्तितयामिति तात्पर्यं॥ ५॥ शास्त्रस्य प्राक्तनकर्म
व्यंजनत्वमिंद्रवज्रयाह॥ होरेति॥ अहोरात्रशब्दस्य पूर्वांत्यवर्णलोपात् अहोरात्र
विकल्पनां होरामेके इच्छंति॥ मेषादयोऽहोरात्रांतर्भूताः॥ लग्नस्य च स्थानांस्तु नेक्षांतं
ड अहोरात्रांतर्भूतं॥ तस्माद्धोरात्रांतर्भूतत्वात् लग्नस्य होरात्रविकल्पत्वं॥ प्रयोज
नमाह॥ प्राग्जन्मनि अर्जितस्य शुभाशुभकर्मणः पाकं होरा व्यक्तीकरोति॥ ६॥ व्यवहाराय
कालस्यांगानि मेषादीन्यशार्दूलेनाह॥ कालांगानीति॥ मेषप्रथमा राशयो न वनिर्नि
त्रेत्र पादैः प्रमाणं येषां ते अश्विन्यादयः मघा अश्विन्यादि नव नक्षत्रपादा एकैकस्य मानं मे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥अथमाराशयो॥ श्रिप्रथमैर्न्नैर्युक्ता इत्यर्थः॥ताद्दृग्नाः कालस्य धातुरवयवाः।तान्नेय
थाः॥शिरः१मुखं२वक्षः३हृत्४उदरं५कटिः६नाभिः७लिंगं८ऊरू९जानुनी१०जंघे११पा
दौ१२॥चक्रवत्स्थिताः॥राशिः क्षेत्रं गृहं र्क्षं भं भवनं॥एते एकमर्थं प्रतियंति॥पर्याया
इत्यर्थः॥४॥राशीनां स्वरूपं वर्षयंस्तिलकेनाह॥ ॥मत्स्याविति॥मीनो मत्स्यो।अन्योन्य
पुच्छाभिमुखं मत्स्यद्वयं घटी।स्कंधासक्तरिक्तघटः कुमान्कुंभः।२।नृनार्योर्मिथुनं।स्त्रीपुमांसौ
मिथुनराशिः।दुमान् नृ यगदः स्त्री च वीणा३ अश्वजघनश्चतुष्पात् धनुर्धरो नरो धनुः४मृ
गमुखो मकरः।५।तुलाधरो ना तुलाराशिः६ धान्याग्निकरा नौस्था कुमारी कन्याराशिः
७।शेषाः मेषवृषकर्कसिंहवृश्चिकाः स्वनामवेदिनाच्छतयः। सर्वेराशयः स्वचराः स्वस्वस्था
नेषु चरंति॥तथाहि॥मेषवृषौ दिवा वनचरौ रात्रौ ग्राम्यौ।२।मिथुनो ग्राम्यः३।कर्को नु चरः४
सिंहो वनचरः५।सस्याग्निकरा नौ प्रदेशगा कन्या।६।तुलाऽऽपणस्था।७।वृश्चिको गर्तवान्८
धन्वी ग्राम्यः।९।मकरः पूर्वार्धे ग्राम्यो ऽन्यो जलचरः१०कुंभो ग्राम्यः११मीनो जल१२
॥५॥राशिनवांशद्वादशांशाधिपानर्धश्लोकेनाह॥ ॥क्षितिजेति॥ कुजादयोऽ
न्दीनां मेषादीनां अंशानां च पतयः।नवांशानाह॥अजेति॥मेषाद्या मेषस्य नव

मकराद्या वृषस्य।तुलाद्या मिथुनस्य।चं नवके कर्कस्त्वाद्याः कर्कस्य॥एवं सिंहादीनां
चतुर्णां क्रमान्मेषमृगतुलाकर्काद्याः॥पुनर्धन्विरादीनां तद्वत्॥द्वादशांशानाह॥नवनव
मांशाः द्वादशांशास्तत्पतयः स्वगृहादेव द्वादश क्रमेण ज्ञेयाः।६।त्रिंशांशान्द्विपितान्
याह॥कुजेति॥अयुजि विषमराशौ पंच तेन आदितः पंचानां कुजः स्वामी।समीर पतिः
शनिः पंच ततः पंचानां शनिः।कोऽपि वृश्चिकोऽष्टमः तेन ततोऽष्टानां जीवः।ज्रूकस्तुला
सप्तमस्तेन ततः सप्तानां बुधः।लेयः सिंहः पंचमस्तेन ततः पंचानां शुक्रः॥एवं त्रिंशत्॥
युजि समराशौ ते चागा ग्रहाश्च विपरीताः तेन आदितः पंचानां शुक्रः॥ततः सप्तानां बुधः
ततोऽष्टौ गुरोः।ततः पंच शनेः।ततः पंच कुजस्येति॥७॥शशीति॥कर्कालिमीना नौन वमो
नवांशः कुलं स्वं धिष्ण्यं इः।प्रयोजनं॥यथा पापेश शिनि च जउ इत्यादि॥८॥मेषादिसं
ज्ञा आर्ययाह॥ ॥क्रियेति॥क्रियो मेषः१तावुरि वृषः२जितुमं मिथुनं३कुलीरः कर्कः४
लेयः सिंहः।५।पाथोनि कन्या६।ज्रूकस्तुला७।कौर्पि वृश्चिकः।तौक्षिको धनुः९।आको
केरो मकरः१०।हृद्रोगः कुंभः।११।अंत्यभं मीनः।१२।इति राशीनां संज्ञा॥९॥षड्वर्गमि
ष्टवज्ज्ञयाह॥ ॥रेष्काणेति॥रेष्काणादयः षट्पदार्था ग्रहस्य वर्गसंज्ञा॥रेष्काणे राशि

त्रिभागः। होराशिपर्धं। २ नवमभागो नवांशः॥ त्रिंशांशो त्रिंशो भागः। द्वादशांशाश्च।
२ यस्य ग्रहस्य यत् क्षेत्रं राशिः स तस्य वर्गः। गृह होरादिषु स्वेषु स्थितः स्ववर्गस्थः एवं परव
राशि॰ र्गोपि॥ लग्नं नदर्ड च होरेति ज्ञेयं॥ ८॥ संज्ञान्तरं वसंत तिलकेनाह॥ गोजेति॥ वृषमे
षधनुः कर्कि मिथुनमकराः रात्रिबलसंज्ञाः। मिथुनरहितास्त एव पृष्ठोदयाः। पृष्ठेनो
द्यंतीत्यर्थः॥ शेषाः सिंहकन्यातुलालिकुंभा मिथुनश्च शीर्षोदयाः शिरसो द्यंति॥ कुंभा
लादिनबलाश्च मीनस्तूभयतः पृष्ठशीर्षाभ्यामुद्गच्छति॥ १०॥ क्रूरादिसंज्ञामेदाक्रांतया
ह॥ क्रूरइति॥ मेषादयो विषमाः क्रूराः नराश्च॥ वृषादयः समाः सौम्या नार्यश्च॥ तथा
मेषादयः क्रमाच्चरस्थिरद्विस्वभावाः। एवं कर्कादयस्तुलादयो मकरादयश्च॥ प्रागादीति।
मेषवृषमिथुनकर्काः स्वस्वत्रिकोणयुताः प्रागादीश्वराः। तेन मेषसिंहधन्विनः पूर्वेशाः। आ
वृषकन्यामकराः दक्षिणेशाः। मिथुनतुलाकुंभाः पश्चिमेशाः। कर्कालिमीना उत्तरेशाः।
विषमराशौ सूर्यस्य होरा॥ समराशौ चंद्रसूर्ययोः। राशीनामाद्ये द्रेष्काणः। स्वेशस्य द्विती
यः पंचमाधिपतेः तृतीयो नवमाधिपतेः॥ ११॥ होरा द्रेष्काणयोर्मतांतरमिंद्रवज्रयाह॥
केचिदिति॥ स्वेशलाभेशयोर्होरे केचिद्वदंति॥ स्वेशाद्द्वादशलाभेशानां द्रेष्काणांश्च वद ॥३॥

ति॥ १२॥ ग्रहाणामुच्चनीचानि द्रुतविलंबितायया[?]ह॥ अजेति॥ मेषवृषकर्कमकरकन्याकर्कमीन
तुलानां दशत्रिचतुर्दशाष्टाविंशपंचदशपंचविंशतिविंशात्यंशेषु रव्यादयः क्रमात्परमोच्चाः
उच्चस्थानात्सप्तमराशीनां दशाद्यंशेषु परमनीचाः॥ १३॥ ग्रहाणां वर्गोत्तममूलत्रिकोणानि
वसंततिलकेनाह॥ वर्गोत्तमाइति॥ चराणां प्रथमो नवांशः स्थिराणां पंचमो द्विस्वभावानां
नवमश्च वर्गोत्तमसंज्ञः। मत्तग्रदाया॥ सिंहवृषमेषकन्याधनुस्तुलाकुंभाः रव्यादीनां
मूलत्रिकोणानि॥ १४॥ लग्नादीनां संज्ञा वसंततिलकयैवाह॥ होरेति॥ तनुः १ कुटुंबं २ भ्राता ३
बंधुः ४ पुत्रः ५ शत्रुः ६ पत्नी ७ मृतिः ८ धर्मः ९ आस्पदं १० लाभः ११ रिष्फं १२॥ लग्नादिनामा
नि॥ षष्ठदशमैकादशतृतीयानुपचयाख्यानि॥ एके उपचयत्वमेषां कनित्यमिति वदंति
पापैः स्वामिन्नादुणा[?]च दृष्टे नोपचयत्वमिति भावः॥ १५॥ लग्नादीनां नामांतराणि व्यवहा
राय तयैवाह॥ कल्येति॥ कल्यं १ स्वं २ विक्रमं ३ गृहं ४ प्रतिभा ५ क्षतं ६ चित्तोत्थं ७ रंध्रं ८ गु
रुः ९ मानं १० भवः ११ व्ययः १२॥ लग्नादिनामानि॥ लग्नाच्चतुर्थाष्टमे चतुरस्रसंज्ञे॥
समं द्युनं दशमे खं आज्ञा च॥ १६॥ केंद्रादिनस्थराशिबलं च दोधकेनाह॥ कंटकेति॥
लग्नचतुर्थसप्तमदशमानां कंटककेंद्रचतुष्टयेति संज्ञात्रयं॥ कोटो वृश्चिकः सप्तमस्थो व

ह।आप्ये। कन्या

ली। मिथुनं तुला धनुः पूर्वार्द्धं कुंभः नृराशयस्ते लग्नस्था बलिनः। कर्किमीनमकरपरार्द्धं ज-
लचरास्ते चतुर्थे बलिनः। मेषवृषसिंहधनुःपरार्द्धं मकरपूर्वार्द्धाः पशवस्ते दशमस्था ब-
९ लिनः॥१७॥ अथ संज्ञान्तरं वसंततिलकेनाह॥ ॥केंद्रादिति॥ केंद्रात्परे ये द्वितीयपंचमाष्टमैकादशा-
राशि स्ते पणफरसंज्ञाः॥ तत्परे ये तृतीयषष्ठनवमद्वादशास्ते आपोक्लिमसंज्ञाः॥ हिबुकं बुसुखवेश्म
संज्ञा चतुर्थस्य॥ अस्तजामित्रे सप्तमस्य। त्रिकोणं पंचमस्य। मेषूरणं दशमस्य॥१८॥ होरा-
दीनां बलं शार्दूलविक्रीडितेनाह॥ ॥होरा स्वामीति॥ स्वस्वामिगुरुज्ञयुतेक्षिता वा होरा
बलवती॥ अन्यैर्न बला॥ उभयैर्मध्यबला॥ केंद्रस्था इत्यत्रादिशब्दो बोध्यः। केंद्रस्था अपि राशयो
बलिनः। पणफरगा मध्यबलाः। आपोक्लिमगा हीनबलाः॥ अत्र केंद्रादिस्था द्विपदादयो बलि-
न इति केचिद्व्याचक्षते॥ तदयुक्तं॥ बादरायणेन विरोधात्॥ तथा च तद्वाक्यं॥ केंद्रस्थास्त्विति बल-
मध्यबलाः पणफरास्त्विना ज्ञेयाः॥ आपोक्लिमगाश्च हीनबला राशयः कथिताः इति॥ अ-
ह्नि निशि संध्यायामपि च क्रमात् द्विपदचतुष्पदकीटा वीर्यान्विता इत्यनुवर्त्तते॥ दिने द्विपदाः॥
निशि चतुष्पदाः॥ संध्ययोः कीटाः। कीटश्चाप्यप्यापुपलक्षकः। पूर्वार्द्धमिति॥ विषयादयः पं-
चादयः ५।६।७।८।९।१०। एते चतुर्गुणाः २०।२४।२८।३२।३६।४०। एतन्मेषादिषट्कमानं॥ व्य-

त्ययात् तुलादिमानं॥ इदं नष्टचिंतादौ नरवयोवज्ञानाय॥ उभयमध्ये देवनायस्य संज्ञा॥
तपः स्त्री त्रिकोणे नवमस्य॥१९॥ राशिवर्णान् मंदाक्रांतयाह॥ ॥रक्त इति॥ मेषो रक्तः १
वृषः सितः २। मिथुनो हरितवर्णः ३। कर्कः ईषद्रक्तः ४। सिंहो धूम्रः ५ कन्या नानावर्णा ६।
९ तुला कृष्णा ७ वृश्चिकः पीतः ८। धनुः कपिलः ९। मकरः कर्बुरः १० कुंभः कपिलः ११ मीनः स्वच्छ-
राशि वर्णः १२। स्वामिनोऽथादितत्र सर्वराशीनां प्लवत्वं ज्ञेयं॥ तथा हि॥ मेषवृश्चिकौ दक्षिणप्लवौ
वृषतुले आग्नेयीप्लवे॥ मिथुनकन्ये उत्तराप्लवे। कर्कटो वायवीप्लवः। सिंहः पूर्वप्लवः॥
धन्विमीनावीशानप्लवौ॥ मकरकुंभौ पश्चिमप्लवाविति॥ एतन्नष्टादिद्रव्यौरादेरत्रादि-
ग्मुखे गमनं प्रयोजनं॥ रविराशौ द्वितीये चेत्रिसंज्ञे यात्रायां शुभं॥२०॥ इति श्रीमहीध-
रकृते हरज्ञातकविवृत्तौ राशिप्रभेदः प्रथमो ध्यायः॥१॥ ॥श्री॥ कालांगानीत्यादिना
राशीनां कालांगत्वात् केश्वराचरं जगद्भूतमयमेव यथा राशीनां शीघ्रत्वात्॥ तस्यात्मादी-
नू आवादराजादीश्वपालकानूयदूरूपेनेव बलाद्दूलविक्रीडितेनाह॥ ॥कालात्मेति॥ का-
लस्यात्मा रविः। चंद्रो मनः। कुजः शौर्यं बुधो वाक्। गुरुर्ज्ञानं सुखं शुक्रः कामः। शनिर्दुःखं
नक्षत्रवलंकालावयवाः मेषाद्याः। यदा अपि तस्यात्मादयद्बलः स्यु प्रयोजनं पीडितेयस्देहेन-

सु॰ स्कात॰ मरी॰ मात्र॰

२

ग्र दृसो

स्तहंगपीडनं॥ वृष्टेपुष्टिः। शनेर्वैपरीत्यं। किंच॥ रविचंद्रौ नृपौ। कुजः सेनापतिः। बुधो
युवराजः। गुरुशुक्रौ मंत्रिणौ। शनिर्दासः। प्रयोजनं यच्च्युतिप्रश्नेवोपचयस्थः कार्यसाध
कोऽन्यथा हानिकरः॥१॥ अथ ग्रहसंज्ञा शार्दूलविक्रीडितेनाह॥ हेलिरिति॥ हेलिरितिसूर्यनाम
शीतरश्मिरितिचंद्रस्याहेम्नः। विलुः ज्ञः बोधनः एतानि बुधस्य। आरः वक्रः क्रूरदृक् आ
वनेयः एता भौमस्य। क्रोडगो मंदः असितः इति शनेः॥२॥ अन्येषां संज्ञा वसंततिलके
नाह॥ जीवइति॥ जीवः अंगिराः सुरगुरुः वाचस्पतिः ईज्यः एता गुरोः। स्वच्छः स्वेयुजः सि
तः आस्फुजित् एताः शुक्रस्य॥ तमः अगुः असुरः एता राहोः। शिखीति केतोः॥ अ
न्ये पर्याया लोकतो बोध्याः।३॥ अथ ग्रहवर्णादिशार्दूलविक्रीडितेनाह॥ रक्तः श्याम इति॥ रक्त
श्यामौ रक्तश्यामपाटलवर्णौ रविचंद्रौ। भौमः स्वयं। नातिदीर्घो रक्तगौरः पद्मपत्राक्षो नो
मः॥ हरिद्रुर्सी बुधः। गौरो गुरुः। शुक्रः ईषद्गौरः। शनिः कृष्णः। प्रयोजनं स्वयं ग्रहे बलयोग
लवांस्तद्वर्णो नरः स्यात्॥४॥ अथ ग्रहाणां वर्णादिशार्दूलविक्रीडितेनाह॥ वर्णाइ
ति॥ ताम्रादिवर्णाः सूर्यादिनाथाः। सूर्यादयो नाथाः स्वामिनो येषां ते। ताम्रस्य रविर्नाथः। सित
स्य चंद्रः।२। अतिरक्तस्य कुजः।३। हरितस्य बुधः।४। पीतस्य गुरुः।५। चित्रवर्णस्य शुक्रः।६। कृष्ण ॥६॥

स्य शनिः।७। बलवद्ग्रहसवर्णरव्यक्तानां प्रयोजनं। अथवह्न्यादयो रव्यादिनाथाः। यथा॥
रवेरग्निर्नाथः।१। चंद्रस्य जलं।२। भौमस्य षण्मुखः।३। बुधस्य हरिः।४। गुरोरिंद्रः।५। शुक्रस्य
शची।६। शनेः प्रजापतिः।७। इदं स्पष्टार्थं॥ प्रागादिदिशां रव्यादयो नाथाः। रविः प्राच्याः।१। शु
क्र आग्नेय्याः।२। कुजो दक्षिणस्याः।३। राहुर्नैर्ऋत्याः।४। शनिः पश्चिमायाः।५। चंद्रो वायव्याः।६। बु
धः उदीच्याः।७। गुरुरीशान्याः।८। क्षीण चंद्ररविकुजराहुशनयः पापाः तद्युक्तो बुधश्च। शेषाः
सौम्याः॥ रुक्मा सम्पर्का स्तुल्या सम्पर्कया बलवती गोचरः॥५॥ ग्रहाणां प्रकृतिं नृपतित्वं चो
पछंदसिकेनाह॥ बुधेति॥ बुधशनी क्लीबौ। शशिशुक्रौ स्त्रियौ। रविकुजजीवा नरः। कुजो
ग्नेः स्वामी। स्वसि बुधः। नभसो गुरुः। जलस्य शुक्रः। वायोः शनिः। रविचंद्रौ वन्हौ तुनोरिति
स्पष्टमुक्तं॥६॥ वर्णाधिपत्यं गुरुविभागं चोपजात्याह॥ विप्रेति॥ शुक्रगुरू विप्रपती॥ कुज
रवी क्षत्रियपती॥ मा स्त्री विट्पतिः। बुधः शूद्रपतिः। शनिरंत्यजपतिः॥ एषामुपघाते तद्वर्णो
पघातः। चंद्रार्कगुरवः सत्वं॥ बुधशुक्रौ रजः। कुजशनी तमः। प्रयोजनं॥ त्रिंशांशोऽपि स्पष्टार्थ
रस्ताहगिति॥७॥ चंद्रार्कयोः स्वरूपं त्रोटकेनाह॥ ॥ मध्विति॥ मधुनिभनेत्रः प्रभारितनु
जद्दयः पित्ताधिको विरलकेशोरविः। कृशः वर्तुलांगः। वातकफप्रकृधिकः। मेधावीकोम

२ ग्रह

लवान्नू। सुंदरनेत्रो विधुः। ८। ऊर्जबुधयोः स्वाभ्यगतयाह॥ क्रूरेति। क्रूरनेत्रो युवा दाता पित्त
धिको। स्थिरचित्तस्तनूदरः कुजः। गद्गदभाषी। हास्यरुची। त्रिदोषप्रयो त्वगस्वभावो बु
धः। ८। जीवशुक्रयोः स्वरूपं वंशस्थेनाह॥ इहदिति॥ ॥ स्थूलांगः पिंगकेशनेत्रो धार्मिकमतिः
॥ कफाधिको गुरुः। सुखी सुंदरांगः सुनेत्रः कफवायुप्रकृतिः। कृष्णकुंचितकेशः शुक्रः। १०। शनि
रूपं अशरणो धातुरूपं च वक्ष्यंतनिलकेनाह॥ मंदइति॥ कायपृष्टः पीतनेत्रो दुर्बलो स्थूलदेहो द
र्घदंतो रूक्षतनूरुहकेशो वाताधिकः शनिः। धातून्नाह॥ शनिः स्नायु। रविरस्थीनि। रुधिरं चंद्रः
त्वक्बुधः। रेतः शुक्रः। वसा गुरुः। मज्जा भौमः। ११। स्थानवस्त्रप्रभृत्वं शार्दूलेनाह॥ देवाम्बिति। अ
र्कादीनां देवादिस्थानानि॥ देवस्थानं रवेः। जलस्थानमिंदोः। अग्निस्थानं कुजस्य। क्रीडास्थानं
बुधस्य। भांडागारं गुरोः। शयनस्थानं शुक्रस्य॥ अवकरस्थानं शनेः। बलवति ग्रहे ग्रहस्थाने प्र
श्नं स्थानं हृतनष्टादेश्चौरस्थानं च ज्ञेयं। स्थूलं वा मोरवः॥ नवमिंदोः। अग्निदग्धं कुजस्य।
जलक्लिन्नं बुधस्य॥ नातिजीर्णं गुरोः। दृढं शुक्रस्य। जीर्णं शनेः॥ सति का च वस्त्रज्ञानं प्रयोजनं
ताम्रं रवेः। मणिरिंदोः। हेम कुजस्य। कांस्यादि बुधस्य। रूप्यं गुरोः। मुक्ता शुक्रस्य। लोहं शनेः। सति ॥दि॥
भांडागारे बलवद् ग्रहद्रव्यं संस्थं। हृतनष्टद्रव्यज्ञानं च प्रयोजनं॥ शनिः शुक्रः कुजश्चंद्रबुधगुरू लग्ने

स्थानात्रिंशांशयोरुन्नवो ज्ञेयाः। बहुषु बलवतः ग्रहस्य भावे लग्नगे रेष्काणो रोगस्य वः॥ नष्टजातकेषु
ननष्टचिंतायां च प्रयोजनं॥ १२॥ ग्रहदृष्टिं मंजुभाषिण्याह॥ त्रिदशोति॥ यत्र स्थाने ग्रहाः स्थि
तास्तत स्तृतीयदशमस्थाने पाददृष्ट्या पश्यंति। शनिदृष्टौ। नवमपंचमे अर्धदृष्ट्या गुरु
दृष्टौ॥ अष्टमचतुर्थे पादोनदृष्ट्या कुजः दृष्टौ। परे सप्तमे दृष्ट्या बुधशुक्राः सप्तमं दृष्ट्या पश्यंति॥ ए
वं फलान्यपि ददाति॥ १३॥ कालज्ञानं वैतालीयेनाह॥ अयनेति। सूर्यादिभ्योऽयनादिकालं निर्दिशे
त्सूर्यादयनं। चंद्रान्मुहूर्तः। कुजाद्दिनं। बुधादृतुः। गुरोर्मासः। शुक्रात्पक्षः। शनेर्वर्षं। प्रयोजनं प्र
श्नलग्ने यस्य ग्रहस्य नवांशस्तत्कालं शुभाशुभफलं वाच्यं। रवेः कटुरसः। चंद्रस्य लवणः। कुज
स्य तिक्तः। बुधस्य मिश्रः। गुरोर्मधुरः। शुक्रस्याम्लः। शनेः कषायः। प्रयोजनं आधानकाले यो
बलवांस्तद्रसप्रदो हृदोगाभिरपाः। १४। मित्रामित्रादि शार्दूलेनाह॥ जीवइति॥ सूर्यादीनां
जीवादयो मित्राणि। तथाहि। रवेर्जीवो मित्रं। विधोर्गुरुबुधौ। कुजस्य सितबुधौ। बुधस्य रवि
शनी समौ॥ गुरोः कुजशनी समौ। शुक्रस्य रविचंद्रौ समौ। शनेः रवीचंद्रकुजाः समौ। सर्वे मित्रा
णि॥ केषांचिदेवं मतं॥ सत्याचार्यमतेतु स्वमूलत्रिकोणात्स्वधनात्प्रभृति धर्मस्वामिनः। स्वोच्चा
धीशोऽथ त्रिमूलत्रिकोणात् अष्टमचतुर्थेशाः सर्वे मित्राणि॥ तत्र विशेषः। द्विराशीशो मि

छ इ जा म मां

२

ग्रह:

त्रे। एकराशौ त्रौ मध्यः। अतुक्रराशौ शोऽरिः। रविचंद्रावेकराशौ शावपि मित्रे। द्विराशौ राशौ त्वा जावालू।। स्व
लक्षणे यो विधिः मित्रलक्षणे विधिस्तस्य विरोधात्।। अन्येऽपि ठितान मित्राणीति शेषः।। तदुक्तं
होरामकरंदे।। स्वत्रिकोणभवनाद्धनांत्यधीधर्मरिं ध्रु सुखतुंगनेश्वराः। सुनिश्चि सुहृदोऽपरेऽरयः
अत्यमेतदिङ्ग्यत्यजाषितं।। किंत्वहुक्त मत्स्यादीरितास्लन्कौ तिन्ना द्विपदु दाम्यव हत्रमा।। नेपितत्समय
मित्रशत्रुनिष्काधि मित्र सुहृदादयोऽपरइति।।१५।। उक्तानेवस्य ह्मानूक्ता हूत्त्वविक्षी डितैर्निष्ट्रि मा
ह्राः त्रात्र इति।। रवेरिंदुजीवा मित्राणि।। बुधः समः। शुक्रशनी रिपू। इंदो रविबुधौ मित्रे। कुजगुरुशु
क्रमंदाः समाः।। रिपवो नसंति।। कुजस्येंदुरविजीवाः मित्राणि।। शुक्रशनी समौ। बुधो रिपुः। बुधस्यर
विशुक्रौ मित्रे।। कुजगुरुमंदाः समाः। चंद्रो रिपुः। गुरोर विकुजचंद्रकुजाः मंत्राणि। शनिः समः। बुधशु
क्रौ रिपू।। शुक्रस्य बुधशनी मित्रे। कुजजीवौ समौ। रवींदू रिपू। शनेः ~~कुजगुरुमौ मित्रे~~ शुक्रबुधौ मित्रे।
गुरुः समः। रवींदुकुजाः रिपवः।। स्वत्रिकोणभवनादित्यादिना येऽर्वाक्षो वाक्तास्तेमा। विजन्मसमयोक्ता
।।१६।। तात्कालिकमित्रारिभावं शार्दूलेनाह।। ।।अन्योन्यस्येति।। ग्रहाः परस्परं धनांत्यायकर्मभ्रात्च
चतुर्थस्थिताः तत्काले जन्मनि यात्रायां विवाहे प्रश्ने वा मित्राणि स्युः। स्वोच्चे दस्थितोपि मित्रमिति के ।।१।।
एकराशिस्थाः तुला द्विप्रहा ध धर्मस्थास्तत्कालेऽन्योन्यं रिपवः।।
चित्।। अन्यथा त्वात्रवः स्युः। तद्यथा।। एकराशिस्थमुत्तरास्मिन् धर्मस्थास्तत्कालेऽन्योन्यं रिपवः।।
द्विकेति।। द्विकैकत्रपांतुक्तेनपान् सर्वेषां मित्रममारान्नैसर्गिकान्नूत्रात्रमंदसिता वित्यादिनोक्ता

वत्कल्पा जन्मादौ तात्कालिकवा। धि सुहृदादिभिः कल्पयेत्।। तत्र स्वाभाविकं मित्रं धनादिस्थमधिमित्रं। समो
मित्रं। रिपुः समः।। एवं धनाद्यन्यभावस्थितो निसर्गसुहृत्समः समः शत्रुः। शत्रुरधिशत्रुरिति।।१८।। ग्र
हाणां स्थानादिग्बले दोधकेनाह।। स्वोच्चेति।। स्वेति प्रत्येकं संबध्यते।। स्वोच्चे स्वमित्रगृहे स्वमूलत्रिकोणे स्व
नवांशे स्वराशौ च स्थितः स्थानबलाढ्यः।। तत्र रवेः सिंहः क्षेत्रं मूलत्रिकोणं च। विधोर्वृषः उच्चं मूलत्रिकोणं
च।। कुजस्य मेषः क्षेत्रं मूलत्रिकोणं च। बुधस्य कन्या क्षेत्रोच्चमूलत्रिकोणानि। गुरोर्धनुः क्षेत्रं मूलत्रिको
णं च शुक्रस्य तुला क्षेत्रं मूलत्रिकोणं च। शनेः मूलत्रिकोणं क्षेत्रं च। तत्र विशेषः सारावल्यां।। विंशतिरंशा ॐ मः
सिंहे त्रिकोणमपरे स्वभवनमर्कस्य।। उच्चं भागत्रितयं वृषइंदोः स्यात् त्रिकोणमपरेंशाः।।१।। मेषेद्वाद
शांशाः त्रिकोणमपरे स्वभं तु भौमस्य।। उच्चफलं कन्यायां बुधस्य तुंगांशकैः सदा चिंत्यं।।२।। परतस्त्रि
कोणजातं पंच। निरंशो स्वराशिजं परतः।। दशभिर्भागैर्जीवस्य त्रिकोणफलं स्वभं परं चापे।।३।। शुक्रस्य
शास्तिथयः त्रिकोणमपरे घटे स्वराशिस्थः।। कुंभे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंहे इति।।४।।
दिग्बलमाह।। दिक्ष्विति।। बुधगुरू प्राच्यां लग्नस्थौ बलिनौ। रविकुजौ यमेऽदशमस्थौ बलिनौ। शनिः
प्रतीच्यां सप्तमस्थः। सितेंदू उदीच्यां सुखस्थावित्यर्थः। यो यत्र बलीनतः सप्तमस्थो विबलः।। मध्येऽनु
पातकल्प्यः।।१९।। चेष्टाबलं दोधकेनाह।। उदगयनइति। रविचंद्रावुत्तरायणे बलिनौ।। कुजबुध

गुरुः सितश्चौरावक्रगाश्चंद्रयुताश्च बलिनः॥ ग्रहाणां रवियोगोऽस्तमयः। चंद्रयोगः समागमः। कुजा
दीनामन्योन्ययोगे युद्धं॥ तदुक्तं॥ दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानां॥ कुजयु
तादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानामिति॥ विस्तीर्णरश्मयोः श्मयोर्बली नद्वृत्तिः॥ युद्धि अन्योन्ययो
गेउत्तरादी ग्रहस्थो बली शुक्रं विना॥ तदुक्तं॥ सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः इ
ति॥ कालबलं निशि क्रिंचमालिन्याह॥ ॥निशीति॥ चंद्रकुजशनयो रात्रौ बलिनः। बुधस्सदानि
शादिने च बली॥ रविगुरुसिता दिने बलिनः। क्रूराः कृष्णपक्षे बलिनः। सौम्याः शुक्लपक्षे बलिनः॥ स्व
वर्षे स्वदिने स्वकाले होरायां स्वमासे च बलिनः॥ नैसर्गिकमाह॥ शेति॥ शादयो वर्णा आद्यानामिये
षां ते॥ मंदकुजबुधगुरुशुक्रचंद्रार्का उत्तरोत्तरं बलिनः॥२१॥ ॥इति श्री महीधरकृते बृहज्जात
कविवरणे ग्रहयोनिभेदाध्यायो द्वितीयः॥ ॥२॥ ॥अथ वियोनिजन्माध्याय॥ ॥ तीर्यक्रूपक्षि
स्थावरादीनां उत्पत्तिर्वियोनिजन्म तदर्थं तं तिलकेनाह॥ क्रूरग्रहैरिति॥ चंद्रगतद्वादशांशतुल्यं
वियोनिमन्यत्वं वदेत्॥ यदि चंद्रगतद्वादशांशो वियोनिसंज्ञः स्यात्॥ नान्यथा॥ तत्र मेषद्वादशां
शस्थे चंद्रे मेषसंज्ञवियोनेर्जन्म॥ वृषस्थे वृषाश्वमहिषादेः॥ कर्कस्थे कुलीरादेः॥ सिंहस्थे द्वीपिव्याल
सारमेयादेः॥ वृश्चिकस्थे सर्पकीटादेः॥ धनुर्द्वादशांशे नरार्धस्थे अश्वखरादेः॥ मकरपूर्वार्धस्थे मृ ॥८॥
गस्य॥ मृगोत्तरार्धस्थे मंडूकादेर्जलजंतोः॥ मीनद्वादशांशस्थे चंद्रे मत्स्यजन्म। परंतु क्रूरैर्बलिष्ठै

सौम्यैरबलैर्बुधेन्नानी वा केंद्रगे एते वियोनिजन्मयोगः॥ [illegible]॥ तदेव लक्षणादिति॥ शनिबुधदृष्टे चंद्रे वियो
निद्वादशांशस्थे बलिषु क्रूरेषु बलेषु सौम्येषु द्वितीयो योगः॥१॥ योगांतरं वैतालीयेनाह॥ पापा इति
पापा बलिनः स्वनवांशस्थाश्च सौम्याश्च निर्बलाः निर्बलाः परनवांशस्थाश्च। लग्नं च वियोनिलक्षणं पि चे
द्गलद्वादशांशतुल्यं वियोनिं वदेत्॥२॥ वियोनिजन्मस्वंगानुपजात्याह॥ क्रियइति॥ मेषं चतुष्प
दां शिरः १ वृषो मुखं कंठौ २॥ मिथुनः पूर्वपादस्कंधौ ३ कर्कः पृष्ठं ४ सिंहो वक्षः॥५॥ कन्यापार्श्वद्वयं ६ तु
लाक्रोडद्वयं। ७ अलिर्गुदं ८। धनुः पश्चिमपादौ॥९॥ मकरो लिंगवृषणौ॥१०॥ कुंभः स्फिचौ॥११ मीनः
पुच्छं १२। चतुष्पदादानां पदादीनामुपलक्षणं॥ तत्र पूर्वपदस्थाने पक्षपाली। शेषं तुल्यं॥ प्रयोजनं रा
श्युपलक्षितेंगे वर्णादिज्ञाने॥३॥ वियोनिवर्णज्ञानं वैश्वदेव्याह॥ लग्नांशमिति॥ वियोनिजन्मनि
राश्युपलक्षितेंगे वर्णादिज्ञाने॥ [illegible] यदि स्वामिनायुतस्पदृष्टस्य वा राशेर्नवांशो लग्न
ज्ञाते बलयुक्तात् लग्ननवांशात्स्वरादि वदेत्॥ यदि [illegible]
गः स्यात्तदा नरा [illegible] वदेदित्यर्थः॥ [illegible] योगदृष्ट्या [illegible] लग्ननवांशराशेर्वर्णं॥ बहुन्निर्दुतं
दिकं वदेत्॥ तदभावे येन लग्नमा [illegible] योगदृष्ट्या [illegible] बलवतो चसर्वाकृत्यं॥ अथयो यत्रांगे [illegible]
दृष्टं नालग्नं तदा [illegible] वदेत्॥ लग्नास्य [illegible] दृष्टे तद्वर्णं रेखां वदेत्॥४॥ पक्षिजन्म [illegible]
गतस्तत्र तद्वर्णं वदेत्॥ [illegible]

३ वियो

स्थिताह॥ खगा इति॥ सिंहकुंभयोः प्रथमो मिथुनतुलयोर्द्वितीयश्चेति खगदृक्काणाः॥ एषाम
न्यतमे द्रेष्काणे लग्नगे बलवता खगेन केनचिद्युते शनिना युते दृष्टे वा स्थलजपक्षिणां जन्म
॥ चंद्रेण युते दृष्टे वा जलजपक्षिणां जन्म इत्येको योगः॥ चरनवांशोदये बलिना ग्रहेण युक्ते
शनिचंद्राभ्यां युते दृष्टे वा क्रमात् स्थलज जलजानां जन्मेति द्वितीयः॥ बुधनवांशकोदये बलव
ता खगयुते दृष्टे स्थलजानां चंद्रयुतदृष्टे जलजानामिति तृतीयः॥ तदुक्तं॥ विहगोदितद्रे
ष्काणाय हेण बलिना युतेऽथवा नांशे॥ बौधांशे वा विहगाः स्थलांबुजाः शनिशशीदृ
ग्योगादिति॥ ५॥ वृक्षजन्म वसंततिलकेनाह॥ होरेति॥ लग्नचंद्रगुरुरवयो बलिहीनास्तरू
णां जन्म एव ब्रुवीति वाच्यं॥ तत्र जलजस्थलज दृक्काणे दोशहतो ज्ञेयः॥ कर्कमीनमकरो चरा
र्द्धि जलचराः॥ तदंशोदये जलवृक्षाः॥ अन्यराश्यंशोदये स्थलजाः॥ तत्र संख्यामाह॥ लग्नादि
ति॥ उदितांशपतिः लग्नाद्यावत्संख्ये राशौ तत्संख्या वृक्षाः॥ स्थलजा जलजा वा च्याः॥
अत्रांशपतिवशादायुर्दायवत् त्रिगुणादिकं वाच्यं॥ स्वतुंगवक्रोपगते त्रिसंगुणमित्या
दि॥ ६॥ ॥ स्थलजलजांशपतिवशात्तरूणां विशेषज्ञानं मंदक्रांतयाह॥ ॥ अंत
रिति॥ रविरंशपतिस्तरून्मध्ये दृढान्दारशपादीन्कुर्यादयति॥ शनिर्दुर्भगान्कुब्जा॥ ६॥

यो। ३ ४

दान्॥ चंद्रः क्षीरतरून्पिप्पलादीन्॥ कुजः कंटकयुतान्खदिरादीन्॥ गुरुः सफलान्नाम्रादीन्॥ बुधो
विफलान्नेरटकादीन्॥ भृगुः पुष्पतरून्जातीचंपकादीन्॥ चंद्रसुतः स्निग्धानक्षोटकादीन्॥ कुज
सुतः कटुकपत्रान् त्रपातकादीन्॥ ७॥ तरुणां शुभाशुभज्ञानं वंशस्थेनाह॥ ॥ शुभ इति॥ ॥
अएव स्थलजलांशपतिः शुभः सं[illegible]स्तदा क्रूरराशौ स्थितश्चेत्तदा रुचिरं तरुं कुत्सितभूमिजातं
करोति॥ अन्यथा अंशपतिरशुभस्तत्कालं सौम्यराशिस्थश्चेत्तदा अशुभं तरुं सुभूमिजं वदेत्॥ अ
थ दिवशुभोऽशुभराशिस्थो अशुभतरं कुभूमिजं॥ शुभो शुभराशिस्थे शुभं तरुं शुभभूमिजं वदेत्॥
किंच॥ स्थलजलांशपतिः स्वादेशाद्यावत्संख्ये परनवांशे गतस्तावत्संख्यास्तज्जानीयात्तरवो
भवंति॥ ॥ इति श्रीमहीधरकृते बृहज्जातकविवरणे वियोनिजन्माध्यायस्तृतीयः॥ ३॥
॥ श्री॥ ॥ अथ निषेकाध्यायः॥ तत्र कुतो गर्भाधानमिति॥ ऋतुनिरूपणं॥ तत्र स्त्रीनरसं
योगज्ञानं वंशस्थेनाह॥ ॥ कुजे इति॥ चंद्रे षोडशमि अनुपचयराशिगते अतिनाशाणां प्रतिमासं
रजोदर्शनं॥ कुजेंदुहेतुर्यस्पेहवां गर्भयोग्यं भवति॥ अयमर्थः॥ नार्याजन्मराशेरनुपचयस्थे चं
द्रे कुजदृष्टे गर्भाधानयोग्यं रजः स्यादन्यत्र बलातुरावंध्यावृद्धा स्वेदृतिज्ञेयं॥ तदुक्तं॥ स्त्रीणां
गतोऽनुपचयर्क्षमनुष्णरश्मिः संदृश्यते यदि धरातनयेन तासां॥ गर्भग्रहार्तवमुशंति तदान
वंध्यावृद्धातुराल्पवयसामपि चेतदिष्टमिति॥ उपचयस्थे चंद्रे रजो विफलमित्यर्थादिज्ञेयं॥ अ

४

यदुक्तं योगमाह ॥ ॥ अतद् इति ॥ उक्ताद्विपरीते चंद्रे अयमर्थः ॥ नरजन्मराशेरुपचयस्थे चंद्रे शुभग्रहेण गु-
रुणा सुदृष्टे नारी नरेण मैथुनं यातीति वाच्यं ॥ एतदृतुविरामे चतुर्थादौ दिने बोध्यं ॥ तदुक्तं ॥ पु-
रुषस्योपचयस्थो गुरुणाथ दिदृक्षते हिममयूखः ॥ स्त्रीपुरुषसंयोगं तदा वदेदन्यथा नैव ॥ तथा
च ॥ ऋतुविरामे स्नातायाः यद्युपचयस्थः शशी पुंसः ॥ बलिना गुरुणा दृष्टस्तत्र स्त्रीपुंससंगमं प्रवदेदि-
ति ॥ ११ ॥ मिथुनप्रकारमिंद्रवज्रयाह ॥ यथेति ॥ आधानलग्नात्सप्तमं यल्लग्नाद्यायः सप्तमो राशि-
स्तत्संज्ञो जंतुर्येन प्रकारेण मिथुनं करोति ॥ तथा नरः मिथुनस्य संयोगो वाच्यः ॥ तस्मिन्सप्तमे पापै-
र्युते दृष्टे वा सकलहं रतं ॥ सौम्यैर्युते दृष्टे वा सविलासहासं रतं ॥ मिश्रैर्नापि युते दृष्टे मिश्रभावेन सहा-
सं नापि सकलहं ॥ २ ॥ गर्भसंभवं वंशस्थेनाह ॥ रवीति ॥ आधानलग्ने यत्र तत्रस्थैः रवीन्दुकुजभृगु-
जैः स्वनवांशस्थैरवश्यं गर्भः स्यात् ॥ यद्वा पुरुषोपचयर्क्षगतास्यौ सबलास्यौ सूर्यसितास्यौ स्वन-
वांशगास्यौ गर्भः ॥ नार्युपचयर्क्षगास्यौ कुजचंद्रास्यौ ईदृशास्यौ संगर्भः ॥ तदुक्तं ॥ बलयुक्तौ स्वगृहांशेष्व-
र्कसितावुपचयर्क्षगौ पुंसां ॥ स्त्रीणां वा कुजचंद्रौ यदा तदा संभवति गर्भ इति ॥ द्वितीययोगमाह ॥
गुराविति ॥ नवमपंचमलग्नान्यतमस्थे गुरौ च वरूपमपत्योद्भवः ॥ कोणानामेतद्योगा निषेकलो ॥
चंद्रकराश्रं धानगमिव ॥ ३ ॥ आधाने कालबलवत्सु ग्रहेषु वा वा धि स्त्रीनरयोः शुभाशुभे वंशस्थेना- ॥२०॥
ह ॥ ॥ दिवाकरेति ॥ रवेः सप्तमौ कुजशनी स्वमौ अंशु पुंसो रोगप्रदौ ॥ चंद्रात्सप्तमे कुजशनी नार्या-

रोगप्रदौ ॥ सूर्यात्कुजशन्योरेको द्वितीयेऽन्यो द्वादशो चेन्नदातयोर्बलीयान् स्यात्पुंसो मृतिदौ ॥
चंद्रादेवं नार्या मृतिदौ ॥ युतौ तथेति ॥ कुजशन्योर्मध्यादेकेन रवियुतोऽपरेण दृष्टस्तदा पुंसो
मृतिः ॥ एवं चंद्रो यद्येकेन युतोऽन्येन दृष्टस्तदा नार्या मृतिः ॥ द्वयो बलिनो मान्ये ॥ ४ ॥ पितृपितृ-
व्यमातृमातृस्वसॄणां शुभाशुभं वंशस्थेनाह ॥ दिवेति ॥ दिवे निषिक्तस्य जातस्य वा रविः पिता ॥
शुक्रो माता ॥ निशि शनिः पिता ॥ चंद्रो माता ॥ रात्रौ जातस्यापि पितृव्यः शुक्रो मातृष्वसा दिने श-
निः पितृव्यः ॥ चंद्रो मातृष्वसा ॥ प्रयोजनमाह ॥ ओजेति ॥ दिवा विषमराशिस्थो रविः पितुः शु-
भः ॥ निशि शनिः पितृव्यस्य ॥ दिवा शुक्रः समराशिस्थो मातुः शुभो रात्रौ मातृष्वसुः ॥ शनी रात्रौ विषम-
गः पितुः शुभः ॥ दिवा पितृव्यस्य ॥ चंद्रो रात्रौ समगो मातुः शुभः दिवा मातृष्वसुः ॥ अर्थादेवोक्तवै-
परीत्ये तेषामशुभं ॥ यथा ॥ दिवासमगोऽर्कः पितुरशुभो रात्रौ पितृव्यस्य ॥ दिवा विषमगः शु-
क्रो मातुरशुभो रात्रौ मातृष्वसुः ॥ निशि समगः शनिः पितुरशुभो दिवा पितृव्यस्य ॥ निशि वि-
षमगश्चंद्रो मातुरशुभो दिने मातृष्वसुरिति ॥ ५ ॥ मातुर्मृतियोगद्वयं कुलपदेनाह ॥ अस्तेति
पापे व्ययस्थे लग्नेऽशुभैरदृष्टे गर्भिणी म्रियते ॥ तदुक्तं ॥ अशुभे द्वादशगे स्थैर्शुभैर्न दृष्टे वि-
वर्जिते ॥ आधानलग्ने मरणं योषितः प्रवदेद्बुधः ॥ इति ॥ योगांतरमाह ॥ उदयेति ॥ शनौ
लग्नस्थे क्षीणेंदु कुजदृष्टे गर्भिणी म्रियते ॥ ६ ॥ योगांतरं वैतालीयेनाह ॥ पापेति ॥ लग्नचंद्रौ यु-

बृ॰इं॰म॰ष्टं

८

निषे

न ॥ क्रूरग्रेष्पापग्रहपरो द्वितीये वा पापग्रहतृतीये चतुर्थे वा पापग्रहा

गपल्लवर्त्तमानो गर्भपाकोपयान्नः स्त्रीश्मोत्पा दृष्टौ चेत् दृष्टश्च स्थिता वा एवं तदा गर्भिणी योगकर्त्तृणां
बलिनो मातृयेन्म्रियते ॥७॥ मातुर्मृतिं चैताकाप्याह ॥ क्रूरेति ॥ चंद्रात्चतुर्थगे क्रूरे कुजे ८ष्टमगे ए
को योगः ॥ लग्नाच्चतुर्थपापे कुजे ष्टमे च द्वितीयो योगः ॥ लग्नाच्चतुर्थे कुजे द्वादशे सूर्येयत्र तत्रस्थे
क्षीणचंद्रे तृतीयः ॥ आधानलग्ने एषामन्यतमेन गर्भिणी म्रियते ॥ ८ ॥ शस्त्रमृतिं गर्भस्ताचंद्र चैता
तीये माह ॥ उदयेति ॥ लग्ने कुजे पत्तनमेकेनार्यावा गर्भिणी एषाः शस्त्रेण मृतिः ॥ कललेत्यादि नामासे
शान् वक्ष्यति ॥ निषेकलग्नेमेसेभ्यो ऽष्टमेजितः केतुस्पष्टउल्कया गर्भिणी वातन्मा मेगर्भस्त्रा
वः ॥९॥ गर्भपुष्टिं चंद्रस्थेनाह ॥ शशांकेति ॥ लग्नस्थैः सौम्यैश्चतुर्गे वैत्रिपगैर्वा ॥ नवमपंचमस
प्तमद्वितीयचतुर्थदशमस्थैर्वा ॥ चंद्राद्वान्यग्नावाप्या बैतेषुस्थितैः सौम्यैः तृतीये कादशैर्पचं रा
ग्नात्पापैर्गर्भिः सुखी ॥ यदि लग्नं चंद्रो वारविः दृष्टाः स्यात् ॥ निषेकजन्मप्रश्नान्यतमकालात्
पुंस्त्रीज्ञानं शार्दूलविक्रीडितेनाह ॥ ओजेति ॥ लग्नार्कगुरुचंद्रेषु विषमगेषु विषमराशिनवांश
स्थेषु च बलवत्सु पुंजन्म ॥ लग्नादिषु समराशिगेषु समनवांशस्थेषु बलिषु च स्त्रीजन्म ॥ गुरुसू
र्यौ विषमराशिगौ बलिनौ पुंजन्मदौ ॥ शशिशुक्रकुजाः समराशिगाः बलिनः स्त्रीजन्मदाः ॥ नात्र
नवांशनियमः ॥ एते द्विस्वभावस्थाबुधेक्षिताः स्वपक्षेषु यंकुर्वंति ॥ अयमर्थः ॥ मिथुनकन्याधनु
र्मीना द्विस्वभावाः तत्र मिथुनधन्विनौ नरौ ॥ कन्यामीनौ स्त्रियौ ॥ मिथुनधनुर्राशिगो जीवा कैश्चि ॥१४॥

धदृष्टौ नरौ कुरुतः ॥ कन्यामीनांशगाश्चंद्रशुक्रकुजाः बुधदृष्टाः स्त्रीरूपे उभयोर्मिश्रत्वे कन्यान
रश्च ॥११॥ पुंजन्मयोगांतरमुपजात्याह ॥ विहायेति ॥ आधानलग्नं प्रश्नलग्नं वा त्यक्त्वा विलग्ना
द्विषमे तृतीयपंचमादौ गतः पुंजन्मदः ॥ योगकर्तृणां बलं विनाप्यत्र सर्वे नरोंगना बाबाच्या ॥१२॥
क्लीबयोगान् द्रुमाद्दूलेनाह ॥ अन्योन्येति ॥ चंद्राकौ क्रमात् समविषमगावन्योन्यं यदि पश्यतः ॥
समराशिस्थश्चंद्रो विषमराशिगं रविं पश्यन्य कश्चंद्रं मिथः पश्यंति ॥ नदैकः क्लीबयोगः ॥१॥ शनिबुधाव
पियथाक्रमं युग्मौजगतौ यदान्योन्यं पश्यतस्तदा द्वितीयः ॥२॥ विषमौजगो भौमः समराशिगमर्क
पश्यति रविश्च कुजं तदा तृतीयः ३ ॥ लग्नचंद्रौ विषमराशिगौ समगेन कुजेन दृष्टौ तदा चतुर्थ
४ इंदौ बुधो यथाक्रमं समविषमगौ यत्र तत्रस्थेन कुजेन दृष्टौ तदा पंचमः ॥५॥ शुक्रलग्नचंद्रा
गुरुपराशिनवांशगाः तदा षष्ठः ॥६॥१३॥ द्वित्रिगर्भयोगान् शार्दूलविक्रीडितेनाह ॥
युग्मइति ॥ यदा चंद्रशुक्रौ समराशिगौ बुधकुजगुरुलग्ना विषमगास्तदा गर्भे स्त्रीपुंसौ ॥१॥ यदा ल
ग्नचंद्रौ युग्मस्थ दृष्टौ समराशिगौ तथापि मिथुनं ॥२॥ यदा बुधकुजगुरुलग्नाः समगा बलिनश्च त
दापि मिथुनं ॥३॥ यदा स्वांशस्थो बुधो द्विस्वभावांशानन्यग्रहगतान् लग्नगतं च पश्यति त
पश्यति तदा त्रयं वाच्यं ॥ तत्र बुधांशवशात् द्वंद्वं ज्ञेयं ॥ अयमर्थः ॥ मिथुनांशस्थो बुधो य

पापग्रहा दृष्टिरहिते
चौंगेपाके
तौ तृतीये एवं
ऽष्टमे क्रूरग्रह
आदशैर्चंद्र
कादशैश्च
रः ॥ द्विताके
विक्रमहा
विलोम

हूरजा। मराआख्यं॥

४

नि॰ओ॰

लग्नगाद्वद्यं गांत्रात्न्यत्रपतितदा पुंढंढ कन्यैका॥ कन्यानवांशस्थो बुधस्तान्पत्रपतितदा कन्या
द्वयेपुत्र एकः॥ अमिश्रैः समभिति॥ ग्रहोदय बुधो मिश्रैः समलिंगस्थैः समलिंगत्रयं वाच्यं॥॥
अयमर्थः॥ मिथुननवांशस्थो बुधो मिथुनधनुरंशगान् ग्रहोदयान्पत्रपतितदा गर्भे पुंस्त्रयं॥॥
यदा कन्यानवांशस्थो बुधः कन्यामीनांशस्थो शस्थान् ग्रहोदयान् पश्यति तदा कन्यात्रयं वाच्यं॥
१७॥ नकुमंत्रयमुपजात्याह॥ धनुरिति॥ धनुर्लग्नेस्वनवांशस्थे सर्वग्रहेषु धनुरंशगतेषु ब
लवत्सु च लग्ने च बलिना बुधेन शनिना वा दृष्टे बहवो गर्भस्था वाच्याः॥१५॥ गर्भमासेशान्
दुष्टेनाह॥ कलेति॥ सितादयः प्रथमादिमासेषु कललादीनि कुर्वन्ति॥ ते तत्राधिपा ज्ञेयाः॥ अ
यमर्थः॥ गर्भस्य प्रथममासे कललेषु क्रशोणितमिश्रत्वं॥ तत्र शुक्रोऽधिपः १ द्वितीये का
ठिन्ये कुजोऽधिपतिः २ तृतीये हस्तादीनि अवयवोत्पत्तिः गुरुः स्वामी ३ चतुर्थे अस्थ्युत्पत्तिः रवि
स्वामी॥४ पंचमे चर्मोत्पत्तिः चंद्रोऽधिपः॥५॥ षष्ठे रोमोत्पत्तिः शनिरधिपतिः॥६॥ सप्तमे चे
तन्ये बुधोऽधिपतिः ७ अष्टमे मात्राशाहितस्य नालद्वारेणान्नानंतरगत्रधिानत्र लग्नेशोऽधि ॥१२॥
पः॥८॥ नवमे उद्वेगः चंद्रोऽधिपः ९ दशमे प्रसवः सूर्योऽधिपः॥१०॥ मासेशलुप्तेगर्भे शुभा
शुचे॥ आधानकालेपीडितग्रहेनल्मासे गर्भपातः॥ मंदरक्तमोत आग्नि पीडामा गर्भपीडा॥

निर्मले ग्रहेन सा स्मिगर्भपुष्टिः॥ तदुक्तं॥ कलुषैः पीडापतनं सपीडितैः निर्मलैरिति॥१६॥ आधि
कांगयोगं व्यंगतां च चंद्रशस्थेनाह॥ त्रिकोणेति॥ बुधे लग्नान्नवमपंचमस्थे बुधान्य ग्रहे
ष्वबलेषु द्विशरीरराशिभुज्याद्वलुर्भुजः स्यात्॥ वृषस्थे चंद्रे पापेषु कर्कालिमीननवमनवांशे
स्थेषु मूकः स्यात्॥ एवं विधे पि चंद्रे शुभनदृष्टे चिरात् वाचं कुरुते॥ अर्थात्पापदृष्टे मूकः॥ मि
श्रदृष्टे बलिनः फलं॥१७॥ अंधंतकुब्जजडपंगुजन्मयोगानंदाक्रांतयाह॥ ॥सौम्यर्क्षांशे
ति॥ यदि शनिकुजौ कन्यामिथुनगौ तन्नवांशगौ वा तदा अंधो जायते॥ कर्कलग्नस्थे चंद्रे
शनिकुजदृष्टे कुब्जः। मीनलग्ने शनिचंद्रकुजे दृष्टे पादहीनः॥ रविकुजशनीनामन्यतमे चं
द्रे च कर्कालिमीनोत्पनवांशगे अत्र हीनः॥ योगकर्तारो यदा यदि सौम्यैर्दृष्टास्तदा योग च
तुष्कं स्वल्पं वाच्यं॥ बलिभिः सौम्यैर्दृष्टा योगकरान॥ मध्यबलैर्हीनबलैर्वा दृष्टा अस्म मग्न फलं
॥१८॥ ॥वामनहीनांगयोगौ दोधकेनाह॥ सौरेति॥ नवमनवांशस्थे मकरलग्ने शनिचंद्र
र्कैर्दृष्टे वामनः स्यात्॥ द्वितीयद्रेष्काणस्थे लग्ने कुजयुते शनिचंद्रार्कैर्दृष्टे भुजहीनः। तृतीयद्रेष्का
णस्थे लग्ने कुजयुते शन्यादिदृष्टे पादहीनः॥ प्रथमद्रेष्काणस्थे लग्ने कुजयुते शन्यादिदृष्टे
शिरोहीनः॥ केचित् सौरादिदृष्टिं नानुवर्त्तयंति॥ अनुवर्त्तनं साधु॥ तदुक्तं॥ लग्ने द्रेष्काणगे
४ सोमः सौरः सूर्यद्विवीक्षितः॥ केयदि शिरसि तद्वत्पंचमे वा कुवर्जितं॥ विपादे नवमे स्थाने यदि सौ

ष्यनेत्रो विहीन इति॥१९॥ नेत्रवैकल्यं हरिणपाह॥ रविचंद्रावति॥ चंद्रार्कयुक्ते सिंहलग्ने कुज
शनिदृष्टे गर्भस्थोंऽधो वाच्यः॥ अथदिव सिंहलग्ने ऽर्कयुते शनिदृष्टे दक्षिणाक्षिकाणः॥ कुज
४ सिंहलग्ने चंद्रयुते शनिकुजदृष्टे वामाक्षिकाणः॥ सिंहलग्ने ऽर्कचंद्रयुते शुभपापैर्दृष्टे बु
निषे॰ द्बुदाक्षः॥ अत्राप्येकतमयुते प्राग्वत्॥ आधानलग्नाज्जन्मलग्नाद्वा द्वादशस्थश्चंद्रो वामनेत्रं
हंति॥ रविर्द्वादशो दक्षिणनेत्रं हंति॥ त्रिकोणगे ज्ञे इत्यादयो योगाः शुभदृष्ट्या पापाः स्फु
टफलं न यच्छंति॥ किंचित्फलदा इत्यर्थः॥२०॥ आधानकालात्प्रसवकालज्ञानं वसंतति
लकेनाह॥ तत्कालमिति॥ ॥ आधानकाले प्रश्नकाले वा यत्र राशौ यत्संख्ये द्वादशांशे चंद्रो
ऽस्ति। तत्तुल्ये तत्संख्ये यो मेषादिगणनया राशिस्तत्स्थे चंद्रे प्रसूतिः ततो दशमे मासि गर्भ
स्थस्य प्रसवो वाच्यः॥ तदुक्तं सारावल्यां॥ यस्मिन् द्वादशभागे गर्भाधाने व्यवस्थितश्चं
द्रः॥ तत्तुल्यर्क्षे प्रसवं गर्भस्य समादिशेत्प्राज्ञ इति॥ अन्ये त्वेवं व्याख्यांति॥ आधानकाले य
राशौ यावत्संख्ये द्वादशांशे चंद्रस्तस्मात्तावत्संख्यायां राशौ तत्रस्थे चंद्रे दशमे मासि प्रस
वः॥ तदुक्तं गार्ग्येण॥ यावत्संख्ये द्वादशांशे शीतरश्मिर्व्यवस्थितः॥ तत्संख्ये ऽस्ततो राशि-
~~तत्स्थे~~ जन्मेंदौ तत्र तु वदेदिति॥ तत्र दिनरात्रिज्ञानमाह॥ यावानिति॥ गोजाश्वि ॥१३॥

कर्किमिथुनाद्या स्युः दिनाद्दिनरात्रिलग्नान्युक्तानि॥ तत्राधाने प्रश्ने वा लग्नस्य यो नवांशो दिन
संज्ञो रात्रिसंज्ञो वा यावान्गतस्तावति दिननिशोः काले गते जन्म भवतीति वाच्यं॥ तदु
४ क्तं॥ तत्काले दिवसनिशासंज्ञः समुदेति राशिनागो यः॥ यावत्तदुदयस्तावान्वाच्यो दिवस
स्य रात्रेर्वेति॥२१॥ चिरप्रसूतिं मालिन्याह॥ उदयतीति॥ निषेकलग्ने मकरकुंभान्यतम
निषे॰ नवांशे उदयति। शनौ च सप्तमस्थे वर्षत्रये प्रसूतिर्वाच्या॥ एवंविधे यदि चंद्रे तदा द्वा
दशाब्दे प्रसूतिः॥ अयमर्थः॥ आधानलग्ने यदि कर्क्यंशः सप्तमश्चंद्रश्च तदा द्वादशेऽब्दे
प्रसूतिरिति गदितेति॥ इह निषेकाध्याये आधानकालज्ञानाद्यथा विधानं जन्मोक्तं॥ पि
तृमात्रादीनां च शुभाशुभं तज्जन्मलग्नवशादपि तादृशानां जन्मफले च जन्मानंतरं वा
च्यं॥ परं तु युक्त्या॥ यन्न संभवति तन्न वाच्यं॥ गर्भस्त्रावादि प्रसवकालादि च॥ यथा
धानाज्जन्मलग्नात्स्यात्तथा प्रश्नादपि वाच्यं॥ तदुक्तं॥ जन्म स्यादाधाने प्रश्नकाले चेति॥
२२॥ इति महीधरकृते जातकविवरणे निषेकाध्यायश्चतुर्थः॥४॥ ॥ अथ सूतिका
ध्यायमाह॥ तत्रापि पितुरसंनिधौ जन्म सुबुद्धिमाह॥ पितुरिति॥ चंद्रे प्रश्नलग्नमपश्यति पितुरसंनि
धाने बालो जातः॥ स्वे चरराशिस्थे दशमे चैलेऽद्योगते नवमाष्टमगे चंद्रे च लग्नमपश्यति

५
स्तु॰ति॰
का॰

विदेशगे पितरि जातः॥ स्थिरगे द्विस्वभावगे वा केन्द्रस्थाङ्के चंद्रे च लग्नमपश्यति स्वदेशस्थ
स्य मार्गे स्थिते स्वदेशे च पितुरसन्निधौ जातः॥ तदुक्तं॥ होरामवीक्षमाणे पितर्यगेहस्थितेश
त्रौ निजातः॥ मेषूरगो च्युतेऽध्वन्यचरन्ते नान्यो विदेशगादिति॥१॥ योगांतरमाह॥ उदयेति॥ श
नौ लग्नगे एक॥ कुजे अष्टमेन्य॥ बुधशुक्रयोर्मध्यस्थे चंद्रेऽन्य॥ योगत्रये पितुः परोक्षे जातः
॥२॥ अर्ध्ववेष्टिलज्ञानमाह॥ शशांकइति॥ चंद्रे भौमर्क्षे एगगे शुभे शुक्लग्नाद्व्ययनलाभस्थे शु
अर्ध्वेजातइति वाच्यं॥ भौमर्क्षे कोमेषालिनोराद्यः। कर्कधनुषो द्वितीयः। सिंहमीनयोस्तृत
यः॥ त्रिंशं॥ पापग्रहस्थेबंधिनिलग्नेभौमर्क्षे एगगे शुभे शुस्वायस्थेशु अर्ध्ववेष्टितोजाय
ते॥ तत्रापिमेषालि प्रथमः॥ सिंहस्तृतीयः। क्षीणे चंद्रे कर्के द्वितीयः॥३॥ ॥ एकजराद्युवे
ष्टितयोर्द्वयोर्जन्माह॥ चतुष्पदेति॥ रवौमेषवृषसिंहधनुरपरार्द्धमृगाद्यर्धवीर्थ्ये ऽन्यलमस्थे
॥ शेषखगेषु द्व्यंगगेषु बलिषु चेत्कुजरायुवेष्टितो द्वौ जायते॥४॥ नालवेष्टितज्ञानमाह॥
छागेति॥ मेषसिंहदृष्टान्यतमे लग्ने ज्ञानौ कुजे वा नालवेष्टितो जायते॥ कैत्रांगेतदाह॥
राशीति॥ लग्ननवांशराशिः कालांगानीत्यादोयत्रोक्तस्तत्रांगेनालवेष्टितः॥५॥ जा ॥१७॥

रजातज्ञानं वंशस्थेनाह॥ नलग्नेति॥ गुरुर्लग्नं चंद्रं च नपश्यति। चंद्र लग्नावेकराशिस्थौ
दृष्ट्य क्रूरस्थो वा गुरुर्नपश्यति। तदा जारजातो ज्ञेयः॥ चंद्रलग्नयोर्जीवनवांशस्थयोर्नपरज
तः॥ तदुक्तं॥ अजीवभागेऽष्टनवेद्दितिवाजीवेनचंद्रेच विलग्नस्ते वा॥ जातं परोक्षमिति
ब्रुवंति वाच्योजन्मेतावि बलावलोकादिति॥ रवियुक्तं चंद्रं गुरुर्नपश्यति तदापि परजातः॥
२॥ भौमपश्यान्वियुतोऽर्कयदिचंद्रे णापि युतः तदापरजातः॥३॥ चंद्रे गुरुक्षेत्रदृष्काणनवां
शद्वादश। त्रिंशांशान्यतमेंगे गुरु शुक्रे वा नपरजातः। तदुक्तं॥ गुरुक्षेत्रगते चंद्रे तद्युक्ते वा
न्यराशिगे॥ तद्रेष्काणदेशे वा नपरैर्जातिरुष्यतइति॥६॥ ॥पितृबंधनयोगं वैतालीयेन
ह॥ क्रूरेति॥ यदा क्रूरग्रहराशिगतो कुजशनी रवेः अष्टमनवमपंचमस्थौ तदपि ताबद्धो
वाच्यः॥ चरराशिगे कैपरदेशे॥ स्थिरगे स्वदेशे द्व्यंगगे पथि पिता बद्धो वाच्यः॥७॥ ॥पो
लेष्वप्रसवं वैतालीयेनाह॥ झसोति॥ कर्कस्थे चंद्रे ह्रस्वे बुधे लग्नगे गुरौ चतुर्थेनौगताप्रसू
यते॥ शुक्रस्पा सं नवा जलीवइति व्याख्यातं॥ योगांतरमाह॥ लग्नइति॥ मकरपश्चिमार्द्ध
कर्कमीनान्यतमे लग्ने यष्टमे च चंद्रे नौगतो वस्तु ते॥८॥ ॥जलेप्रसवं वैतालीयेनाह॥ आ
प्येति॥ जलराशौ लग्ने चंद्रश्च तदा जलस्थमीपे स्रतिनिश्चिता॥ यत्र तत्रस्थः सर्पश्चंद्रो लग्नगं

ह॰रु॰म॰ भाष्यं॥

५

सूति

का॰

जलराशिंप्रपतित दापि जलांतिके सूतिर्वाच्या॥२॥ यद्वा जलराशौ लग्ने प्राप्ति दशम चतुर्थलग्न
स्यतमे चंद्रे सदापि जले सूतिर्वाच्या॥३॥ ॥८॥ बंधनागारावटे सूतिं वैतालीयेनाह॥ ॥उदयेति
चंद्रे लग्नस्थे पापदृष्टे शनैश्चरादृष्टो बंधनागारे सूतिः॥ वृश्चिककर्क्यन्यतमे लग्ने शनि युते चंद्रे यु
ते दृष्टे गर्ते जन्म॥१०॥ क्रीडागारदेवालयोखरभूमेस्तानि वैतालीयेनाह॥ मंद इति॥ जलरा
शि लग्नस्थे शनौ बुधदृष्टे क्रीडायां जन्म। रविदृष्टे देवगृहे। चंद्रदृष्टे उखरभूमौ सूति वा
च्या॥११॥ ॥श्मशानादिषु प्रसूतिमुपजात्याह॥ न्रलग्नगमिति॥ इत्यर्धश्लोको [illegible] दप दाध्या
हारः॥ मिथुनतुलाकन्याकुंभधन्विप्रथमार्द्धकिं न्यतमे लग्नगे शनिं कुजे प्रपश्यति प्रतिश्म
शाने जन्म सूतिं॥ तादृशे शनौ सितचंद्रयोः प्रपश्यतोः रम्यदेशे। तादृशे शनौ गुरोपप्रपश्यत्यग्नि
होत्रे॥ रवौ तादृशे शनिं प्रपश्यति नृपगृहे देवगृहे गोकुले वा॥ तादृशे शनिं बुधे प्रपश्यति शि
ल्पिनां चित्राकारपुस्तककारवाद्यक्रि [illegible] सूतिं करोति॥१२॥ ॥सूतिदेशं वैताली
येनाह॥ राश्यंशेति॥ राशिलग्नं अंशास्तन्नवांशास्तत्सदृशदेशे जन्म। स्वचराश्च [illegible]
स्यादिनो कोयो जंतुराशिरूपो यत्र संचरति तत्रेत्यर्थः। तत्र लग्नं तन्नवांशो वा यदि चरस्त
दा तत्सा [illegible] चरणमार्गे सूतिः॥ स्थिरश्चेद्राशिरूपप्रा [illegible] स्वभाव [illegible] ॥१५॥
निकटे॥ विरस्य स्थिरद्वांगस्य वा लग्नस्यात्मीयनवांशे निजगृहे सूतिः॥ राश्यंशयोर्व्यत्ये चा

रे बलवतः फलं॥ अयमर्थः॥ तयोरेकस्य चरत्वेन्यस्यान्यत्वे योबली तद्देशो वाच्यः॥१३॥
मातृत्यागं तत्फल सुखं च वैतालीयेनाह॥ आरार्कीति॥ एकराशिगा सौ कुजशनिस्थो न व
मपंचमस्य समान्यतमस्थे चंद्रे जातो मात्रा त्यज्यते॥ तादृशे पि योगे चंद्रे गुरुदृष्टे मात्रात्य
क्तोपि चिरंजीवि सुखी स्यात्॥१४॥ मातृत्यक्तविनाशं वसंततिलकेनाह॥ पापेक्षित इति॥ ॥
सूर्ये [illegible] दृष्टे चंद्रे लग्नगे कुजे [illegible] जातो मातृत्यक्तो म्रियते॥ सूर्यदृष्टे चंद्रे लग्नगे
कुजे शन्यो [illegible] योजातोपि मातृत्यक्तो म्रियते॥ पापदृष्टे चंद्रे लग्नगे [illegible] पि प्रपश्यति
ति सौम्य [illegible] विप्रादिवर्णहस्तं मातृत्यक्तो याति जीवति च॥ लग्नस्थे चंद्रे पापैक्षे व [illegible]
पापे कुयो बली तद्वर्णहस्तं गतोपि म्रियते॥१५॥ सूतिगृहज्ञानं वैतालीयेनाह॥ पित्रिति॥
पितृमातृगृहबलात् पितृमातृगृहे प्रसूयते॥ दिवार्कशुक्रौ पितृमातृसंज्ञितौ [illegible] दिना पित्रादि
ग्रहास्तु का॥ अयमर्थः॥ रविशन्योरन्यतमे बलवति पितृपितृव्यस्थपितृव्यादिगृहे सूतिः॥
चंद्रशुक्रयोरन्यतमे प्रबले मातृमातृष्वसृमातुलादिगृहे इति॥ शुभे [illegible] नीचस्थे शुभ
[illegible] प्राकारनदीकूपारामगिर्यादिषु॥ यदीति॥ शुभैरित्यनुवर्तते॥ एकस्थानगे। [illegible]
शुभैर्यदि लग्नेंदू [illegible] सूतिः॥१६॥ दीपा [illegible] मातृ [illegible] चमं दा [illegible]

हा ह म-अध्ये॥

५
सूति
का

तयाह॥ मंदे ति॥ यत्र लग्ने चंद्रे वा निर्बलो वा लग्ने धनुरादि स्यूति कारायनं वाच्यं॥ लग्नाच्च
तुर्थे चंद्रे पि॥ शशानि दृष्टे यत्र कुत्र गे चंद्रे तमस्येव ३ अज्वगे अज्वराशि कर्क मीनो मकरकुंभ
यो मंदत्रांश इत्युक्तत्वात्॥ यत्र तत्र गे चंद्रे कर्क मीन नवांश गोल मस्येव॥ तदुक्तं॥ यत्र तत्र स्थे चं
द्रे शनि युक्ते तमस्येव॥ एवं निषेकका लेपि वाच्यं॥ पंचस्वेन युयोग युचंद्रे ऽर्क दृष्टे धनुराशा
वः॥ इत्युक्तं॥ मेषो राशार्के स्थे रात्रि निधलग्ना जलेजलर्लाशि कुंभा भितेवा॥ स्वांशास्थिते चंद्रे दुग्नते ऽर्थ
जे वा जातस्तमिथ्येयदिनार्क दृष्ट इति॥ त्रिज्ञ नतिभिना॥ चरे स्थे तमोशयनं वाच्यं॥ यद्वदिति॥ हरिज
ति॥ गगन मवनी प्रसक्त मिव द्दरपलेयत्रेति वचनोद्भुरिज मुदयरे स्वा॥ लग्नराशि येन विधेनो
दयं याति तथा गर्भमोक्षो वाच्यः॥ अयमर्थः॥ शीर्षोदये सूचानस्योदरं दर्शयितो गर्भमोक्षः॥
पृष्ठोदये ऽधोमुखस्य पृष्ठं दर्शयितः॥ मीनोदये पार्श्वं दर्शयतो हस्ता ग्रं॥ तदुक्तं॥ शीर्षोदये वि
लग्ने मूर्ध्नाप्रसवो ऽन्यथोदये चरणैः॥ उभयोदये च हस्तैः शुभदृष्टे शोभनो ऽन्यथा कष्टइति॥
क्रूरैश्चंद्रयुक्तैः अष्टमचतुर्थ गैर्वा मातुः क्लेशः॥ तदुक्तं॥ क्लेशो मातुः क्रूरैर्बंधस्थगतैः राशांक
युक्तैर्वेति॥ १७॥ दीपदारयोरिति मिरं वज्र्याहृ॥ स्नेह इति॥ चरादी पुंतैलं वाच्यं॥ अयमर्थः
यत्र राशौ चंद्रस्तत्र राशपारे दीपपात्रे तैलहस्त्वं वाच्यं॥ राशिमध्ये अर्धं राज्यपते तैलाहस्त्यं॥ उद ॥१९॥

श्री

या दिति॥ लग्नाद्वर्त्ति र्वाच्या॥ लग्ना रंभे तत्कालदत्ता वर्त्तिः॥ लग्नमध्ये ऽर्द्धदग्धा लग्नांते वर्त्तिशे
षो वाच्यः॥ तदुक्तं॥ यावत्त्लग्नादुदितं वर्त्तिर्दग्धेति तावती वाच्येति॥ रविराशिवशात् घराधे
दीपो वाच्यः॥ अयमर्थः॥ चरराशिस्थे र्के संचार्य माणो दीपः॥ स्थिरगे एकदेश स्थः॥ व्द्यंगगे
चर स्थिरः॥ केचिदत्रैवं व्याचक्षते॥ यत्राप्यर्कः मेषस्यां दिशि स्थितः प्रागादौ त्राः क्रियर्व्दृषे
त्यादिनोक्तस्तस्यां दिशि दीपो वाच्यः॥ यद्वारं वेरमेष ग्रहैः प्रागाद्यष्टदिक्षु क्रमात् लक्ष्म
मवक्षाद्यर्पांदि त्रिपर्कस्तत्र दीपो गृह मध्ये वाच्यः॥ द्वारमिति॥ केंद्रस्थे ग्रहे द्वारं वाच्यं॥ प्रा
गाद्यारविशुक्रे त्यादिनोक्तं॥ बहुषु बलिनो दिशि केंद्र गानावि लग्नराशेः प्रागादौत्राः क्रि
येत्यादिना वाच्यं॥ तदुक्तं॥ असतिवाविलग्नद्वादिति॥ लग्न द्वादशांश राशिदिगभिमुखं वेद्वा
रमिति केचित्॥ तदुक्तं॥ लग्नेयोद्विरस्यांशास्तद्वनिमुखं सूतिकागृहद्वारमिति॥ १८॥ सूतिगृ
हस्वरूपं शार्दूलविक्रीडितेनाह॥ ॥जीर्णमिति॥ चार्यमान्वितै रित्यनुवर्तते॥ सर्वेग्र
हैः ग्रहैः शार्दूलविक्रीडितेनाह॥ ॥जीर्णमिति॥ ऽर्के बलवति वा जीर्णं दग्धं रचं
द्रेन्यः मानो बलवति गृहं जीर्णमपि पुनः संस्कृतं वाच्यं॥ १॥ कुजे बलवति वा लीकोदग्धं रचं
द्रे बलिनि नवं लिप्तं॥ ३॥ रवौ बलिनि अदृढमपि दारुबहुलं॥ ४॥ बुधे बलिनि बहुशिल्पि रचि
तं पप्युक्ते बलिनि मनोरम्यं चित्रकर्मयुतं॥ ६॥ गुरौ बलिनि चिरकालस्थायी॥ ७॥ चक्रेति॥ चक्रस्थे

छाइज्ञान• काच्ये॥

५ सूती का

र्द्दिक्षु गृहस्य पुरः पश्चात्पार्श्वस्थैरन्यगृहैः सामंतस्थैर्वा सामंताद्भवाः सामंतास्तत्स्थैर्वा प्र
तिवेश्मगृहाणां यथोद्दिष्टोपरचनां वदेत्॥१९॥ ॥अथ सूतिकावासुनिसूतिकागृहज्ञानं दो
धकेनाह॥ मेषेति॥ मेषकर्कतुलावृश्चिककुंभैर्लग्नगैस्तद्गतैर्वा वास्तुनः प्राग्भागे सूति
कागृहं वाच्यं॥ धनुर्मीनमिथुनकन्यालग्ने तद्गतैर्वा उत्तरतः॥ वृषलग्ने तद्गतैर्वा प्रतीच्यां
मृगसिंहलग्ने तद्गतैर्वा दक्षिणस्यां॥२०॥ ॥अथ शय्याविभागं वैतालीयेनाह॥ प्रा
दी च्यादीति॥ गृहे सूतिगृहे प्राच्यादिषु बोध्या शय्या मेषादयो द्वौ द्वौ चरस्थिरौ दिक्षु यो
द्विस्वभावाश्चत्वारः आग्नेयादिकोणस्थाः॥ अयमर्थः॥ मेषवृषयोर्गृहस्य प्राग्भागे सूतिकाश
यनं॥ मिथुने आग्नेय्यां॥ कर्कसिंहयोर्दक्षिणे॥ कन्यायां नैर्ऋते॥ तुलालिनोः पश्चिमे॥ धनु
षि वायव्ये॥ मकरकुंभयोरुत्तरे॥ मीने ऐशाने॥ शय्यायामप्येष विधिः॥ अयं तु विशेषः॥
स्वद्ध्यो लग्नात्षष्ठतृतीयनवमद्वादशराशयः पादाः कल्प्याः॥ अयमर्थः॥ यत्र लग्नेष
अवस्त उक्तदिशि शय्याशिरः॥ द्वादशतृतीयावूर्ध्वपादौ॥ तृतीयो दक्षिणः॥ द्वादशो वाम
पादः॥ षष्ठनवमौ पश्चिमपादौ॥ षष्ठः दक्षिणपादः॥ नवमो वामपादः॥ लग्नद्वितीयौ शीर्षभा
गः॥ चतुर्थपंचमौ दक्षिणांगं॥ सप्तमाष्टमौ पादांतभागः॥ दशमैकादशौ वामांगं॥ शेषेण तन्मु ॥५७॥

क्तं॥ विनतत्वं यमलैर्दैः क्रूरैस्तत्तुल्यमुपघातमिति॥ यत्र शुभग्रहराशयस्तत्र नम्रता॥ यत्र पापास्तत्र
तत्सदृशोपघातः॥ शुभो गे स्वामिना सौम्येन वा युतदृष्टे नतत्वाभावः॥ पापेपि स्वोच्चराशित्रिको
णमित्रक्षेत्रस्थे उपघाताभावः॥२१॥ ॥उपसूतिकाज्ञानमनुष्टुभाह॥ चंद्रेति॥ लग्नाद्वारस्य य
त्र चंद्रः स्थितः तन्मध्ये यावंतो ग्रहास्तत्संख्या उपसूतिकाः सूतिकासमीपवर्तिन्यः स्त्रियो वाच्याः
नाम्च ग्रहतुल्यजातिवर्णस्वरूपाः॥ बहिरिति॥ यावंतो ग्रहाः दृश्ये चक्रार्द्धे तावंतो बहिष्ठाः॥ या
वंतोऽदृश्ये तावंत्यो गृहांतरगाः॥ तत्र लग्नादिभागा द्वादशैकादशदशमनवमाष्टम
सप्तमानुदितांशा दृश्यमर्द्धं॥ शेषमदृश्यं॥ अन्यथेति॥ अपरे आचार्या अन्यथा व्याख्यांति
॥ दृश्ये चक्रार्द्धेऽभ्यंतरगाः॥ अदृश्ये बाह्या इत्यर्थः॥ अत्रापि युक्तिं पिविधेना स्वतुंगवक्रोपगते॥ स्त्रि
ष्वुदयमित्यादिना द्वित्रिगुणत्वं कृत्वोपसूतिकानिश्चयः॥२२॥ जातस्यरूपादिज्ञानं दोधके
नाह॥ लग्नेति॥ लग्ने यो नवांशस्तस्य यः स्वामी तदाकारो वाच्यः॥ मधुपिंगलदृगित्यादि॥
यद्वा सर्वग्रहेभ्यो यो बली तत्तुल्यस्तनुर्वा॥ चंद्रराशिस्थो यो नवांशस्तद्राशितुल्यवर्णः॥ रक्तः श्यामो
भास्कर इत्यादि॥ कादिति॥ कादीनि गात्राणि विलग्नादिभराशिभिर्विभक्तानि यस्य॥ कालांगानि
तिपद्युक्तं तदत्र ग्राह्यं बोध्यं॥ लग्ने शिरः१ धने मुखं२ तृतीये उरः३ चतुर्थे हृत्४ पंचमं क्रोडः५ षष्ठं

बृ० म० भा०॥

ष्टिः ६ अष्टमे बस्तिः ७ अष्टमे त्रिप्रयुदे ८ नवमे वृषणौ ९ दशमे ऊरू १० ॥ एकादशे जानुनी ११ द्वा
दशे जंघे ॥ १२ ॥ पादौ च १३ ॥ इत्यर्द्धं विभयादयइत्युक्ते यत्र दीर्घराशिस्तदंगं दीर्घं यत्र लघुस्तल्ल
५ घु ॥ दीर्घराशिशीशो ऽल्पराशिस्थो ऽल्पराशौ शम्भुदीर्घराशिस्थो मध्यइत्यादि बोध्यं ॥ २३ ॥
सूतिका व्रणमशकादिज्ञानायांगविभागं शार्दूलविक्रीडितेनाह ॥ कंठकश्रोत्रइति ॥ त्रि त्रिद्रेष्काणे लग्ना
गे । स्त्रिधा शरीरविभागो ज्ञेयः ॥ लग्ने प्रथमद्रेष्काणे मूर्धादिविभागः ॥ द्वितीये कंठादि ॥
तृतीये बस्त्यादिः ॥ तत्रापि उदितेद्रेष्कभागस्थे वामे भागः ॥ लग्नोदितभागद्वादशेकादशदशमनवमा
ष्टमसप्तमाः उदितभागादृश्यं ॥ लग्नानुदितांश द्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमा दृत
भागा अदृश्ये तद्दक्षिणांगं ॥ अयमर्थः ॥ लग्ने प्रथमद्रेष्काणे लग्नं शिरः ॥ द्वितीयद्वादशे दक्षवा
मदृशौ ॥ तृतीयैकादशे दक्षवामश्रोत्रे । चतुर्थदशमे नासे ॥ पंचमनवमौ कपोलौ ॥ षष्ठाष्टमौ
हनू ॥ सप्तमे मुखं ॥ १ ॥ लग्नेंगे द्वितीयद्रेष्काणे लग्नं कंठः द्वितीयद्वादशे दक्षवामस्कंधौ ॥ तृतीयै
कादशे बाहू । चतुर्थदशमौ पार्श्वौ ॥ पंचमनवमे हृद्भागौ । षष्ठाष्टमे उदरभागौ ॥ अष्टमे नाभिः ॥ २ ॥
लग्नं तृतीये द्रेष्काणे लग्नं बस्तिः ॥ नाभिलिंगमध्यभागः ॥ द्वितीयद्वादशौ भागौ दक्षवामौ । त्रिभाग
गुदभागौ ॥ तृतीयैकादशे वृषणौ । चतुर्थदशमौ ऊरू ॥ पंचमे नवमे जानुनी ॥ षष्ठाष्टमे जंघे ॥ ॥१८॥
सप्तमे पादाविति ॥ ३ ॥ ॥ २४ ॥ अंगज्ञानप्रयोजनं तेनैवाह ॥ तस्मिन्निति ॥ द्रेष्काणविभागेन ज्ञाते

तस्मिन्नंगे पापयुते व्रणो वाच्यः ॥ शुभेन दृष्टे युते वा मशकादिचिह्नं ॥ व्रणमशकादिकर्त्ता स्व
राशौ स्वनवांशे । स्थिरराशौ स्थिरनवांशे वा स्थितस्तदा व्रणमशकादिः सहजः ॥ स्वांशाविकः ॥ उक्तवि
५ पर्यये केनचिन्निमित्तेन वयःप्रमाणेन स्वदशाकाले वा वाच्यः ॥ तत्रनिमित्तमाह ॥ मंदेति ॥ शनौ व्रण
सूतिका कर्त्तरि पाषाणहेतुको वातव्याधिहेतुको वा व्रणादिर्वाच्यः ॥ कुजे तत्कर्त्तरि वन्ह्यायुधविषोत्थः ॥
बुधे तत्कर्त्तरि शस्त्रहेतुकः ॥ रवौ काष्ठशस्त्रहेतुकः । पशुहेतुको वा ॥ चंद्रे शृंगिपशुहेतुको जलजप्राणिप्रभु
तो वा वाच्यः ॥ अन्येसितगुरुतद्युतबुधचंद्रे शुभं वाच्यं ॥ यतः पापयुतो बुधः क्षीणश्च व्रण
करौ ॥ २५ ॥ ॥ योगोत्तरं हरिरप्याह ॥ ॥ अमनुपतितादृति ॥ यस्मिन्नंगे वा मेदक्षिणे वा बुधयुत
त्रयोऽन्ये चतुर्थे बुधस्य पापाः शुभा वाश्रितास्तत्र क्षतं व्रणादेरवश्यं प्रासिः ॥ तन्मध्येबलिनोदशायां ॥ किंच
॥ तनोर्लग्नात्पापः षष्ठोगाश्रितेकालांगानां साध्येदेहभागे व्रणकरः स्यात् ॥ तत्रापि स्वसंक्रा
५४६ स्थिरसंयुते प्रसजः स्यादन्यथागंतुकइत्यनुवर्त्तनीयं ॥ अथ षष्ठः पापः शोभादृष्टस्तिलकमशकक
रः तिलकः कृष्णबिंदुः । मशको ऽर्बुदः ॥ स एव बहुः पापः शुभयुतो यदा तदा तिलकोमशको वाल
दम्भवान् ॥ विद्युतः स्यात् ॥ घनलोमभिश्चयोलक्ष्मेति ॥ ॥ इति महीधरकृते जातकविवरणेसू
त्पध्यायः पंचमः ॥ ॥ श्री ॥ ॥ रिष्टयोगेमत्स्यादुदीयाष्टकवर्गादिभिर्ध्यात्वादरिष्टाध्या
यमाह ॥ तत्र योगद्वयं नवमाहयाह ॥ अंध्यायामित्ति ॥ अर्कस्तिमयादितारो

५

अरि॰

दयांते सार्यं। तारा गारा। दिस्सूर्यो यदि यंयाव त्यालः संध्या॥ तत्र चंद्रहोरायां पापैर्नवमस्तवारीस्थै
र्जातस्य मृतिः॥१॥ तथा चंद्रेण पापत्रयेण चक्रेत्र चतुष्के आक्रांते मृतिः॥२॥ ॥योगांतरमिंद्र
वज्रयाह॥ चक्रस्येति॥ यावंतो लग्नांशा उदिता स्तावंतश्चतुर्थांशा स्त्युस्तदोप्ययागाः पंचम
षष्ठसप्तमाष्टमनवमदशमस्य लग्नोदित भागतुल्यांशाश्चक्रस्यापरार्द्धं॥ दृश्यार्द्धमिति॥ इत्थं
गते पापेषु पश्चिमगेषु सौम्येषु कर्कटे वृश्चिके वान्यतमे लग्ने जातः सद्यो नश्यति॥ द्वितीय द्वादश
षष्ठाष्टमगैः पापैश्च मृतिः॥ तदुक्तं॥ रिःफव्ययगतैः पापैर्यदि वा धनमृत्युगैः॥ लग्ने वा पापम
ध्यस्थे षष्ठे वा मृत्युमाप्नुयादिति॥ ३॥ योगांतरमनुष्टुभाह॥ ॥पापाविति॥ लग्ने सप्तमे च पा
पः। चंद्रः शुभादृष्टः क्रूरयुतश्च यत्र तत्र स्थस्तदा मृतिः॥३॥ योगांतरमाह॥ क्षीणइति॥ क्षी
णेंदुर्व्यये पापैर्लग्ने ऽष्टमे च॥ सौम्याः केंद्रेषु न तदा मृतिः॥४॥ योगांतरं समान्याह॥ क्रूर इति॥
शुभाः ऽदृष्टाः राशौ क्रूरयुतश्च सप्तम द्वादशाष्टम लग्नान्यतमस्थः शुभाः केंद्राद्बहिः स्थास्तदा
मृतिः॥ तदुक्तं॥ वर्या ष्टम्यो दयगे शशांके पापैः समेते शुभ दृष्टिहीनैः॥ केंद्रेषु सौम्य ग्रहवा
र्जिते च जातस्य शीघ्रं निधनं वदंति॥५॥ योगांतराणि द्वाभ्याह॥ ॥शशिनीति॥ पापदृष्ट
चंद्रः षष्ठोऽष्टमो वा मृतिदः शीघ्रं॥१॥ केवलं सौम्यैर्दृष्टस्तदा वर्षाष्टकं जीवति॥२॥ षड ॥१५॥

हारगश्चंद्रः सौम्यपापैर्दृष्टोऽष्टवर्षैः॥३॥ अथ दिवस ष्टाष्टमश्चंद्रः केनाप्यदृष्टः सौम्य द्रे
ष्कारगो वा पापद्रेष्काणगः सौम्ययुतो वा न मृतिदः॥ तथा लघुपद्धतौ दिवाजन्मनि॥ शुक्लेचरात्रौ
ष्टाष्टमश्चंद्रः शुभाशुभदृष्टोऽपि न मृतिदः॥ तदुक्तं मांडव्येन॥ पक्षे सिते नवति जन्म यदि क्षपायां
कृष्णे तथाहनि त्यादि॥ अस्पष्टिरितिः॥ बुधगुरुसिता न्यतमे षष्ठाष्टमगे बलत्या पदृष्टे मा
समायुः॥४॥ तादृशो शुक्रे शुभदृष्टे मृत्युर्मासाद्वा॥ लग्ने ऽरौपापा द्दृष्टे सप्तमस्थे च मासमायुः॥
५॥६॥ योगांतराणि मंदाक्रांतयाह॥ लग्ने क्षीणेंदुरिति॥ क्षीणेंदो लग्नगते केंद्राष्टमगेषु पापेषु
मृतिः॥१॥ चतुर्थाष्टम सप्तमगे पापद्वयमध्यगे चंद्रे च मृतिः॥२॥ पापद्वयांत स्थे चंद्रे लग्न
गे बलवद्भिरादृष्टे सप्तमाष्टमगे पापे च मृतिर्मात्रा सह॥३॥ बलिभिः शुभैरदृष्टे च तादृक् चंद्रे
तस्यैव मृतिः न मातुः॥७॥ रिष्टांतराण्युपजात्याह॥ राश्यंते तिः॥ यत्र तत्र स्थश्चंद्रः शुभा दृष्टो
नवमत्रिकोणगः॥ नवम पंचमगाः पापास्तदा शुभमृतिः॥१॥ चंद्रे लग्ने सप्तमाष्टमे पापास्तदा पि
मृतिः॥८॥ रिष्टांतराणि हरिताह॥ ॥अशुभेति॥ यदोपरागस्थः शनियुतश्चंद्रो लग्नेऽभौमोष्ट
मश्च तदा मातृपुत्रयोर्मृतिः॥१॥ उपरागस्थः शनि बुध युतो केलिग्नेऽभौमोऽष्टमश्च तदा
मातृ सुतयोः शस्त्रेण मृतिः॥२॥ बालेवद्भिर्वैरयुतं तदृष्टो रवि रिंदुर्वा लग्नगः पापाः त्रिकोण

ह्र॰ म॰ भाष्यं॥

हमगास्तदापिमृतिः॥३॥६॥ रिष्टांतरमौपच्छंदसेके नाह॥ अस्तितेति॥ शनिरविचंद्रभौमाः
५ क्रमात् द्वादशनवमलग्नाष्टमगाः बलवद्गुरुणा न दृष्टाश्चेत्तदा मृतिः॥ यदा तेषां मध्ये
श्चिद्बली गुरुः पश्यति तदा श्रिन्न॥ अबलो वाप्यवीन्यः पश्यति तदा चिरेण मृतिः॥ अथादि व
भारि पंचमो बली गुरुर्यदा सर्वानीक्षते तदा रिष्टाभाव॥१०॥ ॥रिष्टांतरं पुष्पिताग्रयाह॥ मु
तेति॥ यदा पापयुतः क्षीणचंद्रः पंचमसप्तमनवमद्वादशलग्नाष्टमान्यतमस्थो बलिनो
पितबुधजीवान्यतमेन युत दृष्टश्च तदा मृतिः॥ अथ तिक्ष्णतदृष्टे रिष्टाभावः॥११॥ ॥
अनुक्रमरणकालानां रिष्टयोगानां कालज्ञानं च मरविलाप्रितेनाह॥ ॥योग इति॥ यत्र
योगे कालो नोक्तस्तत्र योगकारये यहास्तेषां यो बलीस्य यद्राशौ स्थितो जन्मनि सराशिर्व
तिनं स्थाने॥ जन्मनि चंद्रो यद्राशौ स्य स्वस्थाने॥ तनुर्लग्नं॥ पापदृष्टो बलवांश्चंद्रो यदब्दमध्ये
चारवशादुक्तस्थानान्तरस्थानं प्राप्नोति तदा मारयति॥ वर्षेणातिक्रमतीत्यर्थः॥ ॥१२॥ इति
महीधरकृते जातकविवरणे रिष्टयोगाध्यायं षष्ठः॥ ॥अथायुर्दायाध्याय उच्यते॥ तत्र सर्वो
कारिहाहानस्यायुर्दायः कार्यः॥ आदौ मयादिमतेन रव्यादीनां परमायुः प्रमाणं पुष्पिताग्र
याह॥ ॥मयेति॥ स्वोच्चस्थेषु रव्यादिषु दशयुतानवादयो ऽष्टामयययवनमणित्थपराशरा ॥२०॥

द्यैकक्वाः॥ तथा हि॥ परमोच्चगरवेः परमायुः प्रमाणमेकोनविंशतिवर्षाणि॥ एवमन्येपि॥ चंद्र
स्य पंचविंशतिः॥२॥ भौमस्य पंचदश३॥ बुधस्य द्वादश४ गुरोः पंचदश५ शुक्रस्यैकविंशतिः
६॥ शनेर्विंशतिः७ अंकतोपि॥१९।२५।१५।१२।१५।२१।२०। मिलित्वा सप्तविंशत्युत्तरश
तं जातं॥ अवशिष्टगणनावदायुर्ददतीत्यर्थः॥१॥ उच्चान्यगोप्यरेषु सर्वोक्ता युषो ऽंश
मंदाक्रांतयाह॥ ॥नीचइति॥ परमनीचस्थेष्वरेषु सर्वोक्तादर्द्धं दीयते॥ तद्यथा॥ मा
येरुच्यते॥ रवेश्चतुर्दशाधिकं शतं११४ मासाः चंद्रस्य सार्द्धशतं१५० भौमस्य नवतिः ९०॥
बुधस्य द्वासप्ततिः॥७२॥ गुरोर्नवतिः ९०॥ शुक्रस्य द्विंशत्याधिकं शतं १२६॥ शनेर्विंशत्य
धिकं शतं १२०॥ परमनीचास्थानां ग्रहाणां सिद्धं परमायुः॥ उच्चनीचमध्यवर्तिनामायु
रंतरस्थेनीचोच्चमध्यवर्तिनि खगे नीतोनीचोच्चादिनुपातः कार्यः॥ त्रैरा
राह॥ इतर इति॥ अंतरस्थे नीचोच्चमध्यवर्तिनि खगे नीतोनीचोच्चादिनुपातः कार्यः॥ त्रैरा
शिकविधिर्विधेयः॥ अचलीलावत्या मुक्तं॥ प्रमाणमिच्छा च समानजाती आद्यंतयोस्त
त्फलमन्यजाति॥ मध्ये तदिच्छाहतमाद्यहृत्स्यादिच्छाफलं व्यस्तविधिर्विलोमे॥ इति॥ त
थाहि॥ यदि नगणाद्धलिप्ता निरवर्णाहिदिकृसंख्या निरेता नि:१०८०० इष्टान्यदपरम
नीचं मासाः लभ्यते तेन तानरुत्कि लिप्ताभिः कियंत इति तथा ग्रहदुक्तलिप्ताग्रहपरं
मनीच मास्यैः अंशुपन्नगणोद्धलिप्ता विनि ज्यावाह्यमासाः॥ मासप्रश
॥ ॥ स्वोच्च शुद्धो ग्रहः शोध्या षड् राशयः तनोभमंडलात् स्वपिंडगुणितो
रुक्तो भादिमानेन भक्तोरा॥ इति मासावली॥

हो॰र॰म॰नाथं।

१

आयु

षट्त्रिंशता संगुण्य प्राग्वद्भिन्नज्यावाप्तं दिवसाः॥ दिनशेषं षष्ट्या संगुण्य प्राग्वद्भिन्नज्यावाप्तं
घट्यः॥ घटीशेषं षष्ट्या संगुण्य प्राग्वद्भिन्नज्यावाप्तं पलानि॥ एवं मासादिफलैः कालयानेय
॥ मासानां द्वादशभिर्भागमित्यल्पावाप्तं वर्षाणि शेषं मासाः एव॥ एवमागतं वर्षाद्यायुः॥
परमोच्चायुर्विशेषोः शोध्यं शिष्टं वर्षाद्यायुर्ग्रहेण दत्तं ज्ञेयं॥ एवं सर्वेषां कार्यं॥ एवमुच्चा
द्विच्युतस्य नीचभगणस्य कार्यं॥ अथ नीचाद्विच्युतस्योच्चभगणस्य प्राग्वत्कालमानाय
तस्यैव ग्रहस्य परमनीचायुषि संयोजयेत्॥ एवं ग्रहस्यायुः कालो वर्षादिर्भवति॥ लग्नायु
र्दायमाह॥ होरेति॥ लग्ने स्वचतुष्कनवांशतुल्यानि वर्षाणि दत्ते॥ तल्लति [illegible]॥ यथा॥ लग्ने
स्य राशीन्परित्यज्यांशादिलिप्तापिंडं कृत्वा शतद्वयेन विभज्यावाप्तं भुक्तनवांशास्तावंति वर्षा
णि॥ शिष्टस्य त्रैराशिकं कृत्वा मासाद्यायुरानेयं॥ यथा॥ यदि लिप्ताशतद्वयेन द्वादशमासा
लभ्यंते तदाऽवशिष्टलिप्ताभिः कियंत इति॥ ततोऽवशिष्टलिप्ता द्वादशभिः संगुण्य प्रा
क्शतद्वयेन विभज्यावाप्तं मासास्ते वर्षाद्यधः स्थाप्याः। मासशेषं त्रिंशता संगुण्य प्राग्वद्भि
न्नज्यावाप्तं दिवसा दिवसास्ते मासाद्यधः स्थाप्याः॥ दिनशेषं षष्ट्या संगुण्य प्राग्वद्भिन्न ॥२१॥
ज्यावाप्तं घट्यस्ता दिनाधः स्थाप्याः घटीशेषं षष्ट्या संगुण्य प्राग्वद्भिन्नज्यावाप्तं पलानि

घट्यधः स्थाप्यानि॥ एवं लग्नायुर्दायः॥ अपरे आचार्याः राशितुल्यं लग्नायुर्वदंति॥ लग्ने
न यावंतो राशयो भुक्तास्तावंतोऽब्दा लग्नायुः॥ लग्नस्य भुक्तराश्यादिकं लिप्तीकृत्य त्रैराशि
केन मासाद्यानेयं॥ तदुक्तं॥ लग्नराशिसमाश्चाब्दा मासाद्यमनुपाततः॥ यावद्भवेत्तदा कालं
वर्षाद्यं लग्नजीवितमिति॥ तद्यथा॥ यद्यष्टादशभिर्लिप्ताशतैर्द्वादशमासा लभ्यंते तदेता
भिर्लग्नभुक्तलिप्ताभिः कियंत इति॥ प्राग्वद्वर्षाद्यो मासादिः स्थाप्यः॥ इदं मतं साधु॥ अन्ये व
दंति लग्नांशपतेर्बलिष्ठस्यांशतुल्यं राश्यादिबलिनो राशितुल्यं लग्नायुरिति॥ तदुक्तं॥ लग्नदा
योंऽशतुल्यः स्यादंतरे चानुपाततः॥ तत्पतौ बलसंयुक्ते राशितुल्यं तु नाधिप इति॥ हिल्लोति
क्रूरादयो ग्रहाः यदि व्ययाद्यग्रहगाः संतो वक्रगतयो न स्युस्तदा स्वदत्तायुषः सर्वार्धतीयभागं हरंति।
शुभक्रूरा नीचविनाऽस्तंगता ग्रहाः स्वदत्तायुरर्धं हरंति॥ हानिद्वये प्राप्ते याऽधिका सैव कार्या॥
तत्र चक्रार्धहानिः कार्येति भावः॥२॥ चक्रपातवशाद्दास्तु हानिं प्रदर्शितपाह॥ ॥सर्वार्ध
ति॥ व्ययादिलोमं व्ययादिस्थानेषु पापयुतेषु सर्वादीनि क्रियते॥ साधुभूतदृष्टं॥ तथा हि॥
द्वादशगः पापः सर्वं स्वं मायुर्हरति॥ एकादशगोऽर्द्धं। दशमगः त्रिभागं। नवमश्चतुर्थभागं। ग
अष्टमः पंचांशं। सप्तमः षष्ठांशं। द्वादशः सौम्यः स्वार्द्धं हरति। अत्र यदा स्वसाविद्याः संतोप्य

१ आयु०

द्या मनु लीलो हौर्बुधस्य च क्रूराद्वितस्य क्रूरत्वं। एकादशस्य तु पंचत्रिंशं। दशमः षष्ठांशं। नवमो ऽष्टमभागं॥ अष्टमो द्वादशांशं॥ सप्तमो द्वादशांशमिति॥ यदैकस्थाने बहवो वा तदा यो बली स एव स्वांशो हरति नान्ये॥ एवं हर्वो क्रमः सत्याचार्यमतं॥ २॥ लग्नाश्रितपापवशाद् आयुर्हानिं कृत्स्नं न तिलकेनाह॥ ॥ आर्द्धोदितेनेति॥ रविकुजशनीनामन्यतमे लग्नगे सति एवं कार्यं। अर्द्धेनान्वयवेन सहितादुदितस्य लग्नस्य येऽनुदिता नवांशास्ते गुणितं यस्य वमायुस्तद् अष्टोत्तरशतेन हत्वा यद् लब्धं वर्षादितद्दल द्वा ऽयुषोऽपनेयं॥ लग्ने क्रूरे सौम्यदृष्टे ऽनेनैव विधिना यल्लब्धं तद् ईशरद् दत्तायुषोऽपनेयं॥ एवं सर्वग्रहदत्तायुषोऽपनीते स्फुटमायुर्भवति॥ लग्ने पापशनेनायं विधिः॥ यदा उदिताश्च ते नवांशाश्च उदितनवांशाः षष्ठो ऽर्द्धोदितेन नवांशेन वर्तते इति सार्द्धोदिताः सार्द्धोदिताश्च ते उदितनवांशाश्च सार्द्धोदितोदितनवांशाः॥ अयमर्थः तात्कालिकस्फुटलग्नं लिप्तापिंडीकृत्य शतद्वयेन विभज्य लब्धा तस्मिन्काले नवक्रूस्यतावंतो नवांशा उदिताः शेषमर्द्धोदितनवांशः। ते सार्द्धोदितोदितनवांशा अष्टोत्तरशतेन गुणितानां ग्रहायुःपिंडं संगुण्य पाष्टोत्तरशतेन भाजयेत्। लब्धं तद्वर्षादित लोऽपनेयं॥ सौम्यदृष्टे लग्ने ऽनेनैव विधिना यल्लब्धं तदर्द्धमायुःपिंडादपनेयं॥ प्रथमं वा स्वान्यपक्षे तात्कालिकेन ॥२२॥

लग्नेन येऽनुक्तनवांशास्ते ऽर्द्धोदितनवांशेन सहस्याद्याः॥ अयमर्थः। तात्कालिकस्य लग्नस्य राशीन् पास्य भागादि लिप्तापिंडीकृत्य शतद्वयेन भागमपहृत्य वा शेषो उदितांशास्तैः प्राग्वत्कार्यं॥ एतत्स्थूलं॥ सूक्ष्मं तु लग्नांशादि लिप्तीकृत्य प्रत्येकं तानि ग्रहायुर्दायं संगुण्य षट्शतैर्भागं हृत्वा षडुपरि योजयेत्॥ वर्षस्थाने राशिचक्रलिप्ताभिः षट्कलोत्तरैकविंशतिसहस्रसंख्याभिरपहृत्या वा शेषं वर्षादिस्वायुषोऽपनयेत्॥ तदुक्तं॥ लग्नांशलिप्तिका हत्वा प्रत्येकं विहगायुषा॥ भाज्या मंडललिप्ताभिर्लब्धं वर्षादि शोधयेत्॥ स्वायुषो लग्नगे क्रूरे सौम्यदृष्टे तु नद्दलमिति॥ क्षीणचंद्रोत्र पापेषु नगण्यः॥ तदुक्तं॥ स्वर्यंगिरश्शनीनामेकस्मिन्लग्नगे भवति हानिः॥ विधिनानेन सौम्ये क्षिले दले पातये दत्र द्यादिति॥ ॥ नरायुर्मनिंशि खरिलपाः॥ ॥ समइति॥ घा पंचाशाधिकं सविंशतिशतानृनरगजायुः॥ द्वात्रिंशाद्वमश्वानां। पंचविंशति खरोष्ट्रयोः॥ चतुर्विंशति गोमिहिषयोः॥ द्वौ द्वादशाश्व सिंहमार्जारादिनां। रविनो। श्वोपलक्षणं। बोडशालं छागाविमृगाणां परमायुः इदमश्वाद्यायुर्ज्ञानार्थं॥ तथाहि॥ अश्वादेः पुरुषवदायुरानीय त्रैराशिकं कार्यं॥ यदि विंशतिशतनरायुष इदमायुस्तदा द्वात्रिंशदायुषो ऽश्वस्य किमिति॥ ५॥ ॥ परमायुर्योगिं पुष्पितायया ह॥ ॥ अनमिषेति॥ यदि मीनलग्ने नवमनवांशस्थे॥ द्वषगोऽत्र

स्फु॰ म॰ भाष्यं

थं पंचविंशतिकलाभागी॥ अन्येपरमोच्चांशस्थग्रहपरमायुः॥ तद्यथा।
एवं योगे परमायुः॥६॥ मयादिमते न्ययमतिं शालिन्याह॥ ॥आ
युर्दायमिति॥ सर्वोक्तमायुर्न केवलं मयादिमते विष्णुगुप्तदेवस्वा

र	चं	मं	बु	बृ	शु	श	ल
०	१	६	१	३	११	६	११
६	२	२७	०	४	२६	१९	२६
०	०	०	२४	०	०	०	[illegible]

१ मिसिद्धसेनानामपि॥ परं तेषामयं दोषः॥ अहांहृरिष्टं त्यक्त्वा विंशतेरर्थस्तोर्वा मृतिर्नीयाऽलि॥
आयु अयमर्थः॥ येषां रिष्टं चाष्टाष्टमध्ये उक्तं नास्ति। तदूर्द्ध्वं विंशतेरधो म्रियमाणा दृष्टं पं ते तदायु
रनेन नागच्छतीति दोषः॥७॥ दूषणांतरं शालिन्याह॥ यस्मिन्निति॥ अनिमिषपरमांश
केद्वित्यादियोगे द्वात्रिंशदुक्तं तन्नान्येष्वक्कवर्तित्वमुक्तं॥ षड्ग्रहाणामुच्चत्वात्॥ तदुक्तं॥ षड्भिः स्या
च्चक्रवर्ती त्रिभुवनमखिलं शास्त्यसौ वैर्यदेहैरिति॥ एवं सति षड्ग्रहाः यावत्परमोच्चांशस्थ
स्तावत्परमायुर्न॥ षड्ग्रहेषु चक्रवर्तिनो नाभाव्यं॥ किंच॥ दरिद्रा अपि परमायुषो दृश्यं
ते॥ तस्मादयं परो दोषः॥८॥ जीवशर्मभिर्न्यमते आयुरौपच्छंदसिकेनाह॥ ॥स्वमतेने
ति॥ जीवशर्मा परमायुषः पंचाशदधिकं विंशतिशतात्मकस्य सप्तमभागं प्रत्येकस्य
ग्रहस्यायुर्दायमाह॥ परमायुः॥१२०।५॥ अत्र ग्रहैः सप्तभिर्भक्ते ऽब्दा सं वर्षादि॥१७।१।२२।३०।२४॥ य
थामयाद्यैः परमोच्चगानां रव्यादीनां नवतिथ्यादिवर्षाणि पठितानि तथैतानि परमायुः स्व ॥२३॥

रांशा वर्षाणि पेकैकस्य जीवशर्मणोक्तानि। नाचेऽतो ह्रीं मिति त्रापि स्यात्॥ अर्द्धचेतत्॥ ता१
।२६।४।१७॥ एतान्यब्दादीनि परमनीचगस्यैकैकस्य॥ मध्यत्रैराशिकेनैकैकस्य ग्रहस्यायु
र्दायः कार्यः॥ अत्रापि चक्रविनाशांकुद्वैत्रग्रस्य त्र्यंशापहारः॥ अक्रूराणि विना स्त्रंगतस्याद्धहा
निः॥ सर्वार्द्धत्रीत्यादिना चक्रपातहानिः॥ क्रूरे विलग्न अद्दिलेइत्यपि सर्वं सर्वमतं॥ तथा
च जीवशर्मा॥ सहादशो कांहियमौ वस्व वोवेदाग्नयो यहेशाणां॥ वर्षांकुश स्थानामुतोऽर्द्धसा
तु॥ मध्ये ऽनुपाततः स्यात्॥ इय नं त्रोष मत्र य। किंचित्॥ पिंडायुर्वत्कार्यं तत्सर्वं गणित
तत्वज्ञैरिति॥ मतांतरमाह॥ ग्रहेति। ग्रहेण यत्रतत्रस्थेन भुक्तो यो नवांशराशि तत्तुल्यं व
र्षाद्यायुर्ददातीति॥ एतदुक्तं॥ मेषादेराशेरन्यां वेनोराशानां संबंधिनो नवांशा भुक्ता स्ता
वंति वर्षाणि ग्रहो ददाति॥ अयमर्थः॥ यत्र तत्र राशौ मेषांशस्थो ग्रहो वर्षमेकं ददाति
।वृषनवांशस्थो द्वे॥ एवमुत्तरोत्तरांशवृद्ध्या वर्षवृद्धिर्यावन्मीनं तत्र द्वादशेति॥ येन या
वंतो नवांशा भुक्ता स्तावंत्येव वर्षाणि प्रददातीत्यन्ये॥ तदसत्॥ राशिपदर्वे यथ्यात्॥
सत्याचार्यस्य दंवाक्यं वक्रभिः स्याख्येयानि॥२॥ एतदनुसारेणाचार्य आयुर्दायमा
र्याह॥ सत्योक्त इति॥ सत्यमतायुर्दायकरणे तात्कालिकं ग्रहं मेषाद्या राश्यराशपादि

७ आयु

कालिक्षास्फुटं कृत्वा शतद्वयेन विभज्याप्तं वर्षाण्येव स्थाप्यं। शेषस्य द्वादशत्रिंशगमप हृ
त्या यान्यं तत्रैव शिष्टमकास्तु॥ तावंति वर्षाणि तेन दत्तानि॥ शेषात्कस्थापितयः स्पष्टां
तस्मात् द्वादशगुणितात् तेनैव छेदेन विभक्तात् मासाः लभ्यंते॥ तच्छेषात् त्रिंशद्गुणि
तात् छेदहृतात् दिनानि॥ तच्छेषात् षष्टिगुणितात् छेदहृतात् घटिकाः॥ तत्छेषात्
षष्टिगुणितात् छेदहृतात् पलानि॥ एवमायुःस्पष्टं भवंति॥ उदाहरणं॥ तात्कालिको
ग्रहः॥१।१५।०।ता द्विकलाः २३२५। अत्र शतद्वयेन हृतेऽवाप्तं ११॥ शिष्टं १२५। अस्य द्वा
दशभागा यो ग्रहाद्वादशाप्ताः १२। त्रिंशत् १२५। द्वादशगुणितं १५०० शतद्वयेन हृतेऽ
वाप्तं ७ अष्टमासाः। मासशेषं १००॥ त्रिंशद्गुणं ३००० शतद्वयहृतं मासे १५ दिनानि तच्छेषा
भावः। एवमागतं वर्षादि॥११।७।१५।०।१०॥ तस्यायुषः कर्मनिशेषं त्वंशं स्थे नाड्य
स्वतुंगेति॥ स्वोच्चगे चक्रगतौ च ग्रहे सर्वदत्तायुस्त्रिगुणं कार्यं॥ वर्गोत्तमगे स्वनवांशगे
स्वराशिगे स्वद्रेष्काणगे ग्रहे दत्तमायुर्द्विगुणं कार्यं॥ तदंतेन अत्याचार्यमतोक्तेनता वा८
। त्रिगुणा द्विगुणोत्तम को विशेषः। अन्यत् हित्वा वक्रं स्वतुंग स्थं शंहरति॥ भुक्तशानां वि
नाशमिनोऽर्द्धं॥ अवर्द्धिस्त्रीत्या। द्विसर्वे च कं अत्रापि तुल्ये॥१२॥ लग्नायुर्दयमिं रवज्रया ॥२७॥

अस्तोक्तेयदमिष्टं लिखीत्वतेति लग्नायुर्दायः कर्त्तव्य॥ ८

हा॥ ॥किंत्विति॥ ॥अत्र अल्पोक्ते आयुर्दाये लग्नं राश्यंशतुल्यमायुर्दत्ते॥ लग्नेन या
वत्संख्यस्य मेषादिराशेः अंशाः धीनि चांशोक्तेस्तावंति वर्षाणि लग्नायुर्दायुः। लोप
नवांशात्रैराशिकेन मासाद्यानेयं अयमर्थः॥ भागान् लिप्ती कृत्य द्वादशभिः अंगुण
द्वादशरातैर्विभज्याप्तं मासाः॥ शेषं त्रिंशता अंगुण्य तेन छेदेन हृत्वाऽवाप्तं दिनानि
॥शेषषष्ट्या अंगुण्य तथैव घटिकाः॥ पुनरपि तथैव पलानि॥ एवं लग्नायुर्दीयमाध्यः
वीर्येति॥ होरास्वामिगुरुबुधवीक्षितयुते लग्नस्यायेन बलवती होरा लग्नं राशितुल्या
नि वर्षाणि ददाति॥ अधिकानि॥ किंच॥ क्रूरोदये लग्नगे क्रूरे आढ्य हितो दिलनवांशोति
न्यायेन योऽपचयः अस्मत्य मतायुर्दायेन कार्यः॥ किंच। काकर्य इति॥ हवेत्किं वर्षे निवृत्ति
धि विषयेत्यादि नामयादि मतोक्ते॥ ग्रहदायं परमायुषः स्वरांशमिति जीवशर्मोक्ते
श्वयोऽपचयः सोपि मत्यमतेन कार्यः। ग्रहमिष्टां लिखीत्वा त्येत्याद्येव कार्यमित्यर्थः॥
॥१२॥ सत्यमतश्चैद्युमिं रवज्रया हा॥ सत्येति॥ मतत्रयेपि सत्याचार्यमतं श्रेष्ठं॥ किं
तु॥ तत्र बहुगुणानामिरयुक्तं कुर्वंति॥ अनर्थयंतीत्यर्थः॥ स्वतुंगवक्रोपगते त्रिगुण
मिति यदि स्वतुंगे वक्र श्वरवगस्तदा वारद्वयं त्रिगुणयेति। यदा च स्वट्टेष्काणे स्वर

हाइ-म-नाप्य॥

क्रा गेलदा वारत्रयं द्विगुणयेत्॥ वर्गोत्तमे वक्रे च तदा द्विगुणे कृत्स्न त्रिगुणयंति॥
एवमन्यदप्याहुरत्याऊवंति तदयुक्तमित्यर्थः॥ तर्हि किं कार्यमित आह॥ आचार्यकमि
पु ति॥ स्वत्याचार्यमतं त्वेवं॥ वक्रघ्नतायां वक्रवारगुणनायां प्राप्तायां एकं यद्भूतं दे
आयु वक्तव्यं॥ वक्रवारं यत्र द्विगुणं प्राप्तं तत्रैकवारमेव कार्यं॥ एवं द्विगुणत्रिगुणत्वे
त्रिगुणमेव कार्यं॥ तदुक्तं॥ द्वित्रिगुणत्वे सकृत्त्रिगुणमिति॥ वक्रवर्गोत्तमाप्यायेनैत
मपि कार्यं॥ शत्रुक्षेत्रस्थो नीचस्थश्च यदास्तंगतश्च तदा सकृदेव हानिः कार्या॥
चक्रपातं विहाय॥ अयमर्थः॥ सर्वार्धमित्यादिना व्ययादिस्थे ग्रहे चक्रपातहानिं
कृत्वा ततः शत्रुक्षेत्रस्थादिहानिः सकृदेव कार्या॥ गुणनाप्येवं॥ एवं सत्यमतायुः
स्य हं भवति॥ अत्र यद्यपि सत्यमतायुः प्रमाणोक्तं तथापि लग्ने बलवत्यंशायुः कार्यं॥
सूर्ये पिंडायुः॥ चंद्रे निसर्गायुः॥ तदुक्तं॥ विलग्नेति बलोपेते भ्रमहृष्टं शास्त्रभवं॥ र
वौ पिंडोद्भवं कुर्याच्छशिरे त्वायुर्निसर्गजमिति॥ नैसर्गिकं च स्फुटति॥ शकमित्यादि॥ १३॥
डमातं अमितायुः पुष्टितास्ययाः॥ गुरुशशीति॥ कर्कलग्ने गुरुचंद्रयुते बुधशुक्रौ केंद्रगौ शेषा ॥२५॥
शेषार विकुजशनयाय थामं भवं लाभा ११ रि ६ सहज ३ गाः स्फुरत्तदा क्रमात् विनागा तिं

वित्रैवापरिमितायुर्ज्ञेयं॥ १४॥ इति श्रीमहीधरकृते जातकविवरणे आयुर्दायाध्यायः सप्त
मः॥ ७॥ ॥ अथ दशांतर्दशाध्यायः॥ तत्र ज्ञातायुषः पुंसः सुखदुःखे वेये॥ तत्र दशा प्र
हाः स्वदशायां येन यावदायुर्दत्तं तस्य तावती दशा॥ तत्क्रमं ज्ञातुं मालिन्याह॥ उदयेति॥
लग्नार्कचंद्राणां यो बली तद्दशा प्रथमा॥ तस्मात्केंद्रपणफरापोक्लिमस्थानां बलवतां
हाणां क्रमाद्दशा आद्यमध्यांतवयःसु फलदाः॥ अयमर्थः॥ लग्नार्कचंद्राणां मध्ये यो ब
लीतद्दशामादौ परिकल्प्य तस्य ये केंद्रस्थास्तेषां चायेपि चयक्रमेण दशाः कल्प्याः॥ आद्य
प्रथमवयसि फलदाः॥ ततः प्रथमदशापतेर्ये पणफरगास्तेषां दशाः॥ आ मध्यव
यसि फलदाः॥ ततः प्रथमदशापतेर्ये आपोक्लिमगास्तेषां दशाः ते वयस्यंते फलदाः॥ तदुक्तं॥
स्तवैस्तु केंद्रोपगाः ताः फलानि मध्ये वयः पणफरं निविष्टाः॥ आपोक्लिमस्थाः फलदा वयो
त्ये यथा बलं स्वं समुपैति सर्वमिति॥ केंद्रस्था ग्रहा आवेषु प्रथमादौ वयसि फलदातेष
न आह॥ नाहीति॥ केंद्रपणफरगाभावे आपोक्लिमगा अपि सर्वे वयसि फलं दद्युरेव
॥ अयमर्थः॥ केंद्रगाभावे पणफरस्थाः सर्वफलदाः॥ तत आपोक्लिमगाः॥ केंद्रपणफर
गाभावे आपोक्लिमगा एव फलदाः॥ एवं केंद्रापोक्लिमगाभावे पणफरगा एव सर्वत्र फल
दाः॥ पणफरापोक्लिमगाभावे केंद्रगा एव फलदाः॥ केंद्रादित्रयेष्वप्यनेकग्रहास्तेषामेव बलिक्रमे

एकदशाकल्पेत्यर्थः॥ तदुक्तं॥ लग्नार्कशशांकानां यो बलवांस्तद्दशाद्यवे त्प्रथमा॥ तस्मा
त्केंद्रपणफरापोक्लिमगानां बलात्क्रेषा इति॥१॥ दशामानेत्क्रमज्ञाने चैरवज्रयाह॥ आ
युरिति॥ शोध्यक्षेप विशुद्धं हर्षौ किमायुर्येन यावद्दत्तं तस्य ताच तद्दशा ज्ञेया॥ तत्र बलि
नो दशाद्या॥ अयमर्थः॥ लग्नार्कचंद्राणां बलिनो दशामाद्यौक्तत्वात त्केंद्रगानां मध्या बलिनो
दशा॥ ततस्तद्दून बलस्य॥ एवं बलवत्क्रमेण दशा॥ ततस्तत्पणफरगानां बलितक्रमेण पाव॥
ततस्तदापोक्लिमगानामेवमिति॥ या म्य इति॥ केंद्रादिकगानां बलसाम्ये यो बहुकाद्यु
र्दस्तस्य दशाद्या॥ नन्वयुक्तमिदं॥ अन्यबलसाम्येपि नैसर्गिकेन बलेनाधिको स्यादेव॥
यस्यं किंतु॥ स्थानादिकं चेष्टाकालयद्देत्राण दिबलान्येका कृत्पताव ह्वलसाम्यं॥ परं यदा
नामि र्बलत्रययुतः॥ ऊर्जो बलद्वयेन। तदानयोर्बलि साम्यं नवस्येव॥ एवं सर्वे बांज्ञेयं
तेषामिति॥ वर्षाणां साम्ये घधर्मयोरवेकादितो विच्युलस्तस्य॥ तदुक्तं॥ बलीलग्नेंद्वस्त्र
यस्तेषां दशा माद्यां प्रयच्छति॥ तस्मात्ततः प्रयच्छति केंद्रादिस्थाः क्रमेण तु॥ १॥ तत्रापि ब
लिनः स्युर्वर्तित्साम्ये वक्रुद्रायदः॥ तत्साम्ये प्रयच्छंति येहर्वेंराविविच्युताइति॥२॥ ॥२॥
एवं दशाद्यौज्ञाता यीमंतर्दशां वक्ष्यते। तत्रिलकेनाह॥ ॥ एकर्क्षगइति॥ दशापतिनात्रदेकरा ॥२६॥

त्रिस्थोग्रहो दशापतिदत्तां तद्दशा॥ कालस्य यदर्द्धं तदप हृत्य स्वे स्वदशानुसारि फलं वस्यमा
णं पाचयति ददातीत्यर्थः॥ दशापतेः पंचमनवमगो दशापतिदत्तां तद्दशा॥ कालचतुर्थभाग
मपहृत्य स्वं फलं ददाति॥ दशापतेः सप्तमगः तत्सप्तमांशं हृत्वा स्वं ददाति॥ दशापतेरष्टमच
तुर्थगो दशापतिदत्तां तद्दशा॥ कालाच्चतुर्थांशं हृत्वा स्वं ददाति॥ एवं लग्नसहिताः स्वांशं पाच
यंति॥ लग्नमपि॥ अयमर्थः॥ दशापतेरेकर्क्षत्रिकोणादिगग्रहो यथार्द्धादिकमंशं पाचयति
एवं लग्नमपि तत्तत्स्थानगतमुक्तं तत्तदंशं पाचयतीति॥ किंच॥ लग्नस्य यत्रांशदशारिष्टं
आहंतलग्नेच ग्रहोस्ति तदा लग्नगद्दयो बली स एवैकः स्वांशं हरतीति भावः॥ यदैकस्मिन् बह
वो जवंति तदैकराव ददातीति यो बली एकवचनात्॥ तदुक्तं॥ एकर्क्षेर्द्धं स्थितास्त्र्यादि त्रिभागे तुरी
को णगः॥ सप्तमः स्थः सप्तमभागे पादं तु चतुरस्रगः॥ लग्नेन सहिताः सर्वे स्वस्यांशं पाचयंतीहा
ति॥ मयोपि॥ एकर्क्षोपगतानां योत्र वर्तिबलाधिको विशेषेण॥ एकः स्यात्वस्तनिस्येतत्रास्थि
ता विहगाइति॥३॥ अंतर्दशाकल्पनाज्ञानमुपजात्याह॥ ॥स्थाना नीति॥ अर्द्धादिभागाः स्था
नत्रादेनो च्यते॥ तेषामर्द्धादिकानां भागानां सवर्णता कार्या॥ सवर्णिताश्रमान्छेदतः॥ याच
॥ अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवमिति भास्करोक्त्या॥ एवं छेदानां

आ हरणमुत्पाद्य अवर्तस्थाना न्यधः स्थैर्यमुद्दिष्टानि कार्याणि॥ छेदा अपस्याइत्यर्थः॥
८ उपरिगताराशयो दशा पिंडे दशावर्षादि यन्मूहे यथांशं अल्पेशं गुणकाभवंति॥ तदे
दशांत केन ते यो राशी नामे येना न्योन्य मंयोगेन छेदो भागहारो भवंति॥ एवं दशाभ्रमे दो
लर्दशात्रे दोझेयः॥ अयमर्थः॥ दशा शान् हारकगुणकारे अंगुल्प छेदेन विभाज्या वा
से वर्षाद्यं लर्दशाभवति॥ उदाहरणं॥ दशापतिना सह केवल के श्वि कूरोस्ति॥ नान्यत्र तद
भावाप हारी॥ तत्र दशापते रूपस्यैकस्या थो रूप मेकं स्यये त्॥ एवमर्द्ध इत्यस्य रूपस्या थो
रूपद्वयं। न्यासः (१/१) (१/२) परस्पर छेदगुणवेतो सम छेदो जातो॥ (२/१) (१/२) छेदेन हीनावेतो (२/१)
गुणको॥ तयो योगः॥ ३॥ एषभागहारः। तत्र दशापतिदत्ताद्वर्षादि वर्षादि ३।०।०।०।०
तद्भागं अंगुलापत्रि त्रिविभज्या वा सं फलं। २।०।०।०। इयं मूलदशापते रंतर्दशा॥ पुनर्मूलद
शापते वर्षाणि॥ ३॥ एकेन अंगुलपत्रि त्रिविभज्या वा सं १।०।०।०। इयं दशापति ना सहैकरा
शीगतस्यांतर्दशा॥ एवं मूलदशापतिदत्तांतर्दशा फलस्यार्द्धमेक स्थेनापाचितं॥ एवं
त्रिंशादिपाकआनेयः॥ एवमंतर्दशा कालद्वय योगेजातान्य एव दशा॥ एकाविक
ल्पो नास्ति द्विविकल्पाश्चत्वारः। त्रिविकल्पा अष्टौ। चतुर्विकल्पा दश। पंचविकल्पा अष्टौ॥ षष् ॥२७॥

ड्विकल्पाश्चत्वारः। सप्तविकल्प एकः। एवं पंचत्रिंशद्विकल्पो अत्रायं दशाक्रमो बोध्यः। मूलद
शापतेरंतर्दशादौ॥ ततः य एव दशाक्रमः स एवांतर्दशाक्रमः॥ यत्तु मूलदशापतेरादौ॥ तत
एवं लग्नस्य। तत त्रिकोणगस्य॥ ततश्चतुरस्त्रगस्य। ततः सप्तमगस्य॥ एवं भागहारक्राम
क्रमेण निकेचिद्वदंति तद्युक्तं॥ यत आदौ मूलदशापतेरंतर्दशा॥ ततो य एव य एव दशा
विभागक्रमः स एवांतर्दशाक्रमः॥ दशाक्रमपाचके यस्यांतर्दशापाचकत्वेन शासंतस्य नव
कव्ये॥ तदनंतरं यस्य प्रासंतस्यैव वाच्यं॥ तस्माद्दशाक्रमगता एवांतर्दशायां विद्यमानाय्या
द्या इत्यर्थः॥ तदुक्तं॥ आदावंतर्दशापाको भवत्येव दशापतेः॥ ततः परं भवक्रव्यं दशापाक
क्रमेण त्विति॥ एवं दशांतर्दशाज्ञाने नान्योन्य [illegible] फलं ज्ञानाय फलानुरूपाः संज्ञा वेला
लीयेनाह॥ ॥ सम्यगिति॥ प्रस्तौ जन्मकाले योग्रहः सर्वो कम्य वबलयुतस्तस्य दशा
य सम्यक्संज्ञ परमोच्चगतस्यापि संसर्वैव॥ सा स्वकालधनबलारोग्यादि निर्भरं वृद्धते॥ न
किं तिनमुक्तो चंवदन्येतल्लझापयति॥ परमोच्चगस्यापि बलहानस्यापि दशा संसर्वैव॥
चेद्धनबलस्य तु हास्ति॥ अपरमोच्चगस्यापि॥ तद्दशा या मंतर्दशा या च धनाभिः। नत्वारोग्यं॥
बलहीनस्य ग्रहस्य रिक्ता नाम दशा॥ नीचराशौ नीचनवांशगतस्यापि दशा अरिक्तेव। धन

६ दशा॰

नाशनी। परमनीचगतस्य शत्रुनवांशस्थितस्य च परमनीचगतस्यापि दशा रिक्तैव धन
नाशनी॥ नीचराशिनवांशगतस्य शत्रुनवांशस्थितस्य च दशा। निष्फला। धनहा। निरोग
दा॥ तदुक्तं॥ सर्वैर्बलैः स्वरूपे तस्य परमोच्चगतस्य च। संपूर्णाख्या दशा ज्ञेया धनारोग्यवि
वर्द्धिनी॥१॥ स्वोच्चराशिगतस्याथ किंचिद्बलयुतस्य च॥ पूर्णा नाम दशा ज्ञेया धनवृद्धिक
राशुभा॥२॥ सर्वैर्बलैर्विहीनस्य नीचराशिगतस्य च॥ रिक्ता नाम दशा ज्ञेया धननाशस्य
कारिणी॥३॥ यस्यात्परमनीचस्थस्तथा वैरिनवांशके॥ तस्या निष्फलनाम्नी दशा नि
त्यविवर्द्धिनी॥४॥ इति॥५॥ दशायां संज्ञांतरमिंद्रवज्रयाह॥ ॥आरोहिणीति। परमोच्चा
न्युग्रहस्य दशारोहिणी॥ परमोच्चभागां ताद्धारभ्य यावत्परमनीचभागा। दिनराशिषट्के स्थि
तेन ग्रहेण या दशां दत्तां तद्दशावा आऽवरोहिणीत्यर्थः॥ सैवावरोहिणी मित्रनवांशे स्थिते
न स्वोच्चराशिनवांशस्थितेनाथ स्वोच्चराशिस्थितेनापि दत्ता चेन्मध्या॥ नीचाद्यावित्तस्य ग्र
हस्यारोहिणी॥ परमनीचांतभागाद्धारभ्य यावत्परमोच्चभागा। दिनराशिषट्के स्थितेन द
त्ता दशा आरोहिणीत्यर्थः॥ सैवारोहिणी नीचराशिनवांशे शत्रुनवांशे वा स्थितेन दत्ता ॥२८॥

चेदधमनाम्नी॥ ननु चेतस्याः सर्वश्लोकोक्तानिष्फलायामंतर्भावः स्यात्॥ अनिष्फलात्वमु
न मे वकरोति॥ अधमाशुभमेवाल्पं करोतीति भेदः॥ तदुक्तं॥ उच्चनीचांतरस्थस्य दशा स्यादवरोहि
णी तस्यामल्पमवाप्नोति फलं लोके शास्त्रदुर्मनरः॥१॥ मित्रस्वोच्चांशकस्थस्य मध्यमा मध्यफलातु
सा॥ नीचोच्चमध्यगस्योक्ता कष्टा चारोहिणी दशा॥२॥ सैवाधमाख्या भवति नीचराश्यंशगस्य तु
आरोहिणी चेदधमा न चेत्कष्टफलप्रदा॥३॥ आरोहिमध्यफला संपूर्णापि रिक्तीर्तिता इति
॥६॥ पुनर्दशासंज्ञांतरमुपजात्याह॥ ॥नीचारिभागेइति॥ ग्रहास्तु ग्रहाणि स्वोच्चमूलत्रिकोणा स्मी
यदोत्रापि॥ तेषामन्यतमेनीचराशिनवांशगेन शत्रुनवांशगेन च दत्तां दशां तद्दशावामिश्रफ
लाशुभाशुभफलदा॥ व्याधियुतं धनागमं ददातीत्यर्थः॥ अर्थाद्विनीचराशौ रिपुराशौ वा स्वोच्च
स्वराशि मित्रमूलत्रिकोणवर्गोत्तमनवांशगतेन दत्तादशापि मिश्रा फलैव॥ नामानुरूपानि
फलानि ग्रहाणां दशासु वक्ष्यामि॥ संपूर्णाति सेष्टा॥ पूर्णेति सेष्टा। अधमानिष्टफला॥ रि
क्तार्थहानिदा॥ अनिष्फलातिदुःखदा॥ मिश्राशुभाशुभफलदेत्यादि॥७॥ लग्नदशायांशुभाशुभं
वेतालीयेनाह॥ उभयइति॥ द्विस्वभावे प्रथमे द्रेष्काणे जस्य लग्नस्य दशा निष्टफला। द्वितीये मि
श्रफला तृतीये स्पष्टफला॥ चरराशौ प्रथमे द्रेष्काणे सेष्टा॥ द्वितीये मध्या। तृतीयेऽधमा॥ स्थिररा
शौ प्रथमे निंद्या॥ द्वितीये सेष्टा। तृतीये मध्येति॥८॥ ग्रहाणां नैसर्गिकं दशाफलं शार्दूलेनाह॥

५र॰मत्राष्वं॥

तत्कमिति॥ जन्मकालादारभ्यैकं वर्षं चंद्रदशा। ततो द्वे कुजस्य। २ ततोत्र वबुधस्य ९। ततो
विंशति शुक्रस्य २० ततो ष्टादश गुरो १८। ततो विंशति सूर्यस्य २० ततः पंच शनेः ५० एवं विंश
८ त्युत्तरं वर्षशतं॥ प्रयोजनमाह॥ स्वैरिति॥ सर्वोत्कादशांतर्दशा वा यदि निसर्गिके स्वैः स्वै
दशा॰ वर्षैर्भुज्यते॥ सर्वोत्कृदशा नैसर्गिकदशा या यावत्कालं योगस्तावत्सा दशा शुभफला भवति
नैसर्गिकलग्नदशामाह॥ अतइति॥ विंशत्याधिकं वर्षशतं यदि जीवति तर्हि लग्नदशाप्र
वृत्ता शुभा॥ एतद्यवनमतं॥ चे॥ विच्छुतकाल्यादियो नेच्छंति॥ ८॥ दशाफलान्याह भिः शार्दूल
विक्रीडितैराह॥ दशारंभे शुभत्वमाह॥ पाकस्वामिनीति॥ यस्य ग्रहस्यांतर्दशाप्रवेशः
यः पाकस्वामी सप्रदाप्रवेशसमये यल्लग्नं तत्रगतस्तदारब्धांतर्दशा शुभदा॥ यद्वा दशाप
तेर्यत्तात्कालिकमित्रं तस्मिन्नपि दशाप्रवेशलग्नगे शुभा दशा॥ दशापतेः षड्वर्गे वा प्रवेश
लग्ने शुभा॥ अन्यस्मिन्सौम्यग्रहे प्रवेशलग्नगे वा शुभा॥ यद्वा दशापतेः प्रवेशलग्नादुपच
यस्थश्चेत्तदापि शुभा॥ शुभदशायां सर्वकालं शुभफलं किंनाकरोत्यत्र शुभेमतमाह॥ मित्रे
ति॥ प्रातिराशौ संचरतो दशापतेस्तात्कालिको मित्रं तच्छत्रस्थश्चंद्रः शुभफलं कुरुते॥ अयमत्र
र्थः॥ यस्मिन्दिने यस्मिन्लग्ने चारवशात् [illegible] योगश्च्छति तद्ग्रहस्य स्वामी तद्दिने यदि दशा ॥२९॥

पतेस्तात्कालिकं मित्रं तदा चंद्रः पाकपतेर्मित्रक्षेत्रस्थोऽपि यः शुभः॥ दशापतेरुच्चराशिगोऽपीडः
शुभः॥ दशेशा॥ त्रिषडेकादशदशमनवमपंचमस्थ समास्यत मस्थोऽपी दुःशुभः॥ किं फलमि
त्यत्रेदं बोध्यं॥ दशापतेर्मित्रादिराशौ यत्र चंद्रः स्वराशिर्यज्जन्मनियोगावस्तदुक्तं तद
हफलं कुरुते॥ तदुक्तं॥ यद्राशिसंस्थः शीतांशुः शुभकृत्स्यारिक्तहीनितः॥ स्वराशिर्जन्मकाले
तु योगावस्तात्कृतं चेत्तत्॥ शशिरादिलग्नसौख्यं वक्रत्वं बलयोगतः॥ अपि स्वराशिसंस्थस्तु
तज्ञावो[illegible]मशौजनमिति॥ ९॥ पापानीति॥ अतोन्यथा दुःखं कुरुते॥ अयमर्थः॥ दशाप
तेस्तत्कालशत्रुगृहे नीचराशौ तत्पतिना स्वैकराशौ वा। द्वितीयचतुर्थाष्टमद्वादशान्यत
मस्थो वेदुःशुभदशा या यापि पापफलं कुरुते॥ १०॥ अंतर्दशाप्रवेशकाले चंद्रः क्रांति
मस्थो वेदुःशुभदशा ॥ प्रारब्धेति॥ कर्कस्थे चंद्रे अंतर्दशाप्रविष्टा सुखधनहर
रा॥ त्रिवर्गेन शुभामाह॥ कन्यामिथुनस्थे। विद्यामित्रधनदा॥ सिंहस्थे चंद्रे रुड
जाप्रदा॥ मेषालिस्थे स्त्रीदोषकरा॥ कन्यामिथुनस्थे। विद्या... ॥ मकरकुंभस्थे तु स्त्रीदा॥ य
गरिष्ठमार्गे गर्दभमापेक्षिकरा॥ तुलावृषस्थे चंद्रे अन्नदा॥ मकरकुंभस्थेतु ष्टस्त्रीदा॥ ध
नुर्मीनस्थे चंद्रे प्रविष्टा दशा नेकधनसुखदा॥ एवं शुभदशा शुभकाले प्रवृत्ता शुभतराभव
ति॥ अशुभा तु शुभकाले प्रवृत्ता मध्यमा॥ शुभाप्य शुभकाले प्रवृत्ता मध्यमा॥ एवमन्यत्रा
विकल्प्य॥ ११॥ रविदशाफलमाह॥ योग्यामिति॥ सूर्योरावस्तद्दशा यामंतर्दशायां वान खादि

सू॰म॰ना॰

८

दशा

भिः स्वं धनं भवति॥ नरवैस्तुर्गं धिरयं॥ दंतो हस्ती दंतादि॥ चर्म व्याघ्रादीनां॥ कनकं हेम। क्रौर्यं क्रूर
ता॥ अध्वा मार्गः॥ नृपोत्थः॥ आह वो युद्धं। एतैः॥ तथा तैर्गणैर्भुजगावः॥ धैर्यं भुजगाभ्युपाफलं
सेः हर्षविषादरा हित्यं॥ निरंतरमुद्यमे प्रीतिः॥ ख्यातिः कीर्तिः प्रतापो ऽतिः॥ शौर्येण ऽऽ एत्व
एता न्यर्कस्य भुन्न दशायां फलानि॥ अशुभायामाह॥ आर्येति॥ आर्याकृत्वा आपदः॥ स्त्रीतनयधन
शत्रुग्राम्याग्निनृपेभ्यो भिन्नवः॥ त्यागी अस्थाने व्ययकृत्॥ पापप्रीतिः॥ पेचकैः सह कलहः
हृदयोदरयोः पीडा॥ रोगश्चेति॥ मिश्रायां मिश्रं फलं॥१२॥ चंद्रदशाफलमाह॥ इंदोरिति॥ चं
द्रदशायां शुभायां प्राप्य मंत्रा वेदकावादयः आगमो वा वेदिकावा। विप्राश्च तुष्टा निफलान्याप्नोति।
इक्षुविकारो गुडादिः। क्षीरविकारो दध्यादिः। वस्त्राणि पुष्पाणि क्रीडा रतिः॥ तिलान्नानि पायया
साश्च। एतैः फलत्वा शुभफलान्याप्नोति॥ अशुभायां निशालस्यान्वमृदुः लक्ष्मीः कन्याजन्म यशो
धनयोः क्षयः॥ बलवद्भिः स्वायव धुयैश्च वैरं॥ भुनायो तुनदि विप्रदेवाराधने प्रीतिः॥ बुधि
धनयोः क्षयः॥ ...
मत्वं। कीर्तिधनहृद्धिः मिश्रायामुत्तमं॥१३॥ ॥भौमदशाफलमाह॥ भौमस्येति॥ शत्रुमथनं
राजाज्ञा ताम्र भिः। आविकं छागाश्च एतैः फलत्वाशुभकुजदशायां धनाप्तिः। अशुभायां
तु पुत्रैः भ्रातृस्त्रियासुहृद्भिः पितृभिः पंडितैर्गुरुभिश्च सह वैरं॥ तथा वह्निकारकं ज्वरः। अंगो ॥३०॥
ऽवयवस्फोटनं॥ पित्तप्रकोपः। एतैर्जनितारोगाः॥ परदारेषु प्रीतिः॥ पापिष्ठैः सह प्रीतिश्च

॥अधर्मासक्तिः। कठिनवक्तृत्वं। उग्रस्वभावस्त्वं च मिश्रायामुत्तमं॥१४॥ ॥बुधदशामा
ह॥ बोधात्मजेति॥ दूतत्वं मित्रता। एगुरवः द्विजाश्च बुधस्य शुभदशायामेभ्यो धनं। विद्वज्ज
नैः कीर्तिः यशश्च। युक्तिः पित्तलेरव्यं कांस्यादि स्वर्णं देयरोऽश्वविशेषः। भूः सर्वजनप्री
तिः। सुखं लाभो लाभः। परोपकारे सेवायां च पाटवं। बुद्धिवृद्धिः धर्मकार्याणां सिद्धयः।
अशुभदशायां कठिनवचनता खेदः। बंधनं मनः शोकः। वातपित्तश्लेष्मकोपाद्यादि
रिति मिश्रायामुत्तमं॥१५॥ गुरुदशाफलमाह॥ जैव्यामिति॥ गुरोः शुभदशायां मा
न्यं। गुणाविशालौ यदि यस्ते षामुदयः। बुद्धिवृद्धिः क्रमनीयता॥ पुरुषार्थे नौत्सुक्यं।
शत्रुजयो त्पादनं। माहात्म्यं परोपकारशीलता। उद्यमशीलता। मंत्रैर्वैदिकागमकैः। नी
तिशास्त्रेण नृपाराधनेन वेदाध्ययनेन मित्रेण च धनाप्तिः। हेमतुरगपुत्रगजवाप्तिः
वृद्धिः। गुणाच नृपैः स्नेहः॥ अशुभायां तु स्त्रक्षोभो द्योयकरस्त्व कस्य स्थानमनेनाशाने
मरवेदः। स्वस्थार्थं विचारयतश्चिंतातुरत्वमित्यर्थः। कर्णरोगः। धर्मबाधेन रिः क
लिरिति मिश्रायामुत्तमं॥१६॥ शुक्रदशामाह॥ ॥शोक्यामिति॥ शुक्रस्य शुभदशायां गी
तादीनामागमः प्राप्तिः। गानं। प्रीतिः सुखेन धनं भोजनं पानं वस्त्रं नारी प्राणिः कांतिः का
मपास्त्री शय्यादिः। योगशास्त्रे मनीषितं। सुहृदः। एभ्यो प्राप्तिरित्यर्थः। क्रये विक्रये च वातु

८
दशा।

र्यं॥ कर्मकर्मणो। विधानं च प्राप्तिः। धनप्राप्तिः। अथाशुभायां चक्रराज्ञो स्य वर्लेन पापि
निष्ठस्य हवैरं॥ स्नेहात् दशा का द्वेति॥ मिश्रायामुभयाप्तिः॥७॥ शानिं दशायां मायां घोरामिति॥ ॥
शनिशुभं दशायां रवौ करस्य रूपेनादि महीबाहृद्धस्त्री णां लाभः। प्रमानजातायानां बहूनां
पालः श्रेणीमस्यां यामेधुरेनायो धिकारस्तादुत्पन्ना स्त्रजा। कोश वा दिधा न्यप्राप्तिः। अथा
शुभदशायां श्लेष्मणा मरसरेण वायुना को धैन चित्तभ्रमेण तामसत्वेन चापि पङ्गवति॥ तं
शत्रोलस्यं॥ तदुक्तं॥ हृदये व्याकुलीभावो यथायी द्वियगोरवं। मनो बुध्य प्रमादश्च तंद्राया
लक्षणो विदुरिति॥ अमः स्वेदः। अंवकादिन्यक्तिरस्कारः॥ व्याध्यादिरोगाविकल्पमेलान्या
शोति॥ मिश्रायामुभयं॥१८॥ ॥ एकैकस्मिन् ग्रहे शुभाशुभफलान्युक्तानि तेषां विषयविभा
गं लग्नदशा कथं चोपजायाह॥ दशास्थिति। जन्मस्थोपचयस्थानिर्मलाः स्वोच्चस्वराशी
। स्त्रीमूलत्रिकोणगाः शस्तास्ते यां दशा लर्दशा वा शुभफला। येऽपचयस्था रूक्षा नीचारि
नवांशगास्ते वा मशुभफला॥ स्वक्षेत्रादिगा अपि रिपुनवांशगा नीचारिगृहगा अपि स्वां
शगा मित्रा। ग्रहा वा मध्यास्ते षां दशा मिश्रफला॥ लग्नदशाफलं तु लग्नेशतुल्यं। यथा मेष
लग्ने भौमदशाफलं॥ एवमन्यत्र॥१९॥ अन्यफलानां दशास्थिति देहं शास्त्रिस्याह॥ ॥२१॥
अंशाध्याये ति॥ यं शाध्याये यस्य ग्रहस्य यद्यद्वर्णितं॥ तामस्यापि षष्ठे मेत्यादिना॥
तं

पूर्वस्य ग्रहस्य स्वशुभदशायां तदीयायां प्राप्तिः। अशुभायां हानिः। तथा कर्माजीवाध्याये अर्थाप्तिः
पितृपितृपत्नीत्यादिना यत्कर्मणा धनाप्तिरुक्ता सा तद्दशायां वेद्या॥ तथा चाब्रफलेषु
रस्ताद्यो विकलनयनो निर्घृणो के तु शूरस्त्यादि॥ तथा स्थानफलं॥ हाथितश्च लग्नेऽरटनो
स्यविन्त इत्यादि॥ मेषेभस्त्वास्ति मिरनयन इत्यादि च॥ तथा दृष्टिफले च॥ चंद्र नृपबुधा
विस्त्यादि॥ तथा योगोद्भवं राजयोगादुक्तं अर्वयोगेषु योगकर्तृणां मध्ये यो बली य
स्व फलं योगजं ददाति॥ नाभस योगा अपि स्वदशायां फलदाः॥ एवमादि सर्वं स्व स्वद
शायां वेद्यं॥२०॥ अथ यस्य जन्मकाले तत्स्य शरीरछायानुसारेणापि दशा ज्ञानमिंद्र
वज्रयाह॥ ॥छायामिति॥ ॥हर्वमुक्तं॥ श्रीरविन्दूरवपयोः मरणं विशीर्णे नूमिस्रता
द्यः क्रमेणेति॥ रविचंद्रावग्निजलत्वेन प्रसिद्धावेव॥ अवशिष्टाः स्वद्रव्य प्राप्यन्नूम्यादि
पंचमहाभूतरूतो छायादेहकांतिं प्रकटयंति॥ भूमिजलवह्निवायुनभोजातां भूगुणांश्च
प्रकटयंति॥ नीदृशान्॥ नासाजिह्वा नेत्र त्वक् कर्णैः रसानुयोग्यान्॥ भूछायानासुमेध्यं
गं धं व्यंजयंति॥ जलछायाजिह्वा ज्ञेयं रसं। आग्नेयी नेत्रज्ञेयं रूपं। वायवी त्वगनुमेयं
स्पर्शं॥ नाभसी कर्णलभ्यं शब्दमित्यर्थः। एतदुक्तं भवति॥ यदा भूजगंधोनरस्तादाबुधत्व
लाभूछायाज्ञेया॥१॥ यदि मिष्टरसभोजी तदा शुक्रचेशस्य तमकृता आप्यछाया॥२॥ य

धु॰ह॰म॰ गाथ्य

८

दशा॰

दारूपवीस्तदा कुजार्ककृता आग्नेयी छाया॥३॥ यदा मृदुस्पर्शोऽर्जी तदा शनिकृता वा
यवी छाया॥४॥ यदास्य शब्दः सुखमनुभवति तदा गुरुकृता नाभसी छाया॥५॥ छायालक्ष
णानि विद्वेषा दाचार्येण श्रीहेतायामुक्तानि॥ छायाः शुभाशुभफलानि निवेदयंती लक्षा
मनुष्यपशुपक्षिषु लक्षणैरित्यादिना श्लोकपंचकेन॥२१॥ ॥दशाज्ञानार्थमंतरात्म
स्वरूपमालिन्याह॥ ॥शुभफलदेति॥ शुभफलप्रदायी ग्रहस्तद्दशायां मनोऽपि शुभमा
नंदयुक्तमेव स्यात्॥ छायादर्शितग्रहदशा च॥ सुखं धनाशिं च जनयति॥ अर्थादेवा
शुभायां अशुभं मिश्रायां मिश्रं॥ तदुक्तं॥ शुभाशुभानि ग्रवाणि निमित्तानि स्फुरेकृतः॥
एकस्तं तस्तु मनः शुद्धिर्मनः शुद्धं जयावहमिति॥ कथितेति॥ ग्रहाणां दशासु यानि
ना शुभफलान्युक्तानि तत्फलं जीवेत्तद्ग्रहदशा वर्ततइति ज्ञेयं॥ एवं छायावशेन मनो
वशेन च दशा शुभेयेत्यर्थः॥ ननु शनिदशायां व्यंगत्वमुक्तं॥ शुक्रदशायां तु निध्यास्ति क
क्ता॥ तच्च नैकांततो दृश्यते॥ तत्राह॥ परिमाणमनीति॥ स्वभेविंतायां स्वपराक्रमेणापि ॥३३॥
ता दशाफलोक्तिः परिपाकं गच्छति॥ अत्र केचिद्वदंति॥ शुभदशायां यदा तदंतर्दशापि शुभा ॥२
तदशुभफलं॥ अशुभा तदंतर्दशा मध्यमं॥ अशुभदशायामशुभांतर्दशायां चाधममिति॥

तन्न॥ एकल्लंगोऽर्धमपहृत्य ददातिच स्वमिति वचनाद्व्यापतेः फलमपहृत्यांतर्दशापाति
व फलदातेति ज्ञेयं॥२२॥ फलविरोधे निर्णयं वसंततिलकेनाह॥ ॥एकग्रहस्येति॥ एकग्र
हस्य प्रदशा प्रशुभोऽशुभफलविरोधे फलद्वयस्य नाशं वदेत्॥ विरुद्धयोरप्येकमधिकं चेत्त
दा तत्फलति॥ यथा कश्चिद्ग्रहो दशाफलादिषु लाभं हेमदः अन्यो वा ह्यष्टकवर्गे वा फलयोगफ
लान्यत मुख्यं हेमहारी॥ तदा फलद्वयेपि हेमसंबंधात् साजात्येपि दानापहारयोर्विरोध
त्व॥ तदा द्वयस्य नाशः॥ नददीना पि हरतीत्यर्थः॥ अधिकस्य पाकोयथा कश्चिद्ग्रहो निर्दिष्टप्र
कारद्वयेन हेमदः एकप्रकारेणापहारी॥ तदा दानस्याधिक्यात् हेमद एव॥ अथ प्रकारद्वयेना
पहारी एकप्रकारेण हेमस्य दस्तदापहारी॥ आधिक्यात् हेमाहरत्येवेत्यर्थः॥ परंतु अन्योग्रह
प्रदत्तमन्यफलेन हंति॥ यथा कश्चिद्धेमदोऽपरोऽपहारी तदा स्वदशायां हेमदो ददाति॥ अ
पहारी तु स्वदशायां हेम हरतीत्यर्थः॥२३॥ इति श्रीधरकृते जातकविवरणे दशांतर्दशा
ध्यायोऽष्टमः॥त॥ ॥७॥ ॥७॥ अथचारवशाद्ग्रहौ विचरतो ग्रहस्य शुभाशुभ
फलमष्टकवर्गेण निरूप्यते॥ तत्रार्कीया अष्टकवर्गांन् शार्दूलविक्रीडितेनाह॥ स्वादर्कइ
ति॥ जन्मनि यद्ग्राशौ अर्कस्तद्राशितः प्रथमैकदशा चतुर्थाष्टम द्वितीय दशमे नवमस्थ

लघु·अ·माष्टं॥

मे शु १।११।४।८।२।१०।६।७।८ कु शुभं॥ सौमादष्येते शुभे वक्रशुभं: शनेरष्वेते क्षेत्र वक्रशुभं
सप्तमद्वादशषष्ठे शु ७।१।२।६। शुभं॥ गुरोर्नवमपंचमैकादशषष्ठे शु ५।५।११। ६। शुभं॥

८ चंशद्शमतृतीयेकादशषष्ठे शु १०।३।११।३। शुभं॥ कुभात्द्वादशनवमपंचमयुते क्षेत्र

अष्ट· १०।३।११।६।१२।६।५। शुभं॥ लग्नाच्चतुर्थद्वादयुते शु चंशोक्ते शु १०।३।११।३।८।१२॥ शुभं॥१॥
चंशा थैष्टकवर्गमाह॥ लग्नादिति॥ चंशोलग्नात्षष्टतृतीयदशमैकादशे शु ६।३।१०।११।
शुभं॥ सौमादेक्षेनाद्वितीयपंचमनवमयुते शु ६।३।१०।११।२।५।८। शुभं॥ स्वस्थानात्स
प्तमप्रथमयुते शु षड्द्रिदशायेशु ६।३।१०।११।७।१। शुभं॥ रवेरष्टमसप्तमयुते शु लग्नोक्ते
शु ६।३।१०।८।११।८।७। शुभं॥ शनेषष्टतृतीयैकादशपंचमे शु ६।३।११।५। शुभं॥ बुधात्पं
चमतृतीयैकादशाष्टमकेन्द्रे शु ५।३।११।८।१।४।७।ं शुभं॥ गुरोर्द्विदशैकादशाष्टमकेन्द्रे शु
१२।११८।१।४।७।१०। शुभं॥ शुक्रान्नवमपंचतुर्थपंचमतृतीयेकादशादशमसप्तमे शु ९।
४।५।३।११।१०।७। शुभं॥ ३॥ ऊजाष्टकवर्गमाह॥ ॥वक्रइति॥ भौमः स्वपतितृतीयषष्ठ
दशमैकादशपंचमे शु ३।६।१०।११।५। शुभं॥ लग्नात्प्रथमयुते शु पचये शु ३।६।१०।११ ॥३३॥
१। शुभं॥ चंद्रत्रिषष्टैकादशे शु ३।६।११। शुभं॥ स्वस्थानात्केशाष्टमैकादशद्वितीये शु १।४।७।

१०।८।११।२। शुभं॥ शनेर्नवमाष्टमैकादशकेन्द्रे शु शुक्रे ६।८।११।१।४।७।१० शुभं॥ बुधा
त्षष्ठतृतीयपंचमैकादशे शु ६।३।५।११। शुभं॥ शुक्रात्षष्ठद्वादशैकादशाष्टमे शु
६।१२।११।८। शुभं॥ गुरोर्दशमद्वादशैकादशषष्टे शु १०।१२।११। ६। शुभं॥ ४॥ बुधाष्ट
कवर्गमाह॥ ॥ घायाया षष्टेति॥ बुधः शुक्रात् द्वितीयप्रथमैकादशषष्ठे शु अष्टमनवम
चतुर्थतृतीयपंचमे शु २।१।११।८।६।७।३।५। शुभं॥ शनिकुजात्प्रोदशमसप्तमयुते शु
सर्वोक्ते शु २।१।११।८।६।४।३।५।१०।७। शुभं॥ गुरोर्द्विदशषष्टैकादशाष्टमे शु १२।
६।११।८। शुभं॥ सूर्यान्नवमैकादशषष्टपंचमद्वादशे शु ९।११।६।५।१२। शुभं॥ स्व
स्थानात्प्रथमदशमतृतीययुते शु सूर्योक्ते शु २।११।६।५।१२।१।१०।३। शुभं॥ चंशाष
ष्टद्वितीयैकादशाष्टमचतुर्थदशमे शु ६।२।११।८।४।१०। शुभं॥ लग्नादाद्ययुते क्षेत्र शु ६।
२।११।८।७।१०।१। शुभं॥५॥ जीवाष्टकवर्गमाह॥ ॥दिक्स्वाद्यष्टमेति॥ गुरुः ऊजा
द्दशमद्वितीयप्रथमाष्टमसप्तमैकादशचतुर्थे शु १०।२।१।८।७।११।४। शुभं॥ स्वस्थाना
त्तृतीयसहिते शु १०।२।१।८।७।११।४।३। शुभं॥ सूर्यात्तृतीयनवमयुते शु ऊजोक्ते
शु १०।२।१।८।७।११।४।३।९। शुभं॥ शुक्रात्पंचमद्वितीयनवदशमैकादशषष्ठे शु ५।२।९।
म

छ र म जाव्वं॥

८ अष्ट

१०।११।१२।६।शुभं॥ चंद्रात्सप्तमैकादशद्वितीयनवमपंचमेषु।१।११।२।६।५।शुभं॥ शनेस्तृ
तीयषष्ठपंचमद्वादशेषु।३।६।५।१२।शुभं॥ बुधात्पंचमदशमषष्ठद्वितीयचतुर्थैकादश
प्रथमनवमेषु।५।१०।६।२।४।११।१।९।शुभं॥ लग्नात्सप्तमयुतेष्वेषु।५।१०।६।२।४।११।१।९।
शुभं॥५॥ शुक्राष्टकवर्गमाह॥ ॥लग्नादासुतेति॥ शुक्रोल्लग्नात्प्रथमद्वितीयतृतीयच
तुर्थपंचमैकादशाष्टमनवमेषु।१।२।३।४।५।११।८।९।शुभं॥ चंद्रात्द्वादशयुतेष्वेषु।१।२।३।४।५
।११।८।९।१२।शुभं॥ स्वस्थानात्दशमयुतेष्वेषु।१।२।३।४।५।११।८।९।१०।शुभं॥ शनेश्चतुर्थ
तृतीयपंचमनवमदशमाष्टमैकादशेषु।४।३।५।९।१०।८।११।शुभं॥ रवेरष्टमैकादशद्वा
दशेषु।८।११।१२।शुभं॥ गुरोर्नवमदशमैकादशाष्टमपंचमेषु।९।१०।११।८।५।शुभं॥ बुधा
त्पंचमतृतीयैकादशनवमषष्ठेषु।५।३।११।९।६।शुभं॥ कुजात्तृतीयनवमषष्ठपंचमैकाद
शद्वादशेषु।३।९।६।५।११।१२।शुभं॥६॥ शन्यष्टकवर्गमाह॥ मंदः स्वादिति॥ शनिः स्वस्थाना
त्तृतीयपंचमैकादशषष्ठेषु।३।५।११।६।शुभं॥ कुजात्दशमद्वादशयुतेष्वेषु।३।५।११।६।१०।
१२।शुभं॥ शुक्रात्केन्द्रैकादशाष्टमद्वितीयेषु।१।४।७।१०।११।८।२।शुभं॥ लग्नात्त्रिषडेकादशाद
शमाद्यचतुर्थेषु।३।६।११।१०।१।४।शुभं॥ बुधात्नवमैकादशषष्ठदशमद्वादशाष्टमेषु।९।११।६। ॥रू॥

श

८ अष्ट

१०।१२।८।शुभं॥ चंद्रात्तृतीयषष्ठैकादशेषु।३।६।११।शुभं॥ शुक्रात्षष्ठद्वादशैकादशेषु
।६।१२।११।शुभं॥ गुरोरेकादशद्वादशपंचमषष्ठेषु।११।१२।५।६।शुभं॥७॥ अष्टकवर्गफलवि
शेषमाह किम्माह॥ ॥इति निगदितमिति॥ इत्युक्तप्रकारेण यत्स्थानं यद्ग्रहस्योक्तं तद्दिष्टं
शुभं ज्ञेयं॥ अन्यदनुक्तमनिष्टमशुभं ज्ञेयं॥ अत्राष्टकवर्गोक्तं फलं ते ग्रहाः जन्मना
त् जन्मकाले यत्र स्थितास्तस्मात्स्थानाच्छुभाशुभफलमाधिक्यवशात्कुर्वंति॥ नकालाको
तराशिलः॥ अयमर्थः। यानि स्थानानि आचार्येणोक्तानि तानि रेखोपलक्षितानि कार्याणि॥ नि
अनुक्तानि बिंदूपलक्षितानि यत्र रेखाधिक्यं तत्र शुभं। यत्र च तु तत्राद्धं यत्र द्वे रेखे तत्रपा
दफलं य त्रय तत्र पादोनं। एवं बिंदूनामशुभफलं॥ एवं गोचरे ऽधिकवशात्फलविपाकं
ददाति॥ तत्रापि विशेषमाह॥ उपचयेति॥ उपलक्षणमेतच्छुभस्थानानां॥ जन्मकालेल
ग्नाद्वाशेरुपचयगतः स्वक्षेत्रस्थो मित्रक्षेत्रस्थो स्वस्थो मूलत्रिकोणस्थो यदा तदा ऽशुभफ
लं पुष्टमाधिक्यं ददाति॥ चं राशेर्लग्नादपचयगतः शत्रुक्षेत्रगो नीचस्थोऽस्तंगतो ऽनिष्ट
फलदः॥ निरुद्धं चेदिति निरुद्धं ददाति॥ अर्थाद्देवशुभग्रहस्य शुभमशुभग्रहस्य
शुभमल्पं। रेखाधिको पि इदं जन्मकालिकं ग्राह्यं॥ नचारकालिकं॥ तदुक्तं॥ लग्नादुपच

वृ.म.भा. यस्मिंस्तथ्रंशाद्वास्वगृहमूलत्रिकोणतुंगगतः॥ मित्रक्षेत्रगतो वा फलमत्यर्थं शुभं दद्यात्॥१॥ ॥
अपचयराशौ नीचे शत्रुक्षेत्रे च जन्मकाले स्यात्॥ यस्तस्य दशा त्वल्पं फलमिति शेषं ज्ञेय
१० था कालमिति॥२॥ एवं गोचरगते ग्रहे चारवशात् फलतारतम्यं ज्ञेयमित्यर्थः॥ ॥ इति म
कर्मा: हीधरकृते जातकविवरणे अष्टकवर्गाध्यायो नवमः॥१०॥ ॥ अथ कर्माजीवाध्यायः॥
नरेण कथं धनमर्जनीयमित्यत्र निरूप्यते॥ ॥ तत्र ग्रहप्रकारद्वयेन धनदः॥ ल
ग्नाच्चंद्राद्वा दशमगतो धनदाता। लग्नेंद्वोर्दशमे शून्ये लग्नेंदुकर्मणोः प्रकाशात् दयोदश
मराशिस्तत्पतिर्यन्नवांशे स्थितः तन्नवांशपतिर्धनदाता॥ अथ धनदानप्रकारः स
र्वस्मादिन्नः॥ तत्रादौ लग्नचंद्राभ्यां दशमगो येन प्रकारेण धनदस्तं प्रकारमाह॥ अ
र्थाप्तिरिति॥ लग्नचंद्राभ्यां दशमगतैरर्काद्यैः क्रमात् पित्रादिभ्यो धनाप्तिर्वाच्या॥ ॥
यथा जन्मनि लग्नाच्चंद्राद्वा यदार्के दशमस्तदा पितृतो धनाप्तिः॥१॥ चंद्रे दशमे मातृ
तः२ भौमे रिपोः३ बुधे सुहृतः४ गुरौ भ्रातुः५ शुक्रे स्त्रीतः६ शनौ कर्मकारात्७ यदो
भाभ्यां दशमो न ग्रहस्तदा स्वदशायां शुभौ धनदौ॥ स्वोक्तविधिना यदा बहवो दशमगा स्तदा ॥३५॥
सर्वे स्वस्वांतर्दशायां स्वोक्तधनदाः॥ लग्नेंद्वोर्दशमाभावे धनाप्तिमाह॥ नेंद्वर्केति॥॥
लग्नचंद्रार्काणां ये दशमराशयस्तेषां ये पतयस्ते यन्नवांशे स्थितास्तेषां ये नाथास्ते

षां ये दृष्ट्वा वक्ष्यमाणया धनाप्तिर्वाच्या॥ अत्र केचिदेवं व्याख्यायंति॥ लग्नाच्चंद्रा
च्च दशमे ग्रहे लग्नचंद्रयोर्यो बली तद्दशमो धनदः। इति तथा नेंदुकर्मणोर्यो बली तस्या
स्य दशपतिर्गो नवांशनाथ वृत्त्यार्थाप्तिरिति तद्वयमयुक्तं॥ यतो बलपदमत्र नास्ति। तस्माद्य ल
र्वे धनदाः स्वस्वदशायां॥ तदुक्तं॥ उदयाच्छशिनो वापि ये ग्रहा दशमे स्थिताः॥ ते सर्वे
ऽर्थप्रदा प्रोक्ता ज्ञेयाः स्वदशासु यथोदिताः॥१॥ लग्नार्करात्रिनाथेभ्यो दशमाधिपानि
रीक्ष्य॥ यस्मिन्नवांशे तत्कालं वर्त्तते तस्य यः पतिः॥२॥ तं दृष्ट्वा प्रवदेद्वित्तं जातस्य ब
हवो यदा॥ भवंति वित्तदास्तेपि स्वदशासु विनिश्चितमिति॥३॥ १॥ नेंद्वर्कस्य दशपति
नांशनाथवृत्त्येति यदुक्तं तां वृत्तिं प्रकारविलोकनद्वयेनाह॥ ॥ अर्केंशे इति॥ नेंद्वर्कास्य द
शपतिनवांशपतौ सूर्ये ज्ञातिसुगंधतृणऊर्णाविलोमभिरौषधेनादि पदार्थोगप
रिचर्यया च धनाप्तिः॥१॥ चंद्रे कृष्यादि गोरक्षमुक्ताप्रवालादि विक्रयेण स्त्रीसमाश्रया
च्च धनाप्तिः॥२॥ कुजे धातुभिः स्वर्णादिभिः मनःशिलहिंगुलहरितालादिभिर्वा
आग्निकर्मणा चापाग्निचक्रादिभिः साहसेन कार्यकरणेन बलक्रियया वा धनाप्तिः॥
३॥ बुधेऽक्षरैर्विन्यासेन गणितेनादि पदात् व्याख्यानेन यंत्रयोगैः काव्यक्रियया
श्रोत्रियैस्तैः पत्रच्छेदपुस्तकस्तुतिवाणामात्यरचनागंधयुक्त्यादिभिर्धनाप्तिः॥४॥

कृ॰ इ॰ म॰ भाष्य॥ ४॰

॥४॥ जीवांशाइति॥ गुरौनवांशेस्थे। विप्रेभ्यो। विप्रेभ्यो देवेभ्यो वा स्वर्णलवणगजाज्ञाघृत
त्तिस्थाने भ्यो आदिपदात्। क्रियावादेन यज्ञदानोपवास गुरुभ्यो वा। देवि धनाप्तिः॥
॥५॥ शुक्रेव नौपप्रराणादिभिः रूप्येणादिपदा रत्नो हेगो वृषमहाषकर्मणा धना
प्तिः॥६॥ शनौ मार्गगमनादिघातेन स्वांग ताडना। दिनाबाभार वहनेन स्वकुला
नुचित कर्मणिश्च धनाप्तिः॥७॥ एवं जन्मकालेन रस्य धना गमे ज्ञाते चारवशा
सर्वदा कर्मसिद्धिकालमाह॥ कर्मेशेति॥ लग्नाद्दशमेशाश्चारवशाद्यस्मिन्नवां
शेगतस्तत्पतेर्यानि कर्माणि चलाकनकादीनि ता। नितदा प्रारब्धानि सिध्यंति
॥३॥ नाना धनागमं ग्रहर्षिल्पाह॥ मित्रारीति॥ चंरलग्नयो र्यैदशमास्त
त्स्वावेयेनेंद्रकीस्पदपातिनवांशनाथास्ते मित्र गृहगेषु तद्दशायां
मित्राद्धनाप्तिः॥ रिपुगृहगेषु रिपुतो धनाप्तिः॥ स्वगृहगेषु स्वगृहाद्ध ॥३५॥

१०

कर्मा॰

ने॥ तुंगेति॥ सर्वोन्नयुक्त्या यदि रविधनदस्ताद्राजन्मकालेरवौ मेषगे। न्यैः काथबल
धैर्युक्ते वा स्वो ध्यमाधनाप्तिः। बलिषु सौम्येषु लग्नलाभ धनगेषु नानाप्रकारैः
धनं चिंत्यं येन विधिने छति तेना प्नोतीत्यर्थः॥ तदुक्तं॥ धनदा जन्मन्यमये मित्रारि
स्वगृहोपगाः॥ यस्य तस्य धनं दद्यु मित्रारि स्वगृहोद्भवं॥१॥ धनदो यस्करो यस्य तु
गे बलसमान्वितः॥ भवेज्जन्मनि तस्य स्याद्वित्तमात्मोद्यमार्जितं॥ लाभार्थलग्न
गै सौम्यैर्येन येनैव कर्मणा॥ धनार्जनं प्रार्थयिते तेन यत्नात्समश्नुते॥ इति॥ इति
महाधरकृते जातकविवरणे कर्माजीवाध्यायो दशमः॥१०॥ ॥श्री॥ ॥श्री॥
अथ राजयोगाध्यायः॥ तत्र यवनजीवशर्मणो मतं वैतालीयेनाह॥ ॥प्राहुरिति
त्रिप्रभृतिभिरुच्चस्थै नृपवंशभवा भवंति राजान इति सर्वजातकप्रसिद्धं॥ तत्र यव
ना एवमाहुः। क्रूरेषूच्चगेषु राजा भवति परं पापबुद्धिः। अर्थात् सौम्येषु धर्मात्मा मिश्रो
मिश्रः। तथा चत्तं हाक्य॥ पापैः पापमतिः स्यात्स्वोच्चगतैर्धर्मवांस्तथा सौम्यैः॥ व्यामि

१०

कर्मा

छ३आ·भ·भुाष्ण॥

श्रेर्मिश्रिमतिः दृष्टौ ग्रोजायते मनुजइति॥ ॥जीवशर्म मते क्रूरे शुभ वर्गे शुभ राजे वन किंतु तु
तुल्यो धनी॥ तथा च लघुवाक्ये॥ पापैरुच्चगतैर्जातानन्नवंति नराधिपाः॥ किंतु वित्तान्वितास्ते
११ स्युः क्रोधनाकलहप्रिया इति॥ १॥ द्वात्रिंशराजयोगान् वसंततिलकेनाह॥ ॥वक्राकेंति॥
राज कुजशनिरविगुरुभिरुच्चवर्गे भुवः चतुर्णामन्यतमे लग्नगे च चत्वारो राजयोगाः स्युः॥ तेषां म
ध्या त्रिषु च द्वयेषु एकतमे विलग्ने द्वादशराजयोगाः॥ एवं षोडश। द्वयेकेति। तेषां मध्याद्द्वयो
रुच्चयोरेकतमे विलग्ने चंद्रे च कर्कस्थे द्वादशराजयोगाः॥ एषां मेकस्मिन्नुच्चे लग्नगे च
चंद्रे कर्कगे च चत्वारो योगाः॥ एवं षोडश सर्वैः अस्त्द्वात्रिंशराजयोगाः॥ तद्यथा॥ मे
षेर्कः कर्के गुरुः। तुलायां शनिः। मकरे कुजः। शेषाः यथेष्टं। इदं रूपां यद स्थायां मेषलग्ने ए
कः १ कर्के द्वितीयः २ तुलायां तृतीयः ३ मकरे चतुर्थः ४ एवं सर्वैरुच्चैरेकतमे लग्ने चत्वारः॥ त्रि
भिर्द्वादश यथा॥ मेषेऽर्कः। कर्के जीवः। तुलायां शनिः शेषा यथेष्टं। एवं प्रतिमेषलग्ने ए
कः। कर्के द्वितीयः २ तुलायां तृतीयः। सर्वैरेकैः सह अ ७ अथ मेषेऽर्कः। कर्के गुरुः। मकरे कु
जः। शेषा यथेष्टं। एवं प्रतिमेषलग्ने एकः। कर्के द्वितीयः। मकरे तृतीयः ३ एवं सर्वैः सह १० ॥२७॥
दश॥ अथ मेषेऽर्कः। तुलायां शनिः। मकरे कुजः। शेषा यथेष्टं॥ एवं प्रतिमेषलग्ने एकः॥ तुला
यां द्वितीयः। मकरे तृतीयः॥ ३॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

एवं सर्वैः सह त्रयोदश॥ १३॥ अथ कर्के गुरुः॥ तुलायां शनिः॥ मृगे कुजः। शेषा यथेष्टं॥ एवं प्र
ति कर्के एकः। तुलायां द्वितीयः। मकरे तृतीयः। एवं सर्वैः सह षोडश॥ ॥ अथ द्वयेकेति यथा
॥ मेषेऽर्कः कर्के जीवेंदू। शेषा यथेष्टं॥ एवं प्रति मेषलग्ने एकः। कर्के द्वितीयः। २ अथ मेषेऽर्कः
कर्के चंद्रः। तुलायां शनिः। शेषा यथेष्टं॥ एवं प्रतिमेषलग्ने तृतीयः। तुलायां चतुर्थः। अथ मेषे
र्कः। कर्के चंद्रः मकरे भौमः शेषा यथेष्टं। एवं प्रतिमेषलग्ने पंचमः॥ ५ मकरे षष्ठः ६ अथ कर्के
जीवेंदू तुलायां शनिः शेषा यथेष्टं। एवं प्रति कर्कलग्ने सप्तमः॥ ७ तुलायामष्टमः ८॥ अथ क
र्के जीवेंदू मकरे कुजः शेषा यथेष्टं। एवं कर्कलग्ने नवमः। ९ मकरे दशमः॥ १० अथ कर्के चंद्रः तु
लायां शनिः मृगे कुजः शेषा यथेष्टं। एवं प्रति तुलाग्ने एकादशः ११ मकरे द्वादशः। १२ एवं
द्वाभ्यां ते तिगतं॥ एकाभिनेयथा॥ कर्के चंद्रे मेषेऽर्के लग्नगे एकः १ कर्कलग्नगयोर्जीवेंद्वोर्द्वि
तीयः॥ कर्के चंद्रे तुलालग्नगे शनौ तृतीयः॥ ३ कर्के चंद्रे मकरलग्नगे कुजे चतुर्थः ४ एवं सर्वैः कै र्वा
दशभिः षोडश १६॥ एवं षोडशद्वये द्वात्रिंशद्राजयोगाः॥ ३२॥ ॥२॥ चतुस्त्रिंशद्राज
योगाननुष्टुभाह॥ वर्गोत्तमेति॥ जन्मलग्ने स्वनवांशगते चंद्रे वा नैश्च तुर्भिः पंचभिः षड्भिर्वा

१९ राज

ग्रहैर्दृष्टे द्वाविंशतिराजयोगाः। चोरः पत्रपलुमावादृशो नराधिपः॥ एवं चंद्रेव वर्गोत्तमगते द्वाविं
शतिः एवं चतुश्चत्वारिंशत्॥ लग्ने चंद्रेण चतुर्भिः दृश्यमाने पंचदशभेदाः॥ पंचभिर्दृश्यमाने षड्
भिर्दृश्यमाने एकः १ एवं द्वाविंशतिर्यथा॥ लग्ने चंद्रे वा रविकुजबुधगुरुभिर्दृश्यमाने एकः
१ रविसोमबुधसितैर्दृष्टे द्वितीयः। शनिकुजबुधशनिभिस्तृतीयः ३ रविकुजगुरुसितैश्च
तुर्थः ४। रविकुजगुरुशनिभिः पंचमः ५ रविकुजसितशनिभिः षष्ठः ६ रविबुधगुरुसितैः
सप्तमः ७ रविबुधगुरुशनिभिरष्टमः ८ रविबुधसितशनिभिर्नवमः ९ रविसितगुरुशनि
भिर्दशमः १० कुजबुधगुरुशुक्रैरेकादशः ११ कुजबुधगुरुशनिभिर्द्वादशः॥ १२॥ कुजबुधसि
तशनिभिस्त्रयोदशः १३। कुजगुरुसितशनिभिश्चतुर्दश॥ १४ बुधगुरुसितशनिभिः पंचदश
१५ एवं चतुर्दृष्टे पंचदशभेदाः॥ अथ पंचदृष्टिभेदाः। रविकुजबुधगुरुशुक्रैरेकः १ रविकुज
बुधगुरुशनिभिर्द्वितीयः २ रविकुजबुधसितशनिभिस्तृतीयः ३ रविकुजगुरुसितशनिभि
श्चत्वारः ४ रविबुधगुरुसितशनिभिः पंचमः ५ कुजबुधगुरुसितशनिभिः षष्ठः ६। एवं
पंचदृष्टे षड्भेदाः॥ इत्येकैः अष्टएकविंशतिः २१। रविबुधसोमगुरुसितशनिभिः षड्भिरेकः १॥
एवं द्वाविंशतिराजयोगाः। लग्नाच्चंद्रादप्येवं द्वाविंशतिः॥ २२॥ एवं चतुश्चत्वारिंशत्॥ ४४॥ ८

॥३८॥

वं लग्ने प्रतिराशिवर्गोत्तमगे गगनचारी चतुराद्याधिकं शत हये योगाः भवन्ति॥ एवं चंद्रेपि भिलि
त्वा ऽष्टाविंशत्यधिकापंचशतानि च पयोगं भवंति॥ ७॥ पंचयोगानृषिः स्वरिरपाह॥ ॥ स्वमं कुंभ
इति॥ कुंभे शनिः मेषेर्कः वृषे चंद्रः मिथुने बुधः सिंहे गुरुः वृश्चिके कुजः इत्यं ग्रहस्थितौ कुंभलग्ने कुंभ
ग्ने एकः ११ मेषे द्वितीयः २ वृषे तृतीयः ३ किंच तुलायां शनिः वृषे चंद्रः। कन्यायां मकरे बुधो
तुलायां शुक्रः मेषे कुजः कर्के गुरुः एवं ग्रहस्थितौ तुलालग्ने एको योगः॥ १ वृषे द्विती
यः २ इत्येवं त्रिभिः सह पंच ५ तदुक्तं॥ तुलालग्नेसितसौरौ मेषेसोमो गुरुः कुलीरगतः
॥ कन्यायां रविराशिजो जातो नृपतिर्वृषे चंद्र इति॥ ५॥ राजयोगत्रयं शिखरिपाद॥ कु
जेलुंगेद्विति॥ मकरे कुजः चापे केंद्रे चंद्रो लग्ने शनिः। यद्यपि सामान्येनोक्तं तथापि म
करलग्ने शनिरिति ज्ञेयं॥ तदापि नृपतिः। तदुक्तं॥ आदित्यश्च निशाकरश्च भवतो वागीशा
राशौ यदा प्राईरस्फुरिणाप्रवीर्यप्रहितः श्रामोम्टगेमंगलः॥ प्राप्नोतीदृग्वंशदा अस्तुरुत
नृपालचूडामणि नश्यंति पतिपक्षिणो रणमुखे यस्याक्रुतां नादिवेति॥ किंच॥ अस्मिन्नेव यो
गे स्पचंद्रे कुजे लग्नगे राजा॥ अपमर्थः॥ मकरलग्ने कुजचंद्रौ धनुषि रविस्तदा राजेति॥ २॥ प्रस
मौ शनिचंद्रौ चापे गुरुः मेषलग्नस्थेनत्राक्रस्तदा तृतीयराजयोगः॥ ३॥ ५॥ योगद्वयं पुकराह॥
वृषे भेद विति॥ वृषेजन्मलग्ने चंद्रः। सिंहेर्कः। वृश्चिके गुरुः कुंभे शनिः। तदा राजा॥ १ तथाम

कर्केजन्मलग्नेशनिः मीनेचंद्रः। मिथुनेकुजः। कन्यायांबुधः। चापेशुक्रः। रविश्चेद्यधि
ष्ठः। तदाद्वितीयोराजयोगः॥ तदुक्तं॥ मृगेलग्नेभौमे स्थितमिथुनगतः शीतकिरणः कुजोथ
१२ मेस्वोच्चेशनिरणुकमृतस्वापधराः॥ गुरुर्दैत्येज्याकैर्वनिमतगतोवारवशानः प्रथस्तौ यस्
राज॰ माश्रौ भवतिनरपतिश्चारुमहद्धराद्यति॥६॥ राजयोगत्रयंपुनराह॥ ॥कुर्येश्रेदाविति॥
मीनेजन्मलग्नेशुक्रः दशमोगुरुचंद्रौ। मेषेकुजः १ तदैकोयोगः। कन्यालग्नेबुधः। चतुर्थोगुरुचं
द्रौ॥ पंचमोकुजस्तदाद्वितीयः॥२॥ कन्यालग्नेबुधः। पंचमोशनिकुजौ चतुर्थोगुरुचंद्रशुक्राः॥
तदातृतीयोराजयोगः॥३॥७॥ पुनर्योगत्रयमाह॥ ॥कुषेश्रेंदाविति॥ मीनेजन्मलग्नेचंद्रः कुं
भेशनिः। मकरेकुजः सिंहेर्कस्तदैकोयोगः। मेषलग्नेकुजः कर्केगुरुस्तदाद्वितीयः॥२॥ कर्कलग्नेगु
रुः। दशमः कुजस्तदातृतीयः॥३॥ एकंराजयोगंमणिबंधेनाह॥ ॥कर्किणीति॥ कर्केजन्मलग्ने
गुरुः चंद्रशुक्रबुधाः वृषस्थाः मेषेर्कस्तदानृपतिः स्यात्॥९॥ एकंनृपयोगंद्रुतपदेनाह॥ ॥मृग
मुखमिति। मकरेजन्मलग्नेशनिः मेषेकुजः कर्केचंद्रः सिंहेर्कः मिथुनेबुधः तुलायांशुक्रः जी
वोयद्येवं। तदानृपतिः॥१०॥ एकंनृपयोगमनुष्टुभाह॥ ॥स्वोच्चेइति॥ कन्यालग्नेजन्मलग्ने ॥२८॥
बुधः। मिथुनेशुक्रः मीनेगुरुचंद्रौ मकरेशनिकुजौ॥ अथवा द्रौविव्ययेतदाराजयोगः॥११॥ राज
वंशजानामेवराजयोगंचतुर्भिःप्रतिज्ञामाह॥ ॥अपिखलेति॥ ॥एतेषूक्तेषुराजयोगे

षु जाताः अन्यवंशजा अपिराजानः स्युः॥ अथराजवंशजानांकिमुवक्तव्यं॥ वक्ष्यमाणयो
गेस्तुनृपवंशजाएवनृपाभवंति॥ अन्यकुलजानृपतुल्याः स्युः॥१२॥ एकंयोगमौपच्छंदसि
केनाह॥ स्वोच्चस्थेति॥ त्रिषुचतुर्षुवाग्रहेषुस्वोच्चगेषुमूलत्रिकोणगेषुवाकालाढ्येबलि
युक्तेषुवा अन्यनृपकुलजाःनृपाःस्युः पंचसुषट्सुग्रहेषुवास्वोच्चगेषुवामूलत्रिकोणगेषु
वाबलिषुअन्यकुलोत्था अपिनृपाःस्युः॥ स्वोच्चगेषुत्रिकोणगतेष्वपित्रिषुकालाढ्ये
बलियुक्तेष्वपि नेषुनृपकुलजा अपिनृपानभवंति। किंतुधनिनः॥ अयोकर्कस्थयोस्त्रिकोणग
योर्बलिनोरेकस्मिन्नपितथात्वेनैवधनवानेव॥१३॥ राजयोगमेकंविद्युन्मालयाह॥ ॥
लेखास्थइति॥ लेखाउदयलेखातत्रस्थेर्के १ द्वेदित इत्यर्थः। अयमर्थः। यदामेषलग्नेचं
द्रः अर्कोदितजातुमकरेकुजः कुंभेशनिः चापेगुरुः तदाराजपुत्रोनृपतिः स्यादसौधनी
ल अत्रलेखस्थेर्केइतिपाठेसिंहस्थसूर्यस्तदाधिराजा॥१४॥ पुनरेकंविद्युन्मालयाह॥ ॥स्वोच्चेइ
ति॥ स्वराशिगः शुक्रश्चतुर्थः। नवमश्चंद्रः। लग्नतृतीयेकादशगाःशेषाःस्तदाराजयोगः। अय
मर्थः। कुंभेलग्नेवृषेशुक्रः तुलायांचंद्रः रविकुजबुधगुरुशनयोयथायंरवंमेषकुंभेथ
नुःस्थास्तदाराजपुत्रोराजाश्रमोधनी। अथवाककेलग्नेतुलायांशुक्रः मीनेचंद्रः अन्येक
र्ककन्यावृषस्थास्तदापिराजयोगः॥ एकंयोगंवनमालयाह॥ सौम्येवीर्येति। कालादिब

११
राज॰

लयुतो बुधो लग्नेस्थशुक्रजीवास्पतमोवली नवमे शुक्र एव यातइति पाठे चतुर्थशेषा नव द्वितीयो
पचये शुभयथा मंबवंतदान्टपजोराजाऽत्र स्योधनी॥१६॥ योगद्वयं वेशास्थेनाह॥ वृषोदयइति
॥वृषेजन्मलग्नेचंद्रः मिथुनेगुरुः तुलायांशनिः मीनेरविभौमबुधशुक्राः॥ तदाराजपुत्रोराजाऽत्र
स्योधनी॥ चतुर्थेगुरुः दशमेचंद्रार्कौ लग्नेशनिः एकादशेकुजबुधशुक्राः तदाधिराजा॥१७॥ योग
द्वयं वक्ष्यंस्तिलकेनाह॥ मेषूरणेति। दशमेचंद्रः एकादशेशनिः लग्नेगुरुः द्वितीयेबुधभौमौ। चतु
र्थेशुक्रार्कौ तिदेवो योगः। लग्नेकुजशनी। चतुर्थेचंद्रः सप्तमेगुरुः नवमेशुक्रः दशमेऽर्कः एकादशे
बुधः तदाद्वितीयः॥२॥ अनयोर्नृपजोराजाऽन्योधनी॥१८॥ उक्तयोगेषुजातानां कदाराज्याप्ति
स्तस्वागतयाह॥ कर्मलग्नेति॥ योगकर्तृग्रहाणांमध्याद्योदशमस्थोलग्नस्थो वा तस्य पाकद
शायामंतर्दशायां राज्याप्तिः॥ यदा लग्नदशमयोर्द्वयोरपि ग्रहौ स्तः एकस्मिन्द्वयो वा बलि
ष्ठस्तदा तेषु बलवतोंऽतर्दशायां राज्याप्तिः॥ लग्नदशमयोर्ग्रहशून्ययोः किं कार्यमत आ
ह॥ अथवेति॥ यदा लग्नदशमे शून्ये तदा सर्वग्रहेषु यो बली तदंतर्दशायां राज्यं॥ बलव
त एव बहुषु तद्दशासु यत्रांतर्दशाकाले चारवशादतिबलवत्त्वं तत्र राज्यं॥ प्राप्तराज्यस्य
नाशमाह॥ शत्रुनीचेति॥ तत्र राज्यस्य जन्मकाले शत्रुक्षेत्रस्थे नीचराशिगे न चायांत ॥४०॥
र्दशादशा तस्यां तस्मिन्चारवशात्खबले राज्यहरत्वं वाच्यं॥ स्वाच्छिद्रैर्दशा ज्ञेया॥

१२

पुनश्चारवशात्तस्मिन्बलरहिते प्रतिच्छिद्रदशा एवं प्रत्यंतर्दशा ज्ञेया॥ तस्यामन्यस्य दैव
युक्तनृपस्य प्रत्ययाच्छत्रुनाशोऽपि स्यात्॥ तथोक्तं गार्गिणा॥ लग्नगः कर्मगो वा स्याद
थवा प्रबलोपि यः॥ तस्यान्तर्दशाकाले राज्यदः प्रबलो यदा॥१॥ नीचारिगृहसंस्थस्य
दशायां प्रबलस्य च॥ च्युतिर्बलविहीनस्य तन्नाशो बलसंश्रयात्॥२॥ योगिनां शब
रदस्युस्वामिनां च जन्मकालं माक्षिस्याह॥ ॥गुरुसितेति॥ लग्नेगुरुः शुक्रबुधानामन्य
तमः सप्तमेशनिः दशमेऽर्कः तदा योगिनां जन्म यतस्तातो राज्याप्तिस्तस्य॥ दशमेऽर्के
बुधो लग्ने न स्यात्तथापि लवशात्त्वानुसारेणोक्तत्वाददोषः॥ तदुक्तं॥ गुरुशुक्रौ लग्नेच
सप्तमस्थेऽर्कनंदने॥ दशमस्थे रवौ जातो भोगवान्पुरुषो भवेदिति॥ अन्येति॥ अन्ये ग्रहाः केंद्र
धिनो ये राशयस्ते च बलयुक्ता यदि केंद्रगा भवंति॥ पापापापराशिगाश्च तदा जातो मित्रा
नां चौराणां स्वाम्यमाप्नोति बलवांश्च॥ तदुक्तं॥ पापक्षेत्रगतैः पापैः केंद्रस्थैः सौम्यराशि
भिः॥ सबलैर्जन्म यस्य स्यात्तस्करस्य नायकइति॥ इति महीधरकृते जातकविवरणे
राजयोगाध्याय एकादशः॥११॥ ॥७॥ अथ नाभसयोगाध्यायः॥ नाभसयोगानां चत्वा
रो विकल्पाः॥ आकृतियोगाः॥१॥ संख्यायोगाः॥२॥ आश्रययोगाः॥३॥ दलयोगौ चेति॥४॥ तत्र विंश
तिराकृतियोगाः॥ सप्तसंख्यायोगाः॥ त्रयः आश्रययोगाः॥ द्वौ दलयोगौ॥ ॥तत्र द्विचतु

विकल्पानां संख्याज्ञानमौपम्यं दर्शिकेनाह ॥ नवदिगिति ॥ नवदशाष्टौ ९।१०।८। एते यथा

क्रमं त्रित्रिचतुस्त्रि ३।३।४। गुणिताः संतो द्वित्रिचतुर्विकल्पजाः संख्यास्तु ॥ २७।३०।३२ इति ॥

४२ अयमर्थः ॥ आकृतियोगाः २० संख्यायोगाः ७। एतद्विकल्पद्वयेन समाविंशतिः २७ आश्रय

राज० योगाः ३ तद्योगे त्रिंशत् ॥ ३० दलयोगौ द्वौ एतद्योगे द्वात्रिंशत् ३२। एवं द्वित्रिचतुर्विकल्पजा योगास्तु ॥ य

वनैः पुनस्त्रिगुणाष्टशतानि अष्टादशशतानि योगा विस्तारेण कथिताः १८०० तत्र ते आकृ

तियोगास्त्रयोविंशतिः ॥ २३। संख्यायोगाः सप्तविंशत्यधिकं शतं १२७ तद्योगे सार्द्धशतं जातं

१५० तदेकैकं राशीलग्नमधिकृत्योक्तं तस्माद्द्वादशगुणितं जातं गुणितं सहस्रद्वयं शतानि नव

ति १८०० एवं यवनैस्त्रिगुणाष्टशतानि विस्तारेणोक्तं ॥ अत्र शास्त्रे तत्समानस्तस्याविस्तारस्य सं

क्षेपः कथ्यते ॥ द्वात्रिंशद्योगेष्वेवाष्टादशशतान्यंतर्भवंति ॥ तत्फलत्वेऽपि फलसमानात् ॥ ९ अथा

श्रययोगत्रयं दलयोगद्वयं चोपजातिकेनाह ॥ ॥ रज्जुरिति । चरस्थिरद्विस्वभावगेषु हेर्ये यथाक्रमं

रज्जुमुशलनलसंज्ञा नलसंज्ञा नाश्रययोगाः यवनाचार्यकृताः ॥ अयमर्थः । एकस्मिन् चरराशौ

शौ चरराशिद्वये चरराशित्रये चरराशिचतुष्टये वा यदा सर्वे ग्रहाः स्थिराद्विस्वभावाश्च शून्या

स्तदा रज्जुयोगः । एवं स्थिरराशावेव सर्वे अन्ये शून्यास्तदा मुशलयोगः ॥ २ एवं द्विस्वभावराशौ यदा ॥४९॥

सर्वे तदा नलयोगः ॥ ३ तथा च सत्यः । सर्वैश्चरेषु राशिषु यदा स्थिता योगमाहुस्तं रज्जुं ॥ अनयापि

सत्य मतं विदेशवासार्थं कुर्कस्य ॥ १ ॥ सर्वैः स्थिरेषु राशिषु यदा स्थिता मुशलमाहुस्तं योगं ॥ जन्मनि

कर्मकारणां पुरुषाणामर्थमानाख्यं ॥ २ ॥ द्विशरीरेषु नलइति योगोऽङ्गहीनातिरिक्तदेहाणां ॥ नि

पुणानां पुरुषाणां धनसंचयशालिनां भवतीति ३। अत्र केचिदाहुः ॥ चरचतुष्के सर्वे रज्जुः ॥

स्थिरचतुष्के मुशलं । द्व्यंगचतुष्के मुशलं इति ॥ तदयुक्तं ॥ यतो गार्गिः ॥ एकोऽपि वा त्रयः सर्वे वा ।

सर्वे यदैव तुल्ताः । चरयोगास्तदा रज्जुः स्यात् धनोजन्मदोऽजबेल्व ॥ १ ॥ स्थिराश्चेन्मुशलं नाम मानिनोज

न्मलक्षणं ॥ द्विस्वभावेन नलाख्यस्तु धनीनो परिकीर्तित इति ॥ केंद्रे इति ॥ शुभाशुभयुतैः केंद्रे

र्मालाख्यसर्पाख्यौ दलयोगौ पराशरेणोक्तौ ॥ अयमर्थः ॥ ये शुभास्ते त्रिषु केंद्रेषु यदा शुभयुक्ता

कास्तु नकुलाख्येपि केंद्रे पापस्तदा मालायोगः । अथ ये शुभास्त्रिषु केंद्रेषु रावेश लिङ्गजाः नकुला

पिकेंद्रे सौम्यस्तदा सर्पयोगः ॥ ननु चंद्रोपि शुक्लपक्षे शुभः कृष्णपक्षे पापः तद्योगादपि माला

सर्पत्वं चतुष्केंद्रेषु भवतु । त्रिषु केंद्रेषु इति कृतो व्याख्यातं । यतो गार्गिः ॥ केंद्रत्रयं स्थैर्यमार केंद्र

सार्पेऽडिःखितकृन्मदः ॥ सौरीजन्मप्रदा मालातद्भोगी चक्षितेंदु जरिति ॥ पाराशरोपि ॥ केंद्रत्रय

गतैः पापैः सर्पो सौम्यैर्दलसंज्ञितौ ॥ द्वौ योगौ सर्पमालाख्यावनिष्टेष्टफलप्रदाविति ॥ २ ॥ आ

श्रयदलयोगाः सत्यपरमतेनोक्तास्तत्र स्वमताभावे कारमुपजात्याह ॥ ॥ योगाव्रजंतीति

रज्जुमुशलनलयोगा आकृतियोगेषु यवपद्मवज्रविहगगोलकेदारदिषु दाशाकूटाख्यो गोल

युगशूलकेदारे संख्यायोगेष्व याद्रूपं प्राप्नुवंति त्यस्मैनोक्ताः । दलयोगौ मालासर्पाख्यौ तु कें

द्गतग्रहफलेन पुनरुक्तौ। ततोऽन्यैर्नोक्तौ॥ तदुक्तं॥ केंद्रत्रिकोणेषु शुभाः षडष्टान्त्ये चैव पापा
न्शुभप्रदास्युरिति। तर्हि त्वया किमित्युक्तौ॥ नामसंज्ञा विज्ञोपादित्येवमाह॥३॥ अथाकृतियो
१२ गान्यं गदाशकटविहगशृंगाटकहलाख्यान्वर्णयंस्तिलकेनाह॥ ॥आसन्नेति॥ निकटवर्त्तिके
न्द्रद्वये सर्वैर्गदायोगः। स चतुर्विधः। लग्नचतुर्थगैः सर्वैरेकः१ चतुर्थसप्तमे द्वितीयः। सप्तम
राज दशमे स्तृतीयः। दशमलग्नगैश्चतुर्थः।४। इति।१। लग्नसप्तमगैः सर्वैः शकटयोगः॥२॥ दशम
चतुर्थैः सर्वैर्विहगयोगः॥३॥ नवमपंचमलग्नस्थैः सर्वैः शृंगाटकयोगः॥४॥ लग्नवर्ज्यैः सर्वैः पर
स्परत्रिकोणगैर्हलयोगः॥५॥ स त्रिविधः। द्वितीयषष्ठदशमैः सर्वैरेकः१ तृतीयसप्तमैकादशैर्द्विती
यः।२। चतुर्थाष्टमद्वादशैस्तृतीयः।३। इति॥४॥ वज्रयवपद्मवापीसंज्ञं योगचतुष्टयं वैता
लीयेनाह॥ ॥शकटांडजेति॥ शकटयोगवत्स्थितैः शुभैर्विहगवत्स्थितैः पापैर्वज्रयोगः॥१॥
अयमर्थः। लग्नसप्तमयोः सौम्याश्चतुर्थदशमयोः पापाः नान्यत्र केचित्तदा वज्रयोगः॥ तद्वि
परीतैर्यवं इति। लग्नसप्तमयोः पापाश्चतुर्थदशमयोः सौम्यास्तदा यववयोगः॥ मिश्रैः कम ॥४२॥
लमिति। शुभैः पापाश्च मिश्राः प्रत्येकं चतुर्केंद्रगास्तदा पद्मयोगः। तदेव कमलं केंद्राद्बाह्यगैर्वापीयो
गः। स द्विविधः। पणफरस्थैः सर्वैरेकः।१। आपोक्लिमगैर्द्वितीयः।२॥५॥ वज्रयवयोर्दूषणं व
क्तुमाह॥ ॥पूर्वशास्त्रेति। वज्रयवौ मयययनौ ऊचुः कुतः अभ्यासोक्तौ॥ यतो रवेर्बुधशुक्रौ शिशो
सर्वपक्षावधौ बुधशुक्रौ न नयनतरावा। वक्तुवचनमन्येषामीदृशानामुपलक्षणं।६। अथ यूपेषुश

क्तिदंडाख्ययोगचतुष्टयमनुष्टुभाह॥ ॥कंटकेति॥ लग्नाद्यैः केंद्रैः कृत्वा केंद्रादिरुश्चतुर्गृहगैः
सर्वैर्ग्रहैर्यूपादयः स्युः॥ तथाहि॥ लग्नद्वितीयतृतीयचतुर्थगैः सर्वैर्यूपः।१। चतुर्थपंचमषष्ठसप्त
मस्थैः सर्वैः शरयोगः।२। सप्तमाष्टमनवमदशमस्थैः सर्वैः शक्तियोगः।३। दशमैकादशद्वादशल
ग्नस्थैः सर्वैर्दंडयोगः॥४॥७॥ नावादियोगपंचकमाह॥ ॥नौकूटेति॥ तदङ्कर्लग्नादिकेंद्रेभ्य आर
भ्य सप्तसप्तस्थानस्थैः सप्तग्रहैर्नावादियोगचतुष्टयं भवति॥ अयमर्थः॥ लग्नद्वितीयतृतीयचतुर्थ
पंचमषष्ठसप्तमेषु यदा सर्वे ग्रहास्तदा नौयोगः॥१॥ एवं चतुर्थादिदशमांतेषु यदा सर्वे तदा कूट
योगः। सप्तमादिलग्नांतेषु यदा सर्वे तदा छत्रयोगः॥३॥ दशमाद्यचतुर्थांतेषु यदा सर्वे तदा चापयो
गः॥४॥ अर्धचंद्र इति। नावाद्यैर्नावाद्यव्यतिरिक्तेषु स्थितैरर्धचंद्रयोगः॥ तद्यथा॥ पणफरेभ्य
आपोक्लिमेभ्यो वा रम्यनिरंतरं सप्तगृहेषु यदा सर्वे ग्रहास्तदार्धचंद्रयोगः॥ सोऽष्टविधः। द्वितीया
द्यष्टमांतेषु यदा सर्वे तदैकः।१। तृतीयादिनवमांतेषु सर्वे द्वितीयः।२ पंचमादिरेकादशांतेषु सर्वे स्तृती
यः।३। षष्ठादिद्वादशांतेषु सर्वेश्चतुर्थः।४। अष्टमादिद्वितीयांतेषु सर्वैः पंचमः।५। नवमादितृतीयां
तेषु सर्वैः षष्ठः।६। एकादशादिपंचमांतेषु सर्वैः सप्तमः।७। द्वादशादिषष्ठांतेषु सर्वैरष्टम इति
॥८॥ योगद्वयमाह॥ ॥एकांतरेति॥ द्वितीयस्थानादेकांतरं षड्गृहस्थितैः समुद्रयोगः। लग्ना
देर्वक्रं॥ तद्यथा॥ द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशेषु यदा सर्वे तदा समुद्रयोगः। लग्नात्तृतीय
पंचमसप्तमनवमैकादशेषु यदा सर्वे तदा चक्रयोगः॥ एवमाकृतिजा विंशतियोगा उक्ताः॥ ॥२०॥

२२

राज॰

संख्यायोगानाश्रित्याह॥ ॥संख्येति॥ सप्तर्क्षगैः सप्तादि ६ स्थानेषु ग्रहैरेकैकापगमाद्वल्ल-
क्यादयः सप्त योगाः स्युः तद्यथा॥ सप्त स्थानेषु सर्वैर्वल्लकी योगः १ षट्सु दाम योगः २
पंचसु पाशः ३। चतुर्षु केदारः ४ त्रिषु शूलः ५ द्वयोर्युगः ६ एकस्मिन्गोलः ७॥ परं तूक्तनाभसयोगानां सं-
भवे तु नैते योगाः संख्यायोगमात्रेऽपि पूर्वोक्तयोग एव ग्राह्य इति संख्यायोगा इत्यर्थः॥१०॥ अथा-
श्रययोगत्रयजातानां दलयोगद्वयजातानां च फलं वसंततिलकेनाह॥ ॥ईर्ष्युरिति॥ रज्जुयोगे जातः
परार्द्धिमत्सरः। परदेशगमनी। सततमटनशीलः स्यात्। १। मुशलयोगजस्तु गर्वितः वित्त-
वान् बहुकर्मनिरतशीलः २। नलयोगे अंगहीनः दृढनिश्चयः। धनवान्। कार्येषु सूक्ष्मदृष्टिः
३। दलयोगफलमाह॥ स्रगिति॥ मालायोगे भोगी सुखी ४। सर्पयोगे नानादुःखभागी॥११॥ अ-
थाश्रययोगानामन्ययोगमिश्रत्वे आश्रयफलमनुष्टुभाह॥ ॥आश्रयोक्ता इति॥ आ-
श्रययोगाः रज्ज्वादयो ये वर्णितास्ते मिश्राः साहचर्यगताः सन्तो निःफलाः स्युः। यैः सह मिश्रास्त एव
फलदाः॥ यद्यन्यैरमिश्रास्तदा स्वफलदाः॥ चरराशौ लग्नगे स्थिरद्विस्वभावस्थैर्द्विस्वभावबल-
गैश्चरस्थिरगैर्ग्रहैरमिश्रत्वमित्यर्थः।१२। गदादियोगपंचकफलं वसंततिलकेनाह॥ ॥य- ॥४२॥
ज्वेति। गदायोगे यजनशीलः। धनी। धनार्जने धर्मशीलश्च।१। शकटयोगे तद्वृत्तिर्युक्। शक-
टजीवीत्यर्थः। रोगी। कुत्सितभार्यश्च २। विहगयोगे दूतकर्म्मभ्रमणशीलः कलहकृच्च। नेतुर्दूतेनाप्य- १
टनेनानाव्येनर्थैटनपदव्यर्थं॥ सत्वं। परेच्छायागमागमशीलो दूतः स्वेच्छयात्वटनः॥ तन्नेयम्भो-

गीत्यर्थः। शृंगाटकयोगे चिरेण सुखी वयोन्त्ये सुखभागीत्यर्थः। चिरकालं सुखीति कश्चित्तन्न॥
यतो गार्गिः। लग्नपंचमसप्तमस्थैर्योगः शृंगाटको मतः॥ वयोन्तेषु सुखी नो जन्मे तत्र स्यात्स्वादुना वि-
नामिति।४। हलयोगे कृषिकरः।५।१३॥ वज्रादियोगचतुष्कफलं तेनैवाह॥ ॥वज्रेंत्येति। वज्रयो-
गे बाल्ये वार्द्धके च सुखी॥ यौवने दुःखीत्यर्थः। जनप्रियः। युद्धे शूरश्च १। यवयोगे पराक्रमी। यौवने
सुखी॥ अन्तर्मध्यं २ पद्मयोगे प्रसिद्धकीर्त्तिः अपरिमितं सुखं। गुणाश्च विद्याशौर्यादयो यस्य स ३
वापीयोगे स्वल्पं चिरकालिनं सुखं यस्य स भूमौ धनस्थापनशीलः कृपणश्च ४।१४। यूपादिचतुष्कफ-
लमाह॥ त्यागेति॥ यूपयोगे दाता अप्रमादी। श्रेष्ठयज्वा कर्त्ता च १। शरयोगे वधशीलः बंधनागाराधि-
कारी॥११॥ शक्तियोगे ऽनुचितकारी कर्मस्वपटुः दुःखी निर्द्धनश्च।१२। दंडयोगे पुत्रादिहीनः नीचद्यतिश्च
सेवया जीवतीत्यर्थः।१३।१५। नावादिचतुष्कफलमाह॥ ॥कीर्त्येति॥ नौयोगे कीर्त्तिमान् कदाचि-
त्सुखी। अदाता च।१६। कूटयोगेऽनृते प्रवणा मतिर्यस्य सः मिथ्याभाषीत्यर्थः॥ कारागाराधिकारी च।
सुखी। बाल्यवार्द्धके सुखी।१५। चापयोगे सुखप्रियः॥ बाल्यवार्द्धकयोः सुखी च।७॥१६॥
१५। छत्रयोगे स्वजनानां सुखकरः वार्द्धके सुखी।१५। चापयोगे सुखप्रियः॥ बाल्यवार्द्धकयोः सुखी च।१७॥
अर्द्धचंद्रादिचतुष्कफलमाह॥ ॥अर्द्धेति॥ अर्द्धचंद्रयोगे सर्वजनप्रियः दर्शनीयः। सर्वजनपूज्यश्च।१८॥
समुद्रयोगे राजतुल्यः भोगवांश्च।१९। चक्रयोगे नृपमौलिवितश्चक्रवर्त्तीत्यर्थः। तपोज्ञानादियोगा न्नृप
पूज्यो ना॥२०॥ एवमाकृतियोगफलमुक्त्वा संख्यायोगफलमाह॥ वीणेति॥ वीणायोगे सूक्ष्मदृष्टिः गी-
तप्रियः नृत्यप्रियश्च।१। दामन्यादियोगचतुष्कफलमाह॥ ॥दातेति॥ दामयोगे उदारः परोप-

कारनिरतः पशूनांपालकश्च।२। पापयोगे धनार्जनैर्विशीलः अथ न्मार्गेण धनार्जकइत्यर्थः॥
तथा पितृन्मातृबांधवांश्च आस्याद्वाकारा।३। केदारयोगे करमाणकरः॥ बहूनामुपकारी॥४। शूल
योगेयुद्धप्रियः शस्त्रयुक्तः अर्थयुतः दरिद्रश्च।५॥१८॥ युगगोलयोः फलं नाभसयोगानां सर्वदिशास्व
पि फलदातृत्वं चाह दिशत्याह॥ ॥धनविरहितेति॥ युगयुगे निर्धनोवेदमार्गत्यक्तश्च।१ गोलयोगे निर्धनः
मलिनांगो मलिनवस्त्रः सर्वलोकनिंद्यः॥ शिल्पकर्त्ता कुमती पटुः भ्रमणशीलः॥ नन्वत्र योगफलस्य तीव्र
रुद्धत्वम्यते॥ यद्यपि स्वरूपेणालस्यस्तथापि भोजनस्याटनं। विना भूपाद यितुमशक्नोरटनं॥७। एवंफ
लेऽपार्द्धनानसोः योगाउक्तास्तेसर्वे केशाणांदशास्तु स्वकार्यं फलं ददाति॥ तेयोगाः द्रष्टाइछकवर्गफलेतुद
नारो चनभवंति॥ दशापतिर्दशाफलं ददाति। गोचरे चाष्टकवर्गेछंबु। नन्वेवेनाभसपेस फलं विरुद्ध
दशापतेश्चशुभफलेनतद्वैपरीत्ये वा विरोध इति चेन्न॥ योगानोप्याधिभिराभिन्नयंते॥ मेस्ता। त्रीने
पिद्रष्टा तुमछायाश्रिताः स्तु। रवि सभात्मानंमन्यते॥ इति मिश्रफलानुभवो योगिनां दरिद्राणां च संत
वत्येव॥ अथ वनमनैभाद्वात्रिंशं नाभसयोगाउक्तास्तेकथ्यंते॥ लग्नचतुर्थयोः सर्वैर्गदा।१ तुसप्तमयोः
सर्वैः शंकरः।२ सप्तमदशमयोः सर्वैर्बन्धुः।३ दशमलग्नगयोः सर्वैर्हुजः।४ शंखवक्त्रधजैः सद्दसर्वे
कास्त्रयो विंशतिः अष्टविंशत्युत्तरंशतं संख्यायोगानांयथा॥७।२१।३५।३५।२१।७।१॥ एकादिविकल्पाः
सप्त। द्विविकल्पाएकविंशतिः। त्रिविकल्पाः पंचत्रिंशत्। चतुर्विकल्पाः पंचत्रिंशत्। पंचविकल्पा एकवि
शतिः। षड्विकल्पाः सप्त। सप्तविकल्प एकः। एषामैक्ये सप्तविंशत्यधिकं शतं।१२७ कैवल्यिनयोविंशत्यास
हस्रार्द्धशतं॥१५०॥ राशिद्वादशकेनाष्टादशशतानि भवंति॥ तदुत्पत्तिप्रकारो गोलशास्त्रात् ज्ञेयो विस्त

२२
राज॰

रविचिया नो च्यते। इति महीधरकृते जातकविवरणे नाभसयोगाध्यायो द्वादशः॥१२॥ ॥श्री॥ श्री॥
अथ चंद्रयोगाध्यायः॥ ॥अत्र सूर्यात्केंद्रपणफरापोक्लिमगते चंद्रे फलं मालिन्याह॥ अधमसमव
रिष्ठानीति॥ विनयः सुशीलता वित्तं धनं। ज्ञानं शास्त्रबोधः। धीर्बुद्धिः। नैपुण्यं कार्येषु सूक्ष्मदर्शित्वं। अर्कात्
केंद्रगे चंद्रे विनयादीन्यधमानि। अपचयापोक्लिमबलीत्यर्थः। रवेः पणफरगे चंद्रे तानि समानि स्व
स्थानि कदाचिकानीत्यर्थः॥ रवेरापोक्लिमगे चंद्रे तान्युत्कृष्टानि॥ तदुक्तं॥ सूर्याद्विदराशिश्चपलान्
विशालाश्चंद्रः प्रसूते कर्केचतुष्टयस्थः॥ ऊर्ध्वं द्वितीये धनिनो यस्तु तिमापोक्लिमस्थे चतुरा यजानामिति
॥ अहनीति॥ दिवाजन्मनि यत्रतत्रस्थश्चंद्रो यदि स्वनवांशस्थो धिमित्रनवांशस्थो वा गुरुणा दृष्टश्चे
सदा धनभोगी च॥ रात्रौ जन्मनि तादृशश्चंद्रः शुक्रदृष्टश्चेत्तदा धनी भोगी च॥ तदुक्तं॥ स्वांशेऽधिमित्रस्यां
शे वा संस्थितो दिवसे शशी॥ गुरुणा दृश्यते तत्र जाता वित्तसुखान्विताः॥ निशि चैवं च गुणाद्दृष्टः शुक्रादि
मान्यनिग्रास्यते। विपर्ययस्थे शीतांशौ जायतेऽस्य धनो नरः इति॥ ॥राधियोगं सफलं वसंततिलके
नाह॥ सौम्यैरिति॥ ॥चंद्रात्सप्तमषष्ठाष्टमगैर्बुधगुरुशुक्रैः स्थितैरधियोगः। द्वयोरेकस्मिन् वा स्थाने स्थि
तैरपि॥ तदुक्तं॥ नियतं चूनषष्ठे चंद्रस्थानाद्यदा शुभग्रहैर्युक्तं॥ अधियोगः स प्रोक्तो व्यासेनैत्र समासा
त्सर्वैरिति॥ व्यासतो विस्तारेण समासतः संक्षेपेणेत्यर्थः॥ तद्यथा॥ षष्ठगैः सर्वैः सौम्यैरेकः १ सप्तमे द्विती ४४॥
यः॥२॥ अष्टमे तृतीयः ३ षष्ठसप्तमे चतुर्थः ४ षष्ठाष्टमगैः पंचमः ५ सप्ताष्टमगैः षष्ठः ६ षष्ठसप्ता
ष्टमगैः सप्तम इति॥७॥ अथ द्विवं स्थितैः पापैः पापयोगः॥ मिश्रैर्मिश्रः॥ तदुक्तं॥ षट्सप्ताष्टमगैस्तैश्चंद्रा
त्सौम्यैः शुभोऽधियोगोऽयं॥ पापैः पापैरेवं मिश्रैर्मिश्रस्तथैवोक्त इति॥ ॥अधियोगफलमाह॥ तस्मिन्नि

ति॥ अधियोगजः सेनापतिर्मंत्री नृपो वा स्यात्॥ एतत्फलानां युगपदसंभवाद्वा देवं ज्ञेयं॥ उक्तं हि॥ स्वी
र्यैः सौम्यैर्नृपः॥ मध्यबले मंत्री॥ हीनबलैः सेनापतिरिति॥ नृपादीनामनुत्तमाः अपीह शास्त्रवाक्ये॥ ब
क्रमुखाः॥ बहुकैश्वर्याः॥ नष्टारयः॥ चिरंजीविनः॥ नीरोगाः॥ निर्लिप्ताश्चेति॥ अन्येरेवं राजयोग एवो
क्तः॥ तदुक्तं॥ ध्रुवं चषष्ठसप्तमथाष्टमे शितिरिरगोः प्राप्तास्समस्तो शुभगोप्राः क्रूरा यदि गोचरे नृपतितां
प्राप्नोत्यसौ दूरतः॥ नृपात्यः अत्र वेश्म यस्य जलधेर्वेलावनांतोज्ज्वैः सेनानकरीरदानसलिलं
मेमुकुः पीयते॥२॥ सुनफानफादुरधराकेमद्रुमाख्यं योगचतुष्कं शार्दूलविक्रीडितेनाह॥ हित्वेति॥
रविं विना चंद्राद्वितीयगैर्ग्रहैः सुनफायोगः॥ द्वादशगैरनफायोगः॥ द्विद्वादशगैर्दुरधरायोगः रवि
योगभंगदोऽपरं योगकल्पे भद्रधे नग एप इत्यर्थः॥ एतद्योगत्रयाभावे केमद्रुमयोगः॥ एते योगाः सर्व
संमताः॥ केचिदाचार्यैर्लग्नाज्जौमादिग्रहे केंद्रगे भौमादिग्रहयुते वा चंद्रे केमद्रुमभंग उच्यते॥ चंद्राद
पि केंद्रगे ग्रहे केमद्रुमाभावः॥ तदुक्तं॥ व्ययार्थकेंद्रगश्चंद्राद्विनाभानुं न चेद्ग्रहः॥ कश्चिद्वास्याद्विना चंद्रं ल
ग्नात्केंद्रगतोऽथवा॥ योगः केमद्रुमो नाम तदा स्यादतिगर्हितः॥ जवंतिनंदिताचारा दारिद्र्यमयपञ्चयु
ता इति॥२॥ मतांतरमाह॥ केचिदिति॥ केचिदाचार्याः केंद्रेषु केचिन्नवांशेषु योगत्रयं वदंति॥ तद्यथा
नावागहेश्चंद्राच्चतुर्थगैः सुनफा दशमस्थैरनफा। द्विचतुर्थदशमस्थैर्दुरधरा। अतोऽन्यथा केमद्रुमः॥
॥तथा च श्रुतकीर्त्तिः॥ चंद्रचतुर्थैः सुनफा दशमस्थैः कीर्तितोऽनफा विग्रहैः॥ उभयस्थितैर्दुरधरा केमद्रु
मसंज्ञितोऽन्यथा इति॥ केचिन्नवांशेषु योगत्रयं वदंति॥ यथा॥ यत्रतत्रराशौ यत्रांशे स्थितस्तस्माद्धितीयनवां

त्रो चंद्रस्तस्माद्राशेर्द्वितीयराशौ ताराग्रहे सुनफा। चंद्रनवांशराशेर्द्वादशगे ताराग्रहेऽनफा। चंद्रनवांश
राशेर्द्वितीयद्वादशगे ताराग्रहे दुरधरा। चंद्रनवांशराशेर्द्विद्वादशो यदा स्यात्तदा केमद्रुमः। तथा च
१३ जीवशर्मा। यत्राश्रितश्चंद्रस्त्रिंशांशे नवांशेऽजस्ते निस्थितः तद्द्वितीयस्थे योगः सुनफा स्वयं प्रोक्तोत्तिः॥
चै॰२॰ द्वादशे रनफा ह्येयोग्यद्वे द्विद्वादशस्थिते॥ प्रोक्तो दुरधरा योगोऽन्यथा केमद्रुम इति॥ तन्मतमाश्रम स्मृत ४
हं॥ उक्ताति॥ येषामेवं विधं धर्म मतद्वयं केंद्रत्वेन नवांशत्वेन वा योगत्रयोक्तिस्तेलोकेन प्रसिद्धा इत्यादर
नंगीकृतत्वात्॥ सुनफादीनां संख्यामिंद्रवज्रयाह॥ त्रिंशदिति॥ एकत्रिंशत् सुनफायोगाः तावंत एवा
नफायोगाः अशीत्युत्तरं शतं दुरधराभेदाः॥ इच्छाविकल्पैः परिपाट्या निनाय संख्याय नीते प्रातिनिष्ट्वि
कार्या॥ पुनर्न्यूनोऽस्य नीतः स्थानांतरे चालनं कार्यं॥ अयमर्थः॥ सुनफादयो भौमबुध
गुरुसितासितैः पंचभिर्निष्पद्यंते॥ तस्मादिच्छाविकल्पाः पंच। ते सांप्रतमेः। तत्र नी

५	४	३	२	१
१	२	३	४	५

तावत्पंचाशत्करोक्तविधिना विकल्पसंख्यानयनं॥ तदुक्तं तेन॥ एकाद्येकोत्तराश्चैका
व्यस्ताभाज्याः क्रमस्थितेः॥ परः पूर्वेण संगुण्यस्तत्परस्तत्परेण च॥ एकद्वित्र्यादिभेदाः स्युरिति आधा
रणसमन्वितिः। एकादिका एकोत्तराः व्यस्ताः अंकाः क्रमस्थितैर्भाज्याः लब्धैर्गुणिता मतइत्यर्थः॥॥ ॥८५॥
यथा॥ पंचनामधोऽस्यैकं छेदः॥ तेन पंचानां भागमपहृत्वा वाह्याः पंच ५ तैर्द्वितीयस्थान्तू चतुरः सं
गुण्याधः स्थाप्यांद्वाभ्यां भागे हृते लब्धं दश १० तैस्तृतीयस्थान्त्रीन् संगुण्याधःस्थेत्रिभिर्हृते लब्धं
दश॥ १० तैश्चतुर्थस्थानस्थे द्वे संगुण्याधःस्थेश्चतुर्भिर्हृते लब्धं पंच ५ तैः पंचमस्थानस्थमेकं संगु

श्री

ण्याधःस्थैः पंचभिर्हृते लब्धमेकं १ एवं विकल्पाः॥ ५।१०।१०।५।१। एकादिकयोगाः॥ यथा॥
एकविकल्पाः पंच। द्विविकल्पा दश १०। त्रिविकल्पा दश १०। चतुर्विकल्पा पंच ५। पंचविकल्प एकः १। एवमे
कत्रिंशत्सुनफाः॥ ते यथा॥ चंद्रद्वितीये भौमः १ बुधः २ गुरुः ३ शुक्रः ४ शनिः ५ एवमेकविकल्पाः पंच॥
कुजबुधौ ६। कुजजीवौ ७ कुजशुक्रौ ८। कुजशनी ९ बुधगुरू १० बुधशुक्रौ ११ बुधशनी १२। गुरुशुक्रौ १३।
गुरुशनी १४ शुक्रशनी १५ एवं द्विविकल्पा दश॥ अथ त्रिविकल्पाः॥ कुजबुधजीवाः १६। कुजबुधशुक्राः १७
कुजबुधशनयः १८। कुजगुरुशुक्राः॥ १९। कुजगुरुशनयः २० कुजशुक्रशनयः २१ बुधगुरुशुक्राः २२। बुध
बुध गुरुशनयः। २३ बुधशुक्रशनयः २४ गुरुशुक्रशनयः २५॥ एवं त्रिविकल्पा दश॥ २५॥ अथ चतुर्विकल्पाः
॥ कुजबुधगुरुशुक्राः॥ २६। कुजबुधगुरुशनयः २७ कुजबुधशुक्रशनयः॥ २८॥ कुजगुरुशुक्रशनयः।
२९। बुधगुरुशुक्रशनयः। ३० एवं चतुर्विकल्पाः॥ अथ पंच। कुजबुधगुरुशुक्रशनिभिः पंचावि
कल्प एकः १। ३१। एवमेकत्रिंशत्सुनफायोगाः॥ अनेनैव विधिना चंद्राद्द्वादशस्थैरनफायोगा एकत्रिंश
त् ३१। अथ दुरधरायोगा द्विकल्पाः॥ तत्र विस्ताराभावात्क्रमतो निनीयते॥ न्यायेनोत्पत्तिः॥ एको द्वि
तीये द्वादशे द्वादशे द्वितीयः॥ द्वितीये एको द्वितीयो द्वादशे॥ यथा॥ भौमबुधौ १। बुधभौमौ २। कुजगु
रू ३। गुरुकुजौ ४। कुजशुक्रौ ५ शुक्रकुजौ ६। कुजशनी ७ शनिकुजौ ८। बुधगुरू ९। गुरुबुधौ १० बुध
शुक्रौ ११ शुक्रबुधौ १२। बुधशनी १३ शनिबुधौ १४ गुरुशुक्रौ १५ शुक्रगुरू १६। गुरुशनी १७ शनिगुरू १८
शुक्रशनी १९। शनिशुक्रौ २०॥ अथैको द्वितीये द्वौ द्वादशे द्वितीये द्वौ द्वादशे चैकः॥ तद्यथा॥ कुजौ बु

२७ चंद्र

धज्ञौ वौ १ बुधज्ञी वो कुजः २ कुजौ बुधशुक्रौ ३ बुधशुक्रौ कुजः ४ कुजौ बुधशनी ५ । बुधशनी कुजः ६ कुजौ
गुरुशुक्रौ ७ गुरुशुक्रौ । कुजः ८ । कुजौ गुरुशनी ९ । गुरुशनी कुजः १० कुजः शुक्रशनी ११ शुक्रशनी कु
जः ॥ १२ ॥ बुधः कुजगुरू १३ । कुजगुरू बुधः १४ बुधः कुजशुक्रौ १५ । कुजशुक्रौ बुधः १६ । बुधः कुजश
नी १७ कुजशनी बुधः १८ । बुधो गुरुशुक्रौ १९ । गुरुशुक्रौ बुधः ॥ २० ॥ बुधो गुरुशनी २१ । गुरुशनी बुधः २२
बुधः शुक्रशनी २३ । कुजशनी बुधः २४ गुरुः शुक्रबुधौ २५ ॥ कुजबुधौ गुरुः २६ । गुरुः कुजशुक्रौ २७ ।
कुजशुक्रौ गुरुः २८ गुरुः कुजशनी २९ । कुजशनी गुरुः ३० । गुरुर्बुधशुक्रौ ३१ । बुधशुक्रौ गुरुः ३२ ॥
गुरुर्बुधशनी ३३ । बुधशनी गुरुः ३४ । गुरुः शुक्रशनी ३५ । शुक्रशनी गुरुः ३६ । शुक्रः कुजबुधौ ३७ कुज
बुधौ शुक्रः ३८ । शुक्रः कुजगुरू ३९ कुजगुरू शुक्रः ४० शुक्रः कुजशनी ४१ कुजशनी शुक्रः ४२ शुक्रो बुध
गुरू ४३ । बुधगुरू शुक्रः ४४ । शुक्रो बुधशनी ४५ । बुधशनी शुक्रः ४६ शुक्रो गुरुशनी ४७ । गुरुशनी शुक्र
४८ । शुक्रौ बुधगुरू शनिः कुजबुधौ ४९ । कुजबुधौ शनिः ५० ॥ शनिः कुजगुरू ५१ । कुजगुरू शनि
५२ ॥ शनिः शुक्रौ ५३ । कुजशुक्रौ शनिः ५४ । शनिर्बुधगुरू ५५ । बुधगुरू शनिः ५६ । शनिर्बुधशुक्रौ ५७ ।
बुधशुक्रौ शनिः ५८ । शनिर्गुरुशुक्रौ ५९ । गुरुशुक्रौ शनिः ६० ॥ एवमेकत्र ज्ञातान्यशीतिः ८० ॥ अथै ॥४९॥
कौ द्वितीये ॥ द्वादशे त्रयः । द्वितीये त्रयः एको द्वादशे ॥ तद्यथा ॥ कुजो बुधगुरुशुक्राः १ बुधगुरुशुक्राः
कुजः २ । कुजो बुधगुरुशनयः ३ । बुधगुरुशनयः कुजः ४ । कुजो बुधशुक्रशनयः ५ बुधशुक्रशनयः
कुजः ६ । कुजो गुरुशुक्रशनयः ७ । गुरुशुक्रशनयः कुजः ८ । बुधः कुजगुरुशुक्राः ९ कुजगुरुशुक्राः

बुधः १० बुधः कुजगुरुशनयः ११ कुजगुरुशनयो बुधः १२ बुधः कुजशुक्रशनयः १३ । कुजशुक्रशनयो
बुधः १४ । बुधो गुरुशुक्रशनयः ॥ १५ । गुरुशुक्रशनयो बुधः ॥ १६ । गुरुः कुजबुधशुक्राः १७ कुजबुधशु
क्रा गुरुः १८ । गुरुः कुजबुधशनयः ॥ १९ । कुजबुधशनयो गुरुः २० । गुरुः कुजशुक्रशनयः २१ । कुज
शुक्रशनयो गुरुः । २२ । गुरुर्बुधशुक्रशनयः २३ । बुधशुक्रशनयो गुरुः २४ शुक्रः कुजबुधगुरवः
२५ । कुजबुधगुरवः शुक्रः २६ । शुक्रः कुजबुधशनयः २७ कुजबुधशनयः शुक्रः २८ शुक्रः कुजगुरुशन
यः । २९ कुजगुरुशनयः शुक्रः ३० । शुक्रो बुधगुरुशनयः ३१ । बुधगुरुशनयः शुक्रः ३२ । शनिः कुज
बुधगुरवः ३३ । कुजबुधगुरवः शनिः ३४ शनिः कुजबुधशुक्राः ३५ । कुजबुधशुक्राः शनिः ३६ । शनिः
कुजगुरुशुक्राः ३७ कुजगुरुशुक्राः शनिः ३८ । शनिर्बुधगुरुशुक्राः ३९ । बुधगुरुशुक्राः शनिः ४० ॥
विं एवमेकत्रि शत्युत्तरं शतम् १२० । अथ द्वितीये एकः द्वादशे चत्वारः चत्वारो द्वितीये द्वादशे चैकः । तद्यथा
कुजो बुधगुरुशुक्रशनयः १ बुधगुरुशुक्रशनयः कुजः २ बुधः कुजगुरुशुक्रशनयः ३ कुजगुरुशुक्र
शनयो बुधः ४ गुरुः कुजबुधशुक्रशनयः ५ कुजशुक्रशनयो गुरुः ॥ ६ ॥ शुक्रः कुजबुधगुरुशन
यः ॥ ७ ॥ कुजबुधगुरुशनयः शुक्रः ८ शनिः कुजबुधगुरुशुक्राः ९ ॥ कुजबुधगुरुशुक्राः शनिः १० एवं
त्रिंशदुत्तरं शतं ॥ १३० ॥ अथ द्वौ द्वादशे द्वावेव द्वितीये ॥ द्वौ द्वितीये द्वावेव द्वादशे ॥ तद्यथा ॥ कु
जबुधौ गुरुशुक्रौ १ गुरुशुक्रौ कुजबुधौ । २ ॥ कुजबुधौ गुरुशनी ॥ ३ ॥ गुरुशनी कुजबुधौ ४ कुजबुधौ
शुक्रशनी ॥ ५ ॥ शुक्रशनी कुजबुधौ ६ कुजौ गुरुशुक्रबुधौ ७ शुक्र बुधौ गुरू २८ कुजगुरू ८ कुज

बृहज्जा॰ मही॰ भाष्यं। ॥ ११

गुरुबुधशनी ९ बुधशनी कुजगुरू १० कुजगुरुशुक्रशनी ११ शुक्रशनी कुजगुरू १२। कुजशु
क्रौ बुधगुरू १३। बुधगुरू कुजशुक्रौ १४ कुजशुक्रौ बुधशनी १५ बुधशनी कुजशुक्रौ १६। कुज
१३ शुक्रौ गुरुशनी १७ गुरुशनी कुजशुक्रौ १८। बुधगुरू कुजशुक्रशनी १९ कुजशनी बुधगुरू २०
राज॰ कुजशनी बुधशुक्रौ २१। बुधशुक्रौ कुजशनी २२॥ कुजशनी गुरुशुक्रौ २३ गुरुशुक्रौ कुजशनी २४
बुधगुरू शुक्रशनी २५। शुक्रशनी बुधगुरू २६ बुधशुक्रौ गुरुशनी २७ गुरुशनी बुधशुक्रौ २८॥
गुरुशुक्रौ बुधशनी २९ बुधशनी गुरुशुक्रौ ३० एवमेकतरषष्ठ्युत्तरं शतं १६०॥ अथ द्वौ द्वितीये त्रयो
त द्वादशे त्रयो द्वितीये द्वौ द्वादशायामघया॥ कुजबुधौ गुरुशुक्रशनयः १ गुरुशुक्रशनयः कुजबुधौ
२। कुजजीवौ बुधशुक्रशनयः ३ बुधशुक्रशनयः कुजजीवौ ४ कुजशुक्रौ बुधजीवशनयः ५ बुध
जीवशनयः कुजशुक्रौ ६ कुजशनी बुधजीवशुक्राः ७ बुधजीवशुक्राः कुजशनी ८। बुधगुरू कुज
शुक्रशनयः। ९ कुजशुक्रशनयो बुधगुरू १० बुधशुक्रौ कुजगुरुशनयः ११ कुजगुरुशनयो बुध
शुक्रौ १२। बुधशनी कुजगुरुशुक्राः। १३। कुजगुरुशुक्रा बुधशनी १४ गुरुशुक्रौ कुजबुधशनयः १५
कुजबुधशनयो गुरुशुक्रौ १६। गुरुशनी कुजबुधशुक्राः १७। कुजबुधशुक्रा गुरुशनी १८ शुक्रश ॥४७॥
नी बुधगुरुकुजाः १९। कुजबुधगुरवः शुक्रशनी २०॥ एवमेकत्राशीत्युत्तरशतं १८० दुरधरायो
गाः॥४॥ सुनफाऽनफायाः फलमाह॥ ॥स्वयमिति॥ स्वोपार्जितधनो नृपस्तत्तुल्यो

वा॥ बुद्धिवित्तकीर्तिनिर्युक्तः ईदृशः सुनफायोगजो भवति॥ अप्रतिहताज्ञः नीरोगदेहः। विनयादिगुण
युतः ख्यातयशाः॥ शब्दादिविषयोत्थसुखयुतः। अतुले पाले कारादौ रम्यवेषः। निर्वृतो मनो दुःख
हीन ईदृगनफाजो नरः॥५॥ दुरधराकेमद्रुमयोः फलं वसंततिलकेनाह॥ ॥उत्पन्नेति॥ ॥यत्र तत्र
उत्पन्नैर्भोगैः सुखयुतः॥ धनैरश्वादिकैश्च युक्तः। दाता समीचीनसेवक ईदृग्दुरधराजः स्या
त्॥ मलिनवासाः दुःखी स्वकुलानुचितकर्मकृत्। निर्धनः परकर्मकृत्। दुष्टस्वभावः। नृपसुतोऽपि केमद्रुमे
ईदृशः स्यात्॥६॥ सुनफादीनां सामान्यफलमुक्त्वा ग्रहवशाद्विशेषफलमाह॥ ॥उत्साहेति॥ उद्योग
शीलः रणप्रियः धनी असमीक्षितकारी॥ कुजे योगकर्तरि ईदृग्भवति। दक्षः शोभनवाक्नृत्यचित्रक
पुस्तकलिपिषु कुशलः बुधे योगकर्तरि ईदृशः २। धनी धर्मी सुखी राज्यमान्यः॥ गुरौ योगकर्तरि ईदृक्
॥३॥ स्त्रीलोलः बहुनार्यः इष्टः प्रियार्थोपभोगशीलः शुक्रे योगकर्तरि ईदृक्॥४॥ शनैश्चरे योगकर्तरि
चैरेऽन्यपादद्रूपे च जातस्य फलं पुष्पिताग्रयाह॥ ॥परविभवेति॥ पराजितानां भृत्यानां परद्रव
कार्यकर्ता स्त्रवाहनादिपरिवाराणां च भोक्ता॥ नाना[illegible]कर्मी। बहूनां च स्वामी। शनौ योगकर्तरि ईदृक्
एवं ग्रहे योगकर्तरि अरिष्ट्यादीनां फलं वाच्यं॥ अशुभकृदिति। चंद्रो दिने दृश्यमूर्तिः असमाविना
घक यबडुगतोऽनि[illegible]रो दुरिर्धदिकर्ता॥ गलितनतुरहद्रूपो शशांको लग्नादिष्टभावगतः शुभ
लग्नाद्यदि सदः॥ अन्यथा प्रकारान्तरेणाप्यलं। विपरीतं ठद्यं वाच्यं। अयमर्थः॥ रात्रौ जन्म न्यह
स्येच कार्येचंशो शुभः। द्रूपचक्रा दृगलशुभइति॥८॥ लग्नाद्वर्षाद्यपचययोगोसौम्यानांफलं वसु

१३ राज॰

तातिलकेनाह ॥ ॥ लग्नादिति ॥ यस्य जन्मनि लग्नादुपचयस्था बुधगुरुसिताः त्रयो ऽपि स्युः सौ
म्यं तं धनी ॥ चंद्रादुपचयगैस्तैर्धनी ॥ लग्नाच्चंद्राद्वा द्वाबुपचयगौ नद्यामो मध्यमे धनः ॥ नाति
बहुवैधनो नाल्पधन इत्यर्थः ॥ न्यूनतायां लग्नाच्चंद्राद्वैकस्मिन्नुपचयगे ऽल्पधनी किंचिद्धन
वानित्यर्थः ॥ अर्थादेव लग्नाच्चंद्राद्वोपचये सौम्या न स्युर्न निर्धनः ॥ अन्ये त्वाहुः माधुरुपफलेषु निःस्वप्रा
ने सुधीदं वा कल्प्येन वाच्यं ॥ अयमर्थः ॥ लग्नाच्चंद्राद्वोपचयगाः सौम्याः केमद्रुमाद्यशुभफलमपि
अनिष्टयस्तु समेव प्राधान्येन दद्युरिति ॥ ८ ॥ ॥ इति महीधरकृते जातकविवरणे चंद्रयो
गाध्यायस्त्रयोदशः ॥ १३ ॥ ॥ अथ द्विग्रहयोगाध्यायः ॥ ॥ तत्र रवौ चंद्रादियुक्ते फलं शा
र्दूलविक्रीडितेनाह ॥ ॥ तिग्मांशुरिति ॥ रविश्चंद्रयुतो यंत्राणां पाषाणानां च क्रियासु कुश
लं नरं कुरुते १ ॥ कुजयुतः पापिनं २ बुधेन युतः क्रियासु कुशलं बुद्धियशःसुखयुतं च ३ गुरु
युतो विषमस्वभावं परकर्मकरं च ॥ ४ शुक्रयुतो मत्स्याक्रियया रंगायुधैश्च प्राप्तधनं ॥
५ शनियुतो धातुषु ताम्रादिषु त्पत्तिक्रियासु गोरक्षादिषु च प्रवीणं नांडभंकारः समकुश ॥४८॥
ह यस्तोपुकुशलं वा कुरुते ॥ ६ ॥ १ ॥ कुजादियुतचंद्रफलमाह ॥ कूटस्त्रीति ॥ कूटादीनि पण्या
नि यस्य तं कूटपण्यं द्रव्याणां प्रतिरूपकिं पयाद्विक्रयं कुशलं ॥ नार्यः मद्यस्य कुंभानां च ५
विक्रयकरं जननी रोद्रकरं च ॥ कुजयुतश्चंद्रः कुरुते १ ॥ प्रियंवदं कार्यकुशलं जनवहत्र नेयश

स्विनं च बुधयुतचंद्रः २ रिपुजेतारं वंशप्रधानं चपलं धननाथं च गुरुश्चंद्रः ३ वा प्रसूनां क्रियादो
नियुणं तं तु वायं आदिपदात्सीवनरंजनाक्रियविक्रये वापि कुशलं शुक्रयुतश्चंद्रः ४ स्वे रिगावा
पतिं द्विजाप्रवर्णो कामतः स्ययेत् ॥ अद्रतां च हृतां चैव पुनर्भूसंस्कृतां पुनरिति ॥ पुनर्भूलक्षणं ल
सुतं त्रा नियुतश्चंद्रः कुरुते ॥ ५ ॥ २ ॥ बुधादियुतकुजफलं स्रग्धरयाह ॥ ॥ मूलादीति ॥ मूलफ
लपुष्पवल्कलैस्तैलाद्यैः कूटैः कृत्रिमरवैर्व्यवहारकरो वाणिज्यनिपुणः १ तियुक्त कुशलश्च बुध
युते कुजे ॥ १ ॥ नगरे ऽधिकृतः राजा वा लब्धधनो विप्रो वा गुरुयुते कुजे २ गोपालः बाहुयोद्धा च
तुरः परस्त्रीप्रसक्तः कितवः ईदृशः शुक्रयुते कुजे ३ दुःखी मिथ्यावादी ... नितिं दितो ऽसूयायुत
श्च शनियुक्ते कुजे भवति ॥ ४ ॥ ३ ॥ गुर्वादियुतबुधस्य शुक्रादियुतगुरोश्च फलं शार्दूलेनाह ॥ ॥ सौ
म्यइति ॥ रंगचरो मल्लादिकः ॥ गानवहत्रेनः नर्तनकुशलश्च गुरुयुते बुधे १ वचनकुशलः स्वे
गणानां नरसंघानां च स्वामी च शुक्रयुते बुधे २ परवंचनदक्षो लंघको गुरुवचनातिक्रमी च
शनियुते बुधे ॥ मृदुःवाग्निः ३ शोभनविद्यायुतः धनकलत्रयुतः विनयादिगुणाढ्यश्च शुक्रयुते गु
रौ ४ नापितः कुंभकरो वा सूपकरो वा शनियुते गुरौ इय ॥ ५ ॥ ४ ॥ शनियुतशुक्रफलं सादि फलं
च पुष्पिताग्रयाह ॥ ॥ असितसितेति ॥ मंदनेत्रः स्त्रीणां माश्रये णष्टद्धधनः त्रिपिरक्षेरविस्मा
प्रः पुस्तके पकर्मे चित्रमाले रव्येलवांशात ॥ ईदृक्षु शनियुते शुक्रे भवति ॥ क्रयितेति ॥ परलो

ऽधिकयोगे पितृकफलं कल्प्यं ॥ यथा रविकुजयोगे रविबुधयोगे यत्फलं रविकुजयोगे यत्फलं चंद्रकुजयो
गे यत्फलं तत्त्रयाणामपि वाच्यं ॥ एवं राशिषु ये द्विग्रहयोगे त्रिग्रहयोगे चतुर्ग्रहयोगे च प्रवणिफलानि वाच्यानी
५५ त्यर्थः ॥ ५ ॥ इति महीधरकृते जातकविवरणे द्विग्रहयोगाध्यायश्चतुर्दशः ॥ १४ ॥ ॥ अथ प्रव्रज्या
द्वि योगाध्यायः ॥ ॥ तत्रादौ चतुरादिग्रहैरेकस्थैः प्रव्रज्यां शार्दूलविक्रीडितेनाह ॥ ॥ एकस्थैरि
ति ॥ यत्र तत्र राशौ चत्वारः पंच षट् सप्त वा एकस्था यदा ग्रहाः स्युः चेद्बलहीनास्तदा प्रव्रज्या
न भवति । चतुरादीनामेकतमो नाम ध्याद्यद्येकोऽपि बलीत्तदैव प्रव्रज्या ॥ यदा बहवो बलिनस्तदा ब
ह्व्यः प्रव्रज्याः स्युः ॥ एवमेकस्थैश्चतुरादिभिर्बलिभिः प्रव्रज्यायोगः । तांश्च पृथक् बध्नाति माहेशा
दिभिः शाक्यादयः क्रमात्स्युः । अयमर्थः ॥ चतुरादीनामेकस्थानां मध्ये यत्कुजे बलिनि तिस्रा शाक्यो रक्त
पटो बौद्धो वा ॥ १ ॥ बुधे प्रबले आजीवक एकदंडी ॥ २ ॥ गुरौ प्रबले भिक्षुस्त्रिदंडी ॥ ३ ॥ चंद्रे प्रबले वृद्धो वृद्ध
श्रावकः कापालिक इत्यर्थः ॥ ४ ॥ वृत्तभंगभयात् श्रावकपदलोपः ॥ शुक्रे प्रबले चरकः चक्रचरः ॥ ५ ॥ शनौ
प्रबले निर्ग्रंथः । क्षपणकः ॥ ६ ॥ रवौ प्रबले वन्याशनो मूलफलाशनो तपस्वी ॥ एवं बलवद्ग्रहतुल्या प्रव्र
प्र ज्या ज्ञेया ॥ बहुषु बलवत्सु बलाधिक्यक्रमेण ॥ पराजितैरिति ॥ शाक्यादिप्रव्रज्याः स्वामिनि ग्रहैरन्य ॥४५॥
ग्रहपराजितैः प्रव्रज्यायाश्च्युतिर्वाच्या ॥ ग्रहोक्तां प्रव्रज्यां प्रादाय पुनस्त्यजतीत्यर्थः ॥ अत्रैव विशेषं वैना
शीयेनाह ॥ रवीति ॥ चतुरादीनामेकस्थानां यावंतो बलिनस्तावंत एव प्रव्रज्याप्रदा इत्युक्तं ॥ तत्रापि ब
लिनां मध्ये यावंतोऽस्तमितास्ते स्वप्रव्रज्यां न ददति ॥ किंतु । तत्तत्कल्पस्तत्प्रव्रज्याप्रव्रजितानां भक्ति

मान्भवंति । अन्ये याचितेति ॥ नरविनिर्जितैर्ग्रहयुद्धे ऽन्यग्रहः पुनरन्यग्रहदृष्टैश्चाभियाचितमा
त्रेणादीक्षिताः दीक्षाप्रार्थनपरा न तु दीक्षां प्राप्नुवंतीत्यर्थः ॥ ननु पराजितैः सर्वप्रव्रज्याप्रच्युतिरु
क्ता ॥ अत्र प्रव्रज्याप्रार्थनमुच्यत इति विरोधः ॥ उच्यते बलीग्रहो ग्रहयुद्धेऽन्येन जितः सन्न केना
पि दृष्टस्तदा प्रव्रज्यां गृहीत्वा त्यजति । यदा जितोऽन्येन दृष्टस्तदा प्रव्रज्यामर्थयमानोऽपि ना
प्नोतीति ॥ भान्तप्रव्रज्या बलिनो न दद्यात्स्यात् ॥ तदुक्तं ॥ दीक्षादानसमर्थो भवति यदा बले नसं
युक्तः ॥ तस्येव दशाकाले दीक्षां लभते नरोऽवश्यमिति ॥ २ ॥ चतुरादिभिरेकस्थैर्विनापि प्रव्रज्या
योगं शालिन्याह ॥ ॥ जन्मेशाद्यति ॥ नरजन्मकाले यद्राशौ चंद्रस्तद्राशीशो जन्मेशः स यद्यन्यै
र्ग्रहैर्दृष्टः शनिं पश्यति तदा प्रव्रज्यायोगः ॥ यद्वा शनिर्जन्मेशं पश्यति सो बली तस्मै वाभितद्दृशा यां वा ॥
तदुक्तं ॥ जस्स अ पिकु वइ को णो जम्मप्पणाहो गहेहि अण्णदिट्ठो तस्स अ दिक्कू नाहाणां बलिन
दसाइ होइ तक्काले ॥ अस्यार्थः ॥ यस्य प्रेक्षते शनिं जन्मपतिर्ग्रहैरदृष्टः तस्य दीक्षादाता बलिनो
दशा भवति तत्कालमिति ॥ आर्किमिति ॥ शनिर्बलहीनं जन्मेशं वा पश्यति तदा शनियुक्तप्रव्रज्या ॥
तदुक्तं ॥ रविणि दिट्ठे बलहीणो जन्मप्पणाहे न एण कुलिंगं थाणं ॥ अस्यार्थः ॥ शनिदृष्टे बलहीने जन्म
नाथे न एन निर्ग्रंथा नामिति ॥ दीक्षामिति ॥ यत्र तत्र स्थश्चंद्रो शनिद्रेष्काणगः कुजशन्यतमन
वांशगश्च शनिदृष्टोऽन्यैरदृष्टश्च तदा शन्युक्तप्रव्रज्या ॥ तदुक्तं ॥ कोणस्स चिदिक्काणे जइहो

इयमीतदंयगतुं। वक्रेप्येवं वादिष्टो कोणेण च सर्वदृष्पण विमुक्तो। अस्यार्थः। कोणस्यापि प्रेक्षा
१५ लेया। दिचवलितिन्नान्नीनंदंशगः" वक्रो कांत्रो वादृष्टः कोणेन च सर्वदिर्ज्ञानविमुक्तइति॥ अय योगे रा
भ्र जापि दीक्षितः स्यात्तद्योगद्वयं माति माह॥ ॥गुरुसुविति॥ गुरुचंद्रजन्मलग्नेषु शनिदृष्टेषु न
वमेच गुरौ राजयोगे हर्वोक्ते जातस्त्री थक्रिम तूशास्त्रकर्त्ता दीक्षितः स्यात्॥ द्वितीयमाह। नवमे
ति। अन्यग्रहादृष्टे शनौ नवमे नृपयोगेजातो राजादीक्षितो भवति। राजयोगाभावेऽप्यो पि दीक्षा
माप्नोति॥ तदुक्तं॥ नवमस्थाने सौरो यदि स्थितः सर्वदृग्विविमुक्तः॥ नरनाथयोगतो न्टपेपि सन्
दीक्षितो भवति॥ नृपयोगस्याभावेयोगेऽस्मिन्दीक्षितो नरो जातः॥ निंभं दिग्धं भ्रभ्र ज्येष्ठेण स्या
स्प भ्रभावेनौ तिष्ठ॥ इति महीधर कृते जातक विवरणे प्रव्रज्याध्यायः पंचदशः॥ १५॥ ॥छ॥
अथ ऋक्षराशीशीलाध्यायः॥ ॥चंद्रस्य भमानन क्षत्रशीलं चतुर्दशार्या भिराह॥ एकैकयाक्ष
क्षद्वयमाह॥ ॥प्रियभूषेति॥ मंडनवक्षः शोभनाकारः जनप्रियः कार्यपटुर्बुद्धिमान् ईदृ
दृगश्विनीजातः १॥ बहुवचनं तारापेक्षया॥ आरब्धकर्मणां अंतगः सत्यवादी चतुरः सुखीई ॥५०॥
दृग्भरणीजः॥२॥ बहुभुगिति। अन्नताहारः परस्त्रीरतः तेजस्वी अपरिष्णुः। जनप्रसिद्धः ईदृ
क्कृत्तिकाजः ३। अविनयभाषी शास्त्रोक्तशुद्धिकर्त्ता मधुरवाक् निश्चलबुद्धिः सुंदरः ईदृक्

रोहिणी जातः॥४॥ चपल इति॥ क्रियास्वनवस्थितः॥ दक्षः भयाकुलः। प्रियवक्ता। उद्यमी। वित्त
वान्॥ भोगशीलः ईदृग्मृगशिरोजः ५। शठः कार्यविमुखः तदुक्तं। वचसा मनसा यश्च दृश्यते का
र्यतत्परः कर्मणा विपरीतः स शठः सद्भिरिष्यते॥ मानी। कृतं सुकृतं हंतीति कृतघ्नः। वधपापकृत्
पापकृत्। ईदृगार्द्रजः॥६॥ दांत इति॥ तपःक्लेशसहः सुखभाक् भोजनशीलः। जडः व्याधिमा
न्। तृष्णार्त्तः लोकार्थिनः संतुष्टः। ईदृक्पुनर्वसुजः ७। शांतेति॥ जितेंद्रियः जनप्रियः शास्त्रवि
द्वित्तवान्। धर्मरितः ईदृक्पुष्यजः॥८॥ परकार्यविमुखः सर्वभक्षः संचयशीलो दाता। श्रि
ती॥ पापरतः अंतुपक्रलिष्टः वंचकः। उक्तं च। मुखं पद्मदलाकारं वाणी चंदनशीतला। हृदयं क
र्त्तरीसमं त्रिविधं धूर्त्तलक्षणमिति॥९॥ बह्निति॥ बहुभ्रेव को बहुधनः भोगभाक् देवपि
तृभक्तिमान्। महोत्साहः। ईदृग्मघाजः १०। प्रियभाषी दानशीलः कांतिद्युतः भ्रमणशीलः
राजसेवारतः ईदृक्पूर्वजः॥११॥ सुभगेति। जनप्रियः। विद्यया प्राप्तं धनं येन। भोगयुतः
सुखी। ईदृगुत्तराजः॥१२॥ उद्यमी निर्लज्जः मद्यपः दयालुः। चौरः ईदृक् हस्तजः १३। ७॥ चित्रेति
नानाविधवस्त्रपुष्पधारी शोभनलोचनावयवः। ईदृक्चित्राजः॥१४॥ विनयी क्रयविक्रयवित्
दयालुः। अमितभाषी। धर्मरतः ईदृक्स्वातीजः॥१५॥ तत्त्वर्युरिति। परर्द्धिमत्सरी। लोभान्वि
तः। स्फुरूपः सुभाषणदक्षः। विरोधकृत्। ईदृग्विशाखाजः॥१६॥ ईश्वरः परदेशावसनशीलः क्षुधा

या· अभद्रनः। भ्रमणः। ईदृगनुराधाजः १७। ज्येष्ठेति। स्वल्पसुहृत्संतोषी धर्मरतः
प्रचुरिरोषः ईदृक् ज्येष्ठाजः ।१८। गर्वितः बहुधनः सुखवान् द्विश्यो निहतः। एकमिति। भोगरतः
१६ ईदृक् मूलजः ।१९।१०। इष्टेति। इष्टमभिमतमानंदजनकं चकलत्रं यस्य सः। गर्वितः।। स्थिरप्रे
ॐ·२११· मा। ईदृक् पूर्वाषाढाजः ।।२०। विनयी धर्मज्ञः प्रभूतसुहृत् उपकारवित् जनप्रियः ईदृगुत्तरा
षाढाजः ।२१।११। श्रीमानिति।। श्रीयुतः। पंडितः शोभनस्त्रीकः धनी जनविदितः।। ईदृक् श्रवणजः
२२। दानशीलः ईश्वरः रणप्रियः गीतवल्लभः अर्थरुचिः ईदृक् धनिष्ठाजः।।२३।१२। स्फुटेति।।
स्पष्टवचनः रुजादिव्यसनोपहतः शत्रुघातकः अप्रमीलितकार्यकृत्।। शूरः धन्यः ईदृक् शत
भिषग्जातः।२४। उः खितमनाः। नारीपरिभूतः धनी अवक्ता। धनपटुरितिपाठे स्त्रीभिर्जितं धनं य
स्य। यद्वा धनपटुः धनार्जने चतुर इति। धनसंचयकरः ईदृक् पूर्वाभद्रजातः।२५। वक्तेति। ना वक्ता
दक्षः सुखयुतः बहुपुत्रपौत्रः। जितारिः धर्मशीलः ईदृगुत्तराजः।२६। प्रोहल्लाञ्छयवः जनप्रियः र
णप्रियः परधनादिष्वलुब्धः।। धनी ईदृग्रेवतीजातः २७।। एतेनलग्नस्वभावास्वं दुमबलेस्वल्पेः मध्ये १५९।।
मध्यमा।।। प्रबलेऽल्पा।। इति भावार्थः स्फुतेजातकविवरणेन क्षत्रशीलो।।१६।। ७।। अथमेष
दिभसराशिगतचंद्रफलानिमृगराईतविक्रीडितेराह।। ।।वृत्ताताम्रेतिवर्तते रक्तेचने त्रेयस्य सः।।
उष्णभोजी स्वल्पभोजी स्वल्पभोजी च।। शीघ्रं प्रसीदति।। भ्रमणः। रतिप्रियः।। निर्मांसजंघोरुसंधिः।।

चलधनः। रणप्रियः।। स्त्रीप्रियः। परारा धनकृत्नाल्प:।। कुत्सितनखः। भग्नस्या। गर्वितः।। ज्येष्ठ
सुख्यः।। गणीत्यर्थः। सूत्त्वा चिह्नविशेषण हस्तलते चिह्नितः।। क्रियास्वनवस्थितः।। जलेभ
यः।। ईदृग्मेषस्थे चंद्रेजातोभवति।।१।। कांतइति। सुंदरः।। विलासगामी।। विस्तीर्णस्थूलमु
खः। पृष्ठसुखपार्श्वेषु चिह्नवान्।। दाता। कदर्थनासमर्थः। अग्निरुत्ताङ्गः। उन्नतस्कंधः।। स्त्री
जनकः। कफाधिक्यः। प्रथममध्ये अंते बंधुवित्तपौत्रैर्भवरहितः।। जनप्रियः। दृढमित्रः।। क्षमावा
न्।। भद्राशोदरानलः।। स्त्रीप्रियः। दृढमित्रः। यौवने वार्धके च सुखी।। अयौवने बाल्ये दुःखी।।
ईदृग्वृषस्थे चंद्रेजातः।।२।। स्त्रीलोलेति।। नारीष्वभिलाषुकः। कामी। शास्त्रकुशलः। रक्तनेत्रः।।
पिंडितः।। परस्पंदेङ्गितज्ञापकः। कुटिलकेशः। चतुरधीः। हास्यचेष्टितद्यूतादिवेत्तीति।। सुंदर
देहः।। मधुरभाषी।। बहुभाषी गानरतः। नृत्यज्ञः। षंढैः सह प्रीतिमान्।। उन्नतघ्राणः। इह
ग्मिथुने गे चंद्रे जातः।।३।। आवक्रेति।। कुटिलशीघ्रगामी।। उच्चजघनः। प्रमदाजि
तः। शोभनमित्रः। ज्योतिःशास्त्रवेत्ता।। बहुगृहः। चंद्रवत्क्षयेण धनेन च युज्यते
कदाचिद्धनी कदाचिन्निर्धन इतित्यर्थः।। वामनस्थूलकंठः। सांत्वे प्रीतिंयाति।। मित्रेषु रक्तः
जलेनद्यानेच प्रीतिमान्।। ईदृक्कर्कगे चंद्रे जातः।।४।। तीक्ष्णइति।। अमर्षशीलः। स्थूलकपोलः।
विस्तीर्णमुखः। कपिलनेत्रः।। स्वल्पापत्यः। प्रमदाद्वेषः प्रियाः मांसवनपर्वतीयस्य।। निः

कोरणकोपशीलः॥ क्षुत्तृष्णोपीपासाजठरदशनचित्तैः कृत्यन्नरोगेणपीडितः दातापराक्रमी
एकचित्तः॥ अभिमानी॥ जननीवत्सरः सिंहगेचंद्रेजातः॥१९॥ स्त्रीति॥ लज्जालुस्त्यास्यां मनो
हरेदन्नतिगमनेयस्यसः शिथिलस्कंधः॥ शिथिलभुजस्कंधः सुखयुतः॥ मृदुत्वक् सत्यशील
२६ गात्रस्वाद्यनृत्यशुभ्रत्वादिकलासुचतुरः॥ पंडितः॥ धर्मरतः॥ बुद्धिमान्॥ संभोगलालसः॥ परकी
यैर्वेश्मधनैश्चयुक्तः॥ अन्यदेशवासी॥ प्रियभाषीस्त्रीजनकः॥ स्तोकसंतानः॥ ईदृक्कन्यास्थे
२५.४१७ चंद्रेजातः॥२०॥ देवेति॥ देवानांविप्राणांभूतानांचपूजनेतत्परः॥ मेधावी॥ तदुक्तं॥ आत्मज्ञानोत्थ
र्मेधाबुद्धिस्तत्कालवेदिनी॥ शुचिः शुद्धः विचारज्ञः प्राज्ञः प्राज्ञैरुदाहृतेति मंहृतिः॥ श्रोत्रियः॥ ना
रीवशः॥ उच्चः॥ उच्चघ्राणः॥ उर्वलशिथिलशरीरः॥ भ्रमणशीलः॥ धनी॥ अपरिहस्तवियवः॥ क्र
याविक्रयानिपुणः॥ देवद्विनाम॥ सुरपर्यायं द्वितीयंनामयस्य॥ रोगवान्॥ स्वजनानांहितक
री॥ तैर्बुधैर्निर्विस्मितो भृत्यस्त्यक्तस्व॥ ईदृक्तुलास्थेचंद्रेजातः॥२१॥ वृश्चिकस्थचंद्रफल
माहिन्याह॥ पृथुलेति॥ विस्तीर्णनेत्रवक्षः स्थलेयस्य वर्तुलजंघेऊरूजानुनीचयस्य॥ मा ॥५२॥
तापितृभ्यांउपद्रुतः क्रूरेस्थस्यक्तः॥ बाल्येरोगी॥ राजकुलेमान्यः॥ कपिलः॥ विषमस्वभा
वः॥ मीनयवध्वजपद्मलांछितः॥ प्रियकारिहस्तादोयस्य॥ गुप्तपापः॥ ईदृक् वृश्चिकगेचंद्रे
जातः॥२२॥ धनुर्मृगयोः फलंशार्दूलोक्त्याह॥ ॥ व्यादीर्घेति॥ दीर्घमुखग्रीवः॥ पित्र

र्यैर्धिधनेनयुक्तः॥ दाता॥ काव्यकृत्॥ बलवान्॥ वाक्पटुशीलः॥ स्थूलदंतः॥ करोर्द्धहीनना
सिकाचयस्यसः॥ कार्येषुदक्षः॥ लिपिपुस्तकचित्रज्ञः॥ नतस्कंधः॥ कुत्सितनखः॥ पीन
२६ बाहुः॥ धार्ष्ट्ययुक्तः॥ धर्मज्ञः॥ बंधुवर्गद्वेष्टा॥ हठाद्धनंनायाति॥ सांत्वनेनैववशः॥ ईदृग्धनुःस्थे
चंद्रेजातः॥२३॥ नित्यमिति॥ सर्वदात्मीयान् कलत्रपुत्रानाराधयति॥ दांभिकः॥ अधोभागेदुर्बलः॥
शोभननेत्रः॥ कृशजघनः॥ उक्तंचाहुक्तः॥ यदुच्यतेतत्सकृदेवग्रहणातीत्यर्थः॥ सर्वजनप्रियः
आलस्योपेतः॥ शीतसहः॥ भ्रमणशीलः॥ उदारचेष्टः॥ कविः॥ लोभी॥ अभिमानी॥ अगम्यासु
स्वगोत्रजासुनिंद्यरूपजातासुचजरांगनासुदृढरागः॥ धर्मध्वजः॥ निर्लज्जः॥ निर्दयः
ईदृक्मकरोचंद्रेजातः॥२४॥ कुंभगचंद्रफलंविष्णुटैनाह॥ करभेति॥ उष्ट्रसम
ग्रीवः॥ शिराव्याप्ता॥ कर्कशालोमवक्रः॥ अस्तुष्टातनुःशरीरंयस्य॥ विस्तीर्णपादौयस्य॥ दि
नीदेहपश्चिमभागोनितंबस्थानंमुखंवक्षरचयस्य॥ वंचकः॥ ऊर्ध्वः॥ परनार्यांपरधने मर
पापेचासक्तः॥ उपचयापचययुतः॥ प्रियाणिपुष्पगंधमाल्यानिमित्राणिचयस्य॥ भागहि
मः॥ ईदृक्कुंभगेचंद्रेजातः॥२५॥ मीनचंद्रफलंमालिन्याह॥ ॥जलेति॥ जलोत्पन्नानांकुल्म
मंफलादीनांधनानांपरधनानांचभोक्ता॥ स्त्रीषुवस्त्रेषुचप्रेमवान्॥ अन्यूनाधिकमुं

द्रेष्काण॰ मेष॰ भाष्यं॥

दरंचशारीरं यस्य॥ उच्चनासिकः॥ विस्तीर्णमिस्तकः॥ रिपुपरायवकारी॥ भमदावरूपः॥
शोभननेत्रः॥ कांतिनिधानधनानां भोक्ता॥ शास्त्रवित्॥ ईदृक्पुमान् मेषे चंद्रे जातो भव
१५ ति॥२५॥ उक्तराशिस्वरूपं भ्रमर विलसितेनाह॥ ॥बलवतीति॥ चंद्र कांतात्र शीतरा
२२•२११ श्मिनाथे चंद्रे च बलवति एवं त्रिषु बलवत्सु उक्तं फलं स्फुटं भवति॥ तेषां मध्ये द्वयोर्बलि व
नोर्मध्यफलं एकस्मिन् बलिनि निर्दिष्टं॥ त्रयाणामल्पबलत्वे प्रोक्तफलं किंचिन्न स्यात्॥ त्र
येपि॰ त्रिभिरव्यादयश्चैरव चिंतनीयः॥ अयमर्थः॥ पत्रराशीरविः कुजादयः स्तराशीतदीश्व
रव्यादौ च बलवति वक्ष्यमाणं फलं स्फुटं। द्वयोर्बलिनि मध्यं। एकस्मिन् बलिनि स्वल्पं॥ त्रिष्वन
लेषु न किंचिदिति॥२७॥ इति चंद्रराशिस्वभावः॥ मेषवृषभगताकफलमोपछंदस्यिकेनाह
॥ ॥ हास्थिरुइति॥ विक्लस्वरत्यातः दक्षः॥ भ्रमणशीलः॥ स्वल्पधनः॥ शस्त्रधारी॥ ईदृग्मेष
गे कजातः॥ परंतु सुभगोपरमोक्षांत्वोगे कुने भ्रमणशीलः किंतु स्थिरो बहुधनः॥
शस्त्रधारिभिश्चयमेव्यः॥१॥ गवीति॥ व[...]भिः सुगंधद्रव्यैः पण्यैश्च जीवति स्त्रीद्वेष्टा ग ॥५३॥
लेवाद्येचदक्षः॥ ईदृग्वृषे कजातः॥२॥ [...]मिथुनादिचतुष्काकफलं शार्दूलविक्रीडितेना
ह॥ ॥विद्येति॥ पंडितः॥ ज्योतिः॥ शास्त्रवेत्ता धनी॥ ईदृग्मिथुने कगे॥३॥ कुष्मो निरपेहइ

त्यर्थः॥ निर्धनः॥ अन्यकार्यकर्त्ता॥ खेदेन मार्गेणदुरवेध्यमदायुतः॥ ईदृक्कर्कगे के ॥४॥ अर
ण्यपर्वते गोष्ठे च प्रीतिर्यस्य॥ तदाश्रयशील इत्यर्थः॥ बलीसूरखः॥५॥ लिपिरक्षरन्यासः
लेख्ये चित्रकर्मकविलंगानितशास्त्रविज्ञानेन च एतेयुक्तः॥ नारीतुल्यशरीरः॥ ईदृक्कन्या
गते के॥६॥२८॥ तुलादिचतुष्कफलं शार्दूलविक्रीडितेनाह॥ ॥ आत इति॥ मध्यविक्रीयी
पथिवाक्यः॥ सुवर्णकारः॥ अनुचितकर्मकर्त्ता॥ ईदृशस्तुलाके॥७॥ उग्रस्वभावः॥ अभ्य
मील्प्रितकार्यकर्त्ता॥ विषप्रयोगेणार्जितं धनं येन॥ शस्त्रेणांतं नाशं गच्छति॥ शास्त्रनिर्वा
णइत्यर्थः॥ ईदृशो ऽलिगे के॥ द्यूतं कुजपः॥ धनी क्रूरचेष्टः॥ वैद्यकर्मलितशिल्पकर्मकृत्॥ ३
ईदृशो धनुरके॥९॥ ~~कुलानुचितकर्मा पुत्रैर्जनिनायस्त्रीव रहितः॥ निर्धनः~~ कुत्॥
सूरखः॥ कुत्सितवाणिज्यकर्त्ता॥ स्वल्पवितः॥ लोभी॥ परभाग्येरतः॥ परार्थेपिभोग॥ काइ
त्यर्थः॥ ईदृशो मकरे गेके॥१०॥३०॥ कुंभमीनार्कफलं चंद्रार्कयोरेकराशिगयोश्च लक्षणं
च वसंततिलकेनाह॥ ॥ नीचइति॥ कुलानुचितकारी॥ पुत्रैर्जनैर्वा द्रव्येन च रहितः॥
निर्धनः॥ ईदृशः कुंभगे के॥११॥ जलोद्भवपण्याफलधनलाभादिनस्पण्ये नतद्विक्रयेण ये

किंच व ऐश्वर्यं यस्य। स्त्रीणां ह्रजः॥ इदृशो मीनेर्के॥१॥ नक्षत्र मानवो राशिपुरुषः कालांगानी
२६ त्यादिनोक्तः तत्तुल्यं गविभागे चंद्रार्कभुक्ते चिह्नं वदेत्॥ अयमर्थः॥ चंद्रार्काधिराशावेक
गो भराशिः कालपुरुषे यत्रांगे पठितः तत्र मशकतिलकादि चिह्नं दिशेत्॥ यथा॥ मेषस्थ
२५.२१). योश्चंद्रार्कयोः शिरसि वृषस्थयोर्मुखे इत्यादि॥ इति रविराशिफलं॥३॥ अथ मेषवृश्चिक
तुलावृषस्थे कुजे फलं नर्कुटेनाह॥ ॥ नरपतीति॥ राजसदृशः॥ भ्रमणशीलः॥ सेनापतिः
क्रियावित्क्रयकः॥ धनी व्रणिताङ्गः॥ तस्करः॥ विप्रकाशेन्द्रियः॥ इदृशो मेषगे कुजे॥१॥ स्त्री। जि
जितः मित्रेषु क्रूरः परस्त्रीयुक्तः॥ कपटी शोभनालंकारः॥ भार्यार्त्तः॥ निःस्नेहः इदृशो
वृषतुलास्थे कुजे॥२॥३॥ मिथुनकन्याकर्कजफलं वसंततिलकेनाह॥ ॥ बौभ
इति॥ भ्रमणशीलस्तेजस्वीत्यर्थः॥ पुत्रयुक्तः मित्रहीनः॥ परोपकारशीलः॥ गीतज्ञः मंत्र
मतिपुलः॥ अदाता॥ निर्भयः॥ अर्थोपार्जनपरः॥ इदृशो मिथुनकन्यास्थे कुजे॥१॥ धनी ॥५८॥
जलयानेन प्रवादिना प्रभूतमर्जितं धनं येन॥ यद्वा॥ जलेगमनेनोपार्जितं धनं॥
मेधावी रोगहीनः॥ दुर्जनः॥ इदृशः कर्कगे कुजे॥२॥३॥ सिंहधनुर्मीनकुंभमकरगाकुज
फलं शार्दूलविक्रीडितेनाह॥ ॥ निःस्व इति निर्धनः कदर्थनाहीन॥ अल्पमध्यचारी।

लोककलत्रः स्वल्पापत्यः इदृशः सिंहगे कुजे॥८॥ अनेकशत्रुः राजमंत्री॥ प्रथितः निर्भयः॥ स्वल्प
प्रजः इदृशो धनुर्मीनगे कुजे॥१०॥ नित्यं दुःखी निर्दयः॥ भ्रमणशीलः मिथ्याभाषी॥ निरपेक्षः इ
दृशः कुंभगे कुजे॥११॥ बहुधनः॥ बहुपुत्रः॥ राजा तत्तुल्यो वा इदृशो मकरगे कुजे॥१२॥ इति कुज
राशिशीलं रूपं॥३॥ ॥ मेषवृश्चिक वृषतुलास्थे बुधे फलमाह॥ द्यूतेति॥ अर्थज्ञाने रु
तो परस्वहरणे मद्यपाने चासक्तः॥ नास्त्यार्थदूषकः तस्करः दरिद्रः॥ कुत्सितनार्यः॥ दंभिकः॥
अनृतभाषी इदृशो मेषालिगे बुधे॥२॥ उपदेष्टा॥ बहुपुत्रः॥ बहुस्त्रीकः॥ वित्तोपार्जनरतः॥
दाता॥ मातृपितृ गुरुभक्तिरतः॥ इदृशो वृषतुलास्थे बुधे॥२॥३॥ मिथुनकर्कगबुधफलमि
न्द्रवज्रयाह॥ ॥ विकत्थन इति॥ वाचालो सत्यभाषीत्यर्थः॥ शास्त्रेषु कलासु च गीतनृत्यवा
द्यलिपिकर्मसु निपुणः॥ प्रियभाषी॥ सुखासक्तः॥ इदृशो मिथुनगे बुधे॥१॥ उदकेनार्जितं
धनं येन बलात्॥ जलेनेति पाठे स्ववीर्येण अर्जितधनः स्वीयबंधुजनस्य रिपुः॥ इदृशः कर्कगे
बुधे॥१॥३॥ सिंहकन्यागतबुधफलं प्रहर्षिण्याह॥ ॥ स्त्रीद्वेष्य इति॥ योषितां मनोज्ञ
तः॥ निर्धनः॥ दुःखी पुत्रहीनः॥ भ्रमणशीलः॥ मूर्खः॥ वनितासु विलासी॥ स्वेष्वप्रसन्नः स्वकीयो
येऽन्यः पक्षिन्नवीर्यस्य॥ अल्पर्थं तैरनिंदितइत्यर्थः॥ इदृशः सिंहस्थे बुधे॥१॥ दाता पंडि

त॰॥ विद्याशौर्यादिबहुगुणयुतः सुखभाक्॥ मतिहृत॥ प्रयोगवेत्ता निश्चयी॥ ईदृशः कन्याबु
धे ८॥ ७॥ मकरकुंभधनभीननगबुधफलमौ पच्छंदस्यिकेनाह॥ ॥परकर्मेति॥ परप्रेष्यः॥
१६ निर्धनः॥ शिल्पकर्मणि बुद्धिर्यस्य॥ परस्वग्रहणशीलः॥ निर्मूल्यकार्यकर्ता॥ ईदृशो मकर
कुंभगे बुधे॥ १०॥ राज्यवर्जितः॥ विद्वान्॥ व्यवहारार्थवेत्ता॥ आननमनुकूलं वाक्यं यस्येति
२५.४१ ईदृशो धनुस्थे बुधे॥ ११॥ जिताः सेवकाः येन॥ पराश्रयः धनकुशलइत्यर्थः॥ कुत्सितशिल्पः॥ ईदृ
शो मीनस्थे कुंभे बुधे॥ इति बुधराशिस्वभावः॥ ३०॥ मेषादिराशिगतफलं शार्दूलविक्रीडित
स्याह॥ ॥सेनानीरिति॥ सेनानायकः॥ प्रचुरधनः॥ प्रचुरभार्यः प्रचुरपुत्रः॥ दान
शीलः शोभनभृत्यः॥ क्षमावान्॥ तेजस्वी॥ कांतादारैर्भार्या॥ गुणैर्विद्यादिभिः ख्यातः॥ विलक्षकी
र्तियुतः॥ ईदृशो मेषवृश्चिकगे गुरौ २॥ कल्यं नीरोगमंगं यस्य॥ कल्योऽनातो निरामयः
कल्यो नीरोगदक्षयोरिति चाभिधाने॥ सुसुखः सुखयुतः॥ सार्थो धनी॥ समित्रो मित्रयुतः ॥५५॥
सतनयः पुत्रान्वितः॥ दाता॥ जनवल्लभः॥ ईदृशो वृषतुलास्थे गुरौ॥ ७॥ बहुपरिवारः॥
बहुपुत्रः॥ साचिव्ये मंत्रित्वे नियुक्तः॥ सुखयुतः॥ ईदृशो मिथुनकन्यागते गुरौ॥ ९॥ ३॥
चांद्र इति॥ मणिभिः पुत्रैः धनैः कलत्रैरैश्वर्येण मेधया सुखेन च युतः॥ ईदृशः कर्कि

गुरौ ४॥ सेनाप्रभावः कर्किकं फलं रत्नादियुतत्वं तत्फलं च सिंहस्थे गुरौ ५॥ मंडलाधिपतिः॥
राजमंत्री॥ सेनानायको धनवान्॥ ईदृशो धनुर्मीनस्थे गुरौ १०॥ कर्किकं फलं रत्नादि
मत्त्वेसयुतः कुंभगे गुरौ॥ ११॥ कुलानुचितकर्ता॥ स्वल्पधनः दुःखार्तः॥ ईदृशो मकरगे
गुरौ १२॥ इति गुरुराशिस्वभावः॥ ४०॥ मेषादिवृषतुलागतशुक्रफलं पुष्पिताग्रयाह॥ ॥
परयुवतीति॥ परस्त्रीसक्तः तासां परस्त्रीणां अर्थवादेरपराधानुवचनैरपहृतधनः कु
लकलंककर्ता॥ ईदृशो मेषवृश्चिकगे शुक्रे॥ २॥ आत्मवीर्येण स्वबुद्ध्या च धनं यस्य॥ राजमा
न्यः॥ स्वबंधुस्वामी विख्यातः भयरहितः॥ ईदृशो वृषतुलास्थे शुक्रे॥ ७॥ ४१॥ मिथुनकन्याम
करकुंभगशुक्रफलमौपच्छंदसिकेनाह॥ ॥नृपकृत्येति॥ राजकार्यकर्ता॥ धनी कला
गीतवाद्यादिकावेत्ता॥ ईदृशो मिथुनगे शुक्रे॥ ३॥ निकृष्टकर्मकृत्॥ कन्यागते शुक्रे॥ ६॥ सर्व
जनप्रियः प्रमदावशगः॥ कुत्सितस्त्रियामनुरक्तः॥ ईदृशो मकरकुंभगे शुक्रे १०॥ ११॥ कर्कि
हृधनमीनस्थशुक्रफलं वैतालीयवृत्तेनाह॥ ॥द्विभार्य इति॥ द्विस्त्रीकः॥ धनी भयभार्यः भ
इष्टो मदशोको यस्य॥ गर्वितो गतिदुःखितः॥ ईदृशः कर्किगे शुक्रे ४॥ स्त्रीतः प्राप्तध

दुःसजा मशी भावः॥

नः प्रधानस्त्रीकः अल्पापत्यः ईदृशः सिंहस्थे शुक्रे॥१०॥ गुणैर्विकुत्सितः हृजः। अधनः धनुःस्थे
शुक्रे॥११॥ पंडितः ईश्वरः राज्ञा कृतनिग्रहो यस्य। सर्वजनानां मतिवल्लभः ईदृशो मीनगे शुक्रे॥१२॥
१६ इति शुक्रराशिस्वभावः॥७॥ ॥ मेषवृश्चिकमिथुनकन्यागे शनौ फलं वक्ष्यते तिलकेभ्यः
कृ शं१० हः॥ मूर्खव्रजेति॥ अज्ञः भ्रमणशीलः। दांभिकः। मित्रवर्जितः ईदृशो मेषगे शनौ॥१॥ बं
धं वधं च भजते॥ क्रियस्वनवस्थितः निर्दयः ईदृशो गलिगे शनौ॥२॥ विगलितः सुखं यथा तिनया
यस्य निर्लज्जः। दुःखी। दरिद्रः। अपुत्र इत्यर्थः। आलेख्यकर्मणि स्व लितो कुशलः रक्षाप
लीरक्षकः मुख्यानां प्रधानानां पतिनाथिः। ईदृशो मिथुनकन्यास्थे शनौ॥४॥ ॥ वृषतु
लाकर्कसिंहगते शनौ फलं मंदाक्रांतया॥३॥ ॥स्त्रितइति॥ शौभनानां तो मृत्सुर्यस्य। भृम ॥५५॥
मृत्सुः। यद्वा शोभनानां तो बार्द्धकं यस्य। बार्द्धके सुखी त्यर्थः। राजगृहे जात विश्वासः॥
श्री शोभनपुत्रः शोभननार्यः। शोभनवित्तः नगराणां सेनाया ग्रामाणां चायनेता। प्रधा
न नायको थवा धनुर्मीनगे शनौ॥१०॥ वर्ज्येति। अगम्यस्त्रीणां वल्लभः स्वल्पैश्वर्यः। बहुदा स्व
रः। इदृशो वृषगे शनौ॥५॥ विदितकीर्तिः प्रसूतानां नगराणां सैन्यानां ग्रामाणां मान्यः। धनी ईदृशः
स्तुलास्थे शनौ॥६॥ निर्धनः। दंतहीनः। जननीवियुक्तः। कुलहीनः। मूर्खः। ईदृशः कर्कगे शनौ॥७॥

दुर्जनः। विसुखोदुःखी। वित्तनयोः दुःखः। विशिष्ट दारिद्र्याकर्त्ता। भारवाही त्यर्थः। ईदृ
शः सिंहगे शनौ॥८॥ ॥५५॥ धनुर्मीनमकरकुंभगते फलं शार्दूलविक्रीडितेनाह॥ ॥स्वांत
इति॥ शोभनानां त्यो मृत्सुर्यस्य श्रुतमृत्सुः। यद्वा शोभनानां तो बार्द्धकं यस्य॥ बार्द्धके सुखी त्य
र्थः॥ राजगृहे जात विश्वासः। शोभनपुत्रः। शोभननार्यः। शोभनवित्तः। नगराणां सेना
या ग्रामाणां चायनेता॥ प्रधाननायको थवा धनुर्मीनगे शनौ॥१०॥ परयोषिद्रतः पर
वित्तैश्वर्यलुः॥ नगराणां सेनाया ग्रामाणां च नायकः। अत्यद्भुतः। मलोपेतः। स्नानरहित इ
त्यर्थः॥ स्थिरवित्तः। स्थिरैश्वर्यः। भोगशीलः। ईदृशो नरो मकरकुंभगे शनौ भवति॥१२॥८
इति शनिराशिभावः॥ ॥ एवं राशिस्वभावाद्युक्तास्तत्रेदं बोध्यं॥ राशौ राशी त्रैलोक्यैब
लवति ग्रथोक्तं फलं संपूर्णं भवति॥ द्वौ वा यो बलवतो र्मध्यौ नं। नैकस्मिंश्च बलवति
न किंचिदिति॥९॥ ॥ अथ मेषादिलग्ने जातस्य चंद्राक्रांतराशुक्तफलं स्वरूपा। तद्दे
वां पुष्पिताग्रयाह॥ ॥ शीघ्रिरेति॥ चंद्रस्य मेषादिराशिसंयोगे यत्स्वस्वरूपमुक्तं तन्म
न्मृगशिरस्यादिकं तन्मेषादिलग्ने जातस्यापि वाच्यं॥ एवं चंद्राक्रांतराशेरीक्षणस्य दशनि
स्ययुक्तफलं वक्ष्यमाणं चेंद्रे न्रूपबुधा विस्यादिकं तदपि मेषादिलग्ने जातस्य फलं वाच्यं॥ किं
तु इदं फलं चंद्रराशितो लग्नादिभावेष्वधिकं॥ यदत्र भावास्तन्वादयो भवनदुर्जनावराशि

बृ.इजा.म.रा.भाष्ये

१६ गुणौ चेन्नाथगुणैस्तत्स्वामिगुणौ विचार्यौ॥ भवनतन्नाथयोर्गुणाः प्रबलत्वं॥ अयमर्थः।
रुः २११ लग्ने लग्नेशो च बलवति जातस्य शरीरपुष्टिर्वाच्या॥ यावत् तयोर्योगे यो बली तदा म
ध्यमा यावद्वृद्धिरिति॥ ७॥ इति महीधरकृते जातकविवरणे नक्षत्रराशिशीलाध्यायः षो
डशः॥१६॥ ॥ अथ दृष्टिफलाध्यायः॥ तत्र मेषादिगे चंद्रे कुजादिदृष्टे जातस्य स्वरूपं
शार्दूलविक्रीडितेनाह॥ ॥ चंद्र इति॥ मेषगे चंद्रे कुजदृष्टे राजा। बुधदृष्टे पंडितः।२
गुरुदृष्टे राज्यतुल्यः।३ शुक्रदृष्टे गुणवान्।४ शनिदृष्टे चौरः।५ रविदृष्टे निधनः।६। वृषग
ते चंद्रे कुजदृष्टे दरिद्रः।१ बुधदृष्टे चौरः।२ गुरुदृष्टे राज्यसत्कृत्यः। नृपमान्य इति पाठे नराणां
मान्यः नृपाद्य इति पाठे नृपवदाढ्य ईशः।३ शुक्रदृष्टे राजा।४ शनिदृष्टे धनवान्।५ रविदृष्टे
दासः।६।२। मिथुनगे चंद्रे कुजदृष्टे शस्त्रविक्रयः। बुधदृष्टे राजा।२ गुरुदृष्टे पंडितः।३ शु
क्रदृष्टे निर्भयः।४। शनिदृष्टे वस्त्रवयनकरः।५। रविदृष्टे दरिद्रः।६।३। कर्कगे चंद्रे कुज
दृष्टे युद्धकुशलः।१ बुधदृष्टे काव्यकर्त्ता।२ गुरुदृष्टे पंडितः।३ शुक्रदृष्टे राजा।४ शनिदृष्टे शस्त्रो ॥५९॥
पजीवी।५। रविदृष्टे नेत्ररोगी।६।४।५। ज्योतिर्ज्ञ इति॥ सिंहगे चंद्रे बुधदृष्टे ज्योतिःशास्त्रवेत्ता।१
दृ ~~सिंहगे चंद्रे बुधदृष्टे ज्योतिःशास्त्र~~वेत्ता।१ गुरुदृष्टे ईश्वरः।२ शुक्रदृष्टे राजा।३ शनिदृष्टे प्रम
शुकेत्ता।४ रविदृष्टे राजा।५। कुजदृष्टे नृपः।६।५। कन्यागते चंद्रे बुधदृष्टे राजा।१ गुरुदृष्टे सेना

स्त्रस्म

पतिः।२ शुक्रदृष्टे सर्वकार्यकुशलः।३ शनिरविकुजा न्यत मैर्दृष्टे स्त्रियमाश्रित्य जी
वति।४।६। तुलास्थे चंद्रे बुधदृष्टे राजा।१ गुरुदृष्टे हिमकरः।२ शुक्रदृष्टे क्रयविक्रयज्ञः।३ क्रूर
दृष्टे प्राणिघातकः।४।७। वृश्चिकस्थे चंद्रे बुधदृष्टे युग्मजनकः॥ द्विपितृक इति केचित्।१ गुरु
दृष्टे नम्रः।२ शुक्रदृष्टे वस्त्ररंगकरः।३ शुक्रदृष्टे गदहीनः।४ रविदृष्टे दरिद्रः।५ कुजदृष्टे राजा
।६।८। राज्ञा मान्य इति॥ धनुःस्थे चंद्रे बुधदृष्टे ज्ञातिमर्त्यः।१ गुरुदृष्टे नृपः।२ शुक्रदृष्टे जनानामाधा
रः।३ पापैर्दृष्टे दांभिकः परकार्यविमुखः स्वस्थः।४।९। मकरस्थे चंद्रे बुधदृष्टे महाराजः।१ गु
रुदृष्टे राजा।२ शुक्रदृष्टे विद्वान्।३ शनिदृष्टे वित्तवान्।४ रविदृष्टे दरिद्रः।५ कुजदृष्टे राजा।५।१०।
कुंभगे चंद्रे बुधदृष्टे नृपः।१ गुरुदृष्टे नृपतुल्यः।२ शुक्रशनिरविकुजा मतम दृष्टे परस्त्री
सक्तः।६।११॥ मीनगे चंद्रे बुधदृष्टे परिहासशीलः। गुरुदृष्टे राजा।२ शुक्रदृष्टे पंडितः।३ पापै
र्दृष्टे पापकर्मा।६।१२॥ लग्नदृष्टिफलं चंद्रदृष्टिफलं निर्दिष्टो नोक्तः।४। शीरकर प्रमाण मिहद
णानां स्वदृशा फलं ध्रुवदं तल्लग्नजातमिति॥ अथ चंद्रदृष्टे फलं किमिति नोक्तं। तदुक्तमेव॥ ॥
होरास्वामी गुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटेति। ततः कर्कलग्नबुधमन्यलग्नं चंद्र
दृष्टं हीनबलत्वादशुभफलं॥ तदुक्तं॥ नो कूरणचेहमनवणं लगगग अग्नि प्रिय किरण संदिग्

९७ ॥ अशुभफलं निर्दिष्टं स्वक्षेत्रे शुभदं स्वमन्येषु ॥ ३ ॥ अस्यार्थः ॥ शुक्लाचंद्रः नवनंलग्नगतं शशी ॥ शि
इ॰ र किरणचंद्रं दृश्यम् ॥ अशुभ फलं निर्दिष्टं स्वक्षेत्रे शुभस्तु ति स्वमन्येषु ॥ ३ ॥ अथ होरा द्रेष्का
णद्वादशांशस्थितस्य चंद्रस्य ग्रहदृष्टिफलं शार्दूलेनाह ॥ ॥ होरेशर्क्षेति ॥ होरेशा ग्रहर्दृ
होरायाईश्वरो होरेशः तस्य ऋक्षदलं होरेशर्क्षदलं तत्र स्थितैश्चंद्रः चंद्रहोरायां स्थितैर्गृहै
स्तदृतः स्वहोरास्थश्चंद्रो दृष्टः शुभकरो भवति ॥ यत्र तत्र राशौ स्वहोरास्थश्चंद्रो यत्र तत्र राशौ
गैश्चंद्रहोरास्थितैर्ग्रहैर्दृष्टः शुभकर इत्यर्थः ॥ अथादेवमर्कहोरास्थैर्दृष्टो शुभकर इत्य
र्थः ॥ ॥ शेषाइति ॥ यत्र तत्र राशौ यस्मिन्द्रेष्काणे चंद्रस्थितः तद्द्रेष्काणेशेनदृष्टश्चंद्रः शुभ
करः ॥ यद्यपि सामान्येनोक्तं तथापि शुभग्रहैर्द्रेष्काणपतिभिर्दृष्टः शस्यते ॥ पापैर्मध्यमः ॥ यस्मा
द्रेनेनस्वल्पजातकेठक्तं ॥ हेत्राधिपस्थदृष्टे शशिनि नृपस्तत्सुहृद्भिरपि धनवान् ॥ द्रेष्काणां
शौ वा पैर्वा वाय स्योम्यैः शुभं नान्यैरिति ॥ यद्वादिति ॥ मित्रद्रेत्रस्थैर्ग्रहैर्दृष्टश्चंद्रः शुभः ॥ अथा
दस्वनवनगतेष्व ॥ अथादिवारिनवनगौ दृष्टो शुभः ॥ एवं लग्नेपि योज्यं ॥ यत्प्रोक्तमिति ॥५८॥
प्रतिराशिमेषादिस्थे चंद्रे ग्रहदृष्टे यत्फलमुक्तं चंद्रे भूपबुधाविस्यादिना ॥ तदेव मेषादि
द्वादशांशगे चंद्रे फलं वाच्यं ॥ एवं लग्नेपि तत्र कर्क द्वादशांशो विना चंद्र दृष्टिरशोभना ॥ स्व

यांशे रिति ॥ मेषादिनवांशगे चंद्रे सूर्यादिदृष्टे यत्फलं तदतः परं वसमापाक्रेये ॥ ॥ मेषा
दिचतुष्कनवांशगे चंद्रे ऽर्कादिदृष्टे फलं वसंततिलकेनाह ॥ ॥ आरक्षकइति ॥ मेषांशेनवां
शस्थे चंद्रे रविदृष्टेनगररक्षाधिकृतः १ कुजदृष्टे प्राणिघातकः २ बुधदृष्टे बकुशुश्च प्रवीणः ३
गुरुदृष्टे राजा ४ शुक्रदृष्टे धनी ५ शनिदृष्टे कलिकरोभ्रू स्वद्वित्यर्थः ॥ ६ ॥ वृषतुलांशगे चंद्रे र
विदृष्टे खलः १ कुजदृष्टे परदारासक्तः २ बुधदृष्टे कविर्बहुः ३ गुरुदृष्टे शोभनकाव्यकर्ता ४
शुक्रदृष्टे सुखासक्तः ५ शनिदृष्टे परदारागामी ६ ॥ ५ ॥ मिथुनकन्याकर्कनवांशगे चंद्रे सू
र्यादिदृष्टे फलमाह ॥ ॥ बोद्धइति ॥ कन्यामिथुननवांशस्थे चंद्रे रविदृष्टे महत्त्वादिकः ॥
१ कुजदृष्टे चौरः २ बुधदृष्टे महाकविः ३ गुरुदृष्टे मंत्री ४ शुक्रदृष्टे गीतवित् ५ शनिदृ
ष्टे शिल्पकुशलः ॥ ६ ॥ कर्कनवांशगे चंद्रे रविदृष्टे स्वल्पदेहः १ कुजदृष्टे रूपणः २ बुधदृष्टे
तापसः ३ गुरुदृष्टे प्रधानः ४ शुक्रदृष्टे स्त्रीसेवार्द्धनीयः ५ शनिदृष्टे कार्ये सक्तः ॥ ६ ॥ ६ ॥ सिंहधनु
मीननवांशगे चंद्रे सूर्यादिदृष्टे फलं प्रहर्षिण्याह ॥ ॥ सक्रोधइति ॥ सिंहनवांशगे चंद्रे रविदृ
ष्टे क्रोधी १ कुजदृष्टे राजमान्यः २ बुधदृष्टे विधानभासार्थः ३ गुरुदृष्टे ऽतिहर्ताहः ॥ ४ शुक्रदृष्टे पुत्र
हीनः ५ शनिदृष्टे क्रूरतरकर्मरतः ६ ॥ धनुर्मीननवांशगे चंद्रे रविदृष्टे विख्यातवीर्यः १ कुजदृष्टे

सत्रामह साप्यै।

अंत्यामदेशकाजवृद्ध हरचनादिभिः॥२॥ बुधदृष्टे पहास्यकर्त्ता॥३॥ गुरुदृष्टे मंत्री॥४॥ शुक्रदृष्टे कामश
नः॥५॥ शनिदृष्टे धार्मिकः॥६॥७॥ मकरकुंभांशगे चंद्रे रव्यादिदृष्टे फलं त्वा॥ द्वि स्याह॥ ॥ अल्पेति
७ मकरकुंभांशगे चंद्रे रविदृष्टे अल्पप्रजः॥१॥ कुजदृष्टे धने विद्यमाने पि दुःखी॥२॥ बुधदृष्टे
६० गर्वी॥३॥ गुरुदृष्टे कुत्सितकर्मकृत्॥४॥ शुक्रदृष्टे कुस्त्रीवल्लभः॥५॥ शनिदृष्टे कृपणः॥६॥ एवं
तत्कालनवांशात् क्रूरदृष्ट्या लग्नेपि॥ किंतु तत्र कर्कनवांशं विना चंद्रदृष्टेरभावात्॥ सा मा वि इति
रवौ चंद्रादिदृष्टे तद्वत् चंद्रवत् फलं॥ अयमर्थः॥ यत्र तत्र राशौ यत्र तत्र नवांशगे चंद्रे कु
जादिदृष्टे यत्फलमुक्तं तन्नवांशगे ऽर्के चंद्रादिदृष्टे तदेव फलं॥ किंतु॥ यदादिसदृष्ट्या चंद्रस्यो
क्तं तच्चंद्रदृष्ट्या सूर्यस्य वाच्यं॥ यथा मेषांशगेऽर्के चंद्रदृष्टे आरक्तः क्रूर इत्यादि॥८॥ अथ
नवांशदृष्टिफलेस्यैव विशेषं वसंततिलकेनाह॥ ॥ वर्गोत्तमेति॥ मेषादिनवांशगते
चंद्रे लग्ने ऽर्के च शुभमशुभं चेति द्विविधं दृष्टिफलमुक्तं॥ आरक्तकोपधरुचिरचिरसादि ॥५६॥
॥ तत्र वर्गोत्तमगतस्य चंद्रस्य यच्छुभदृष्टिफलं शुभमुक्तं तद्दत्तीव शुभं भवति स्वांशस्थितस्य शु
भमध्यं। परनवांशगस्य शुभं स्तोकं॥ एवं शुभफलस्य पुष्टमध्यत्वचुता॥ अशुभफलं व्यत्ययेन
ज्ञेयं॥ परनवांशगस्य चंद्रस्याशुभं दृष्टिफलमतीव निकृष्टं॥ स्वनवांशगस्य मध्यमं॥ वर्गोत्त

मगस्य स्तोकमिति॥ एवं लग्नादित्ययोरपि दृष्टिफले योज्ये। जातके सर्वाण्यपि फलानि संभ
वंति॥ तदुक्तं॥ अन्योन्यराशिपंशकसंभवयोगैरन्यैन्यसंदर्शनिर्योगमेषु॥ अन्योन्ययोग वि
७ कल्पनाभिरिंदुः प्रसूतं बुवदघ्नमेयइति॥ वीयेति॥ यस्मिन्नंशे चंद्रो लग्नं वा। तन्नवांशेशो
६० बली स्वर्क्षे राशिदृष्टिफलं वारयति होराद्रेक्काणद्वादशांशगे लक्षणफलमपि कुरुते॥
अयमर्थः॥ नवांशपतिर्बली राशौ लक्षणफलं हित्वांशोक्तलक्षणफलमेव ददाति॥ अथांशपति
रबलस्तदा राशीलक्षणं हित्वांशोक्तलक्षणफलं भेऽपि वाच्यं॥ एवं लग्नचंद्रयोरपि॥ रवेस्तु नवां
शफलमेव वाच्यं। यतस्तस्य राशीलक्षणफलं नोक्तं॥९॥ इति महीधरकृते जातकविवरणे
दृष्टिफलाध्यायः सप्तदशः॥१७॥ ॥ अथ भावाध्यायः॥ तत्र लग्नद्वितीयगरवेः फलं मंदा
क्रांतयाह॥ ॥ शूरस्तब्ध इति॥ अंगाभप्रियः। चिरकार्यकृत्॥ हीनदृष्टिः। निर्दयः। ईदृशो ल
ग्नगेऽर्के सामान्येन॥ मेषलग्नगे बुधनीनेत्ररोगी॥ सिंहलग्नगेऽर्के रात्र्यंधः। तुलालग्नगेऽर्के नेत्र
हीनः। दरिद्रः। कर्कलग्नगेऽर्के पुष्पितनेत्रः॥ १ द्वितीयेऽर्के बहुधनः॥ राजकृत धनः। मुख
पाठात्रिः॥२॥ तृतीयादि फलमौपछंदसिकेनाह॥ मतीति॥ तृतीये बुद्धिमान्। पराक्रमी
३ चतुर्थे दुःखी। निस्वो गृह्नः ४ पंचमे पुत्रहीनः। दरिद्रश्च ५ षष्ठेऽर्के बली रिपुजिन्निर्जि

ल॰॥६॥२॥ सप्तमादिफलं वर्ण्यंते तिलकेनाह॥ ॥स्त्रीभिरिति॥ सप्तमेऽर्के नारिभिः परि
भूतः॥७॥ अष्टमेऽर्के ऽल्पापत्यः हीनदृष्टिः॥८ नवमे पुत्री धनी सुखी च॥९॥ दशमे विद्यावान्॥
पराक्रमी॥ सुखशौर्येति पाठः॥१०॥ एकादशे बहुधनी॥११॥ द्वादशेऽर्के स्वधर्मभ्रष्टः॥१२॥ इति र
विविचारः॥३॥ लग्नादिचंद्रफलं शार्दूलविक्रीडितेनाह॥ ॥मूकेति॥ लग्नेंदौ बधिर
हीनः॥ धातुवैषम्यात् यथेष्टकारी॥ अप्रतिपन्नः नेत्रहीनः अनुचितकर्त्ता श्रोत्रहीनः हीन
पक्षः॥ कर्कमेषवृषलग्नेंदौ तु वित्तवान् बहुरिपुक्षः धनी बहुमेधा॥१॥ द्वितीयेंदौ बहुकुटुं
बः॥२॥ तृतीये वधकर्त्ता॥३॥ चतुर्थे सुखी॥४॥ पंचमे पुत्री॥५॥ षष्ठे नैकशत्रुः सुकुमारांगः नाति
षदाक्षोदराग्निः नातिकामी क्रूरस्वभावः कोपाख्यः पटुः॥६॥७॥ ईर्ष्युरिति॥ ॥सप्तमेंदौ परदि
मत्सरः अतिकामी॥७॥ अष्टमे प्रचुररुग्रोगपीडितः॥८॥ नवमे जननवहनः सुपुत्री सुहृद्युतः
बांधवान्वितः धनी॥९॥ दशमे सर्वकर्मसमर्थः धर्मवान् धनी बुद्धिमान् बली॥१०॥ एकाद
शे उन्नतस्त्रियुक्तो मानयुतः॥११॥ द्वादशे हिंस्रस्वभावः अवयवरहितः॥१२॥ इति चंद्रचारः॥४ ॥६०॥
५॥ लग्नादिगे कुजे बुधे च फलं वर्ण्यंते तिलकेनाह॥ ॥लग्नइति॥ लग्ने कुजे शस्त्रा
दिना क्षतांगः॥१॥ द्वितीये कुत्सितान्नाशी॥२॥ नवमे पापी॥९॥ अन्यत्र कुजो रविवत्फलदः॥१२॥
इति कुजचारः॥ लग्ने बुधे पंडितः॥१॥ द्वितीये धनवान्॥२॥ तृतीये दुर्जनः॥३॥ चतुर्थे विद्वान्॥४॥

पंचमे बुद्धिमान्॥ मंत्री॥५॥ षष्ठे रिपुहीनः॥६॥ सप्तमे धर्मवित्॥७॥ अष्टमे विख्यातयशाः॥८॥ नवमादि
षु रविवत्॥१२॥ इति बुधचारः॥ ॥गुरुफलमिंद्रवज्रयाह॥ ॥विद्वानिति॥ लग्ने गुरौ पंडितः॥१॥ द्वि
तीये श्रीघनवक्ता॥२॥ तृतीये अदाता॥३॥ चतुर्थे सुखी॥४॥ पंचमे बुद्धिमान्॥५॥ षष्ठे रिपुहीनः॥६॥ सप्त
मे जनकात् तुल्याधिकः॥७॥ अष्टमे कुलानुचितकर्त्ता॥८॥ नवमे तापसः॥९॥ दशमे धनी॥१०॥ एकादशे
मानवान्॥११॥ द्वादशे दुर्जनः॥१२॥ इति गुरुचारः॥७॥ शुक्रफलं तामरसेनाह॥ ॥स्मरेति॥ लग्ने
शुक्रे स्मरकेलिलालसः सुखी॥१॥ सप्तमे शुक्रे कलिवल्लभः॥ मे शुनाशिलापी॥ पंचमे शुक्रे संजातसुखः
॥५॥ अन्यभावे गुरुवच्छुक्रफलं॥ अंत्ये मीनगे शुक्रे यत्र तत्रस्थे धनी॥१२॥ इति शुक्रचारः॥८॥
लग्नादिगतशनिफलं शिखरिण्याह॥ ॥अदृष्टेति॥ लग्ने शनौ निःस्वः दरिद्रः व्याधितः का
माधीनः निःस्वमलोपेतः बाल्ये रोगी॥ अतिमंदवाणीकः परं तु धनुर्मीनमकरकुंभतुलास्वतमगे
शनौ राजतुल्यः॥ ग्रामस्य नगरस्य चाधिपतिः पंडितः सुंदरदेहः॥ अन्यत्र द्वितीयादिभावेषु र
वितुल्यफलं॥ तदुक्तं॥ स्वोच्चे स्वजीवभवने क्षितिपालतुल्यो लग्नेऽर्कजे भवति देशपुराधिना
थः॥ शेषेषु दुःखगदपीडित एव बाल्ये दारिद्र्यकामवशगो मलिनोऽलसश्चेति॥९॥ लग्नादा
श्रितत्वाद्यो भावास्तत्तनंतानां ग्रहाणां फलविशेषमालिन्याह॥ ॥सुहृदिति॥ लग्नमेव देह
आद्ये भाले च तथा भावाः कुटुंबसहोत्थादयस्तैः कृत्वा सुहृदादिदेत्रिस्थानां ग्रहाणां फलं वि

विचार्यसुहृदरिग्रहणं मूलत्रिकोणनीचोपलक्षणं परकीयमुदासीनः॥ तेनायमर्थः॥ मित्रक्षे
१८ त्रे स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे च स्थितो ग्रहो यस्मिन् भावे स्थितस्तद्भाववृद्धिं करोति। शत्रुक्षेत्रस्थो नी
भा॰ चस्थो वा यत्र भावे स्थितस्तस्य हानिकरः॥ उदासीनक्षेत्रस्थो न वृद्धिं न हानिं॥ तथाच गार्गिः॥
नीचस्थो रिपुगेहस्थो ग्रहो भावविनाशकृत्॥ उदासीनगृहे मध्यो मित्रस्वर्क्षत्रिकोणगः॥
१ स्वोच्चगश्च ग्रहो भावरूपं भाववृद्धिकरः स्मृत इति॥ सत्याचार्यस्तु सौम्यपापेषु स्वमुपचयविप
रीतवृद्धिनाशौ क्रमाद्भावानां वदति॥ द्वादशाष्टमषष्ठेषु विपर्ययं वक्ति॥ अयमर्थः॥ यस्मा
त्सौम्यास्तद्वृद्धिः॥ यत्र पापास्तद्भावहानिः॥ द्वादशाः सौम्याः व्ययहानिं कुर्वन्ति। पापा व्ययवृ
द्धिं। षष्ठाः सौम्या रिपुहानिं पापा रिपुवृद्धिं। अष्टमाः सौम्या मृत्युहानिं पापा मृत्युवृद्धिमिति
॥१०॥ कुंडलीफलविशेषमनुष्टुभाह॥ ॥उच्चेति॥ शुभफलमुच्चादिगैः ग्रहैरादिकं भ
वति॥ अयमर्थः॥ ग्रहकुंडलीफलं शुभमशुभमिति द्विविधमुक्तं। तत्र शुभफलं स्वोच्चगः ॥६१॥
संपूर्णं ददाति॥ मूलत्रिकोणगः पादोनं स्वक्षेत्रगोऽर्द्धं॥ मित्रक्षेत्रगः पादमात्रं शत्रुक्षेत्रस्थः
पादादप्यल्पं॥ उच्चगो न किंचिदशुभं॥ एवं जातककाले ग्रहभावस्थानात्फलं वाच्यं॥ दशाष्टकव
र्गादिफलं तु पंक्तिकालेऽशुभमशुभं वा पुष्टं बलानामेव भवति॥ तथाच वैकालाचार्यः॥ तस्मा

१८ त्वं न लघुक्तो जदृष्टो इदसा पद्धति स्म। फलमशुभं जइ विशुद्धं वत्सरं लोकमेव पारहरणं
भा॰ अस्यार्थः॥ तत्कालं बलशुको यदि भवति दशापतिस्तस्य॥ फलमशुभं यदि वाशुभं वक्तव्यं नि
त्यमेव परिहरणमिति॥ ११॥ इति महीधरकृते जातकविवरणे भावाध्यायोऽष्टादशः॥ १८॥
॥ अथाश्रयाध्यायः॥ ॥ तत्रादावेकादिग्रहैर्योगनरहृष्ट्या स्वगृहगतानां मित्रगृहगा
तानां च ग्रहाणां फलं पुष्पिताग्रयाह॥ ॥ कुलसमेति॥ स्वगैक हृष्ट्या कुलसमादयः
यथा॥ यत्र कुत्राप्येकस्मिन् स्वक्षेत्रगे स्ववंशतुल्यः॥ १ द्वयोः स्वगयोः कुलाधिकः॥ त्रिषु
बंधुमान्यः॥ ३ चतुर्षु धनी॥ ४ पंचसु सुखी॥ ५ षट्सु नृपतुल्यः नृपो न्यपतुल्य इत्यर्थः॥ ६॥ उ
सप्तसु राजा॥ ७॥ एवमेकस्मिन् मित्रक्षेत्रगते परिभवैः पोष्यः॥ परजीवीत्यर्थः॥ १॥ द्वयो
र्मित्रपोष्यः॥ २॥ त्रिषु स्वैज्ञातिभिः पोष्यः॥ ३॥ चतुर्षु भ्रातृपोष्यः॥ ४॥ पंचसु गणस्वामी॥ ५॥
षट्सु बलस्वामी॥ ६ सप्तसु राजा॥ ७॥ एको ग्रहः फलं रिपुराशिगानां च फलं मालिन्या इ॥
नयतीति॥ एकतुच्चगतो मित्रावलोकितः मूत्र राज्ञां करोति॥ अथ वोच्चो मित्र
योगात्स्वमित्रयुतः धनं प्राप्नोति सर्वत्रावासहस्तं च कुरुते॥ विवक्षितिति॥
एकस्मिन् शत्रुक्षेत्रगे नीचगे वा दरिद्रः॥ १॥ द्वयोः दुःखी॥ २॥ त्रिषु विंचितः॥ ३॥ चतुर्षु रोगी॥ ४

पंचमस्थं धनपीडितः ५। षष्ठस्थे धर्ममेतोवध्य इत्यर्थः। ६। अष्टमस्थे शत्रुभिर्गेहीनीचो
१९ लस्थितस्त्वमेतः ।५।७। यद्यपि अष्टनीचेनी मंभवति तथापि वज्रवत् हर्षदा स्त्वानु
श्री॰ सारेणोक्तः।२। ॐ मलग्नफलमुपजात्याह ॥ ॥नक्षेति। अत्याचार्याः ॐ मलग्नं स्युः स्वं वाहो
लक्ष्णुक्ते। अस्मिन्विलग्ने जातो भवति नरोदुःखशोकभंगत सह इति। यवनास्तु भागभेदावत्वा
दशांशभेदात् ॐ मलग्नं न अत्र मितिवदंति। यस्यतस्य लग्नस्य ॐ मद्वादशांशो नस्थमं
ॐ मलग्नं तु उक्तमेव। तदुक्तं। सर्वस्मिन् गोलग्नगते ॐ मद्विरंशोशको यदा भवति राशौ।
न तदा सुखिनः परान्नभोजी भवेन्मनुज इति॥ विष्णुगुप्तस्तु ॐ मद्वादशांशोक्तौ अतिभ
मंगवदंति॥ यतः कस्यराशेस्तथांशभेदक्तं मद्वादशांशभाग भोगोनास्ति तस्मात् यदि
ॐ मद्वादशांशो लग्नगो यदि भस्मजइति कथ्यते तदा सर्वाणि लग्नोक्तफलानि। नीर
र्थकानि स्युः॥ ततः ॐ मलग्नमेवास्तु सं॥ तदुक्तं॥ ॐ मद्वादशभागो लग्नगतो न प्रशस्य
तेयवनैः॥ यद्येवं सर्वेषां लग्नगतानामनिष्टता स्यात्॥ घट्योगाद्राशीनां न तन्मतं ॥६२॥
सर्वज्ञशास्त्रकाराणां तस्मात् ॐ मविलग्ने जन्म न्यस्तं तु न कृत्वो भाग इति॥७॥ होरास्थ
गहफलं वक्ष्यं ततिलकेनाह॥ ॥याते ष्विति॥ विषमराशिस्थे रवि हो

रास्थे सूर्ये पापेषु मेषादिविषमराशिस्थहोरास्थेष्वित्यर्थः। तदाजातो नरो महत्स्वकार्येषु
उद्यतः। वीर्यवान् धनवान्। अतितेजस्वी च भवति। सौम्ये युग्मभराशिहोरागतेषु
सौम्यस्वभावः। कांतिमान्। सुखी। जनवल्लभः। बुद्धिमान्। प्रियंवदश्च॥७॥ युग्मे होरा
फलं भिंद्रवज्रयाह॥ तास्विति॥ होरास्थेषु परराशयाश्रितेषु यहेषु जातः होरास्थि
मध्यमगुणान्वयः॥ विपरीतहोरासु विपरीतराशिगेषु ग्रहेषु जाताः होरास्थितैः
हिताः॥ अयमर्थः। पापाः समशौरविहोरागताः सौम्याविषमराशौ चंद्रहोरागताः॥
तदा होरास्थितैर्मध्यगुणवान्॥ पापाविषमराशौ चंद्रहोरागताः सौम्याः समराशौ रविहो
रागतास्तदा होरास्थितैः किंचिद्गुणवान्॥ यदा च समराशौ चंद्रहोरायां पापाः विषमरा
शौ रविहोरायां सौम्यास्तदा होरास्थितैर्गुणवर्जितः स्यात्॥ एवं सुरबकुलवे फलाधिकं वा
च्यं ।५।। चंद्रदृष्टफलं वसंततिलकेनाह॥ कल्याणेति॥ स्वदृक्काणे तात्कालिकाधि
मित्रदृक्काणे वा स्थिते चंद्रे प्रशस्तरूपः। प्रशस्तगुणश्च। अन्यदृक्काणगते चंद्रे स्व
दृक्काणे स्वगुणं कुरुते। यथा यदृक्काणे चंद्रस्तदीशो चेदस्य मध्यस्थे मध्यमरूपो

मध्यगुरुराश्च। चंद्रद्रेष्काणेन्नोचंद्ररिपौ जातो रूपगुणहीनः॥ व्यालेति। सर्पद्रेष्काणे चंद्रे आत्म
घाती। आयुधद्रेष्काणे स्थे प्राणिघातरतः॥ चतुष्पदद्रेष्काणगे गुरुदारगमी। पक्षिद्रेष्काणगे
चंद्रे धूर्तात्मा॥ स्त्रीयद्रेष्काणगे चंद्रे व्यालादिद्रेष्काणगे च चंद्रे फलद्वयमपि वक्तव्यं॥ वृश्चि
काद्यद्वितीयौ कर्कद्वितीयतृतीयौ मीनतृतीयः ५ एते व्यालद्रेष्काणाः॥ मेषाद्यतृतीयौ। मिथु
नद्वितीयतृतीयौ सिंहद्वितीयतृतीयौ कन्याद्वितीयः तुलातृतीयः धन्विप्रथमतृतीयौ मकरतृ
तीय एते आयुधद्रेष्काणाः॥ मेषद्वितीयः॥ वृषद्वितीयतृतीयौ कर्कसिंहयोराद्यौ सिंहद्वितीयः
तुलातृतीयः वृश्चिकतृतीयः सिंहतृतीयः धन्विप्रथमः मकरप्रथमः एते चतुष्पदद्रेष्का
णाः॥ मिथुनद्वितीयः॥ सिंहाद्यः कुंभाद्वितीयः॥ कुंभाद्यः एते पक्षिद्रेष्काणाः॥ अत्रापि गुणा
द्ययांतर्भूतद्रेष्काणस्थे चंद्रे फलद्वयं वाच्यं॥६॥ लग्नस्य नवांशद्वादशांशयोः फलं शार्दूलेना
ऽऽह॥ ॥ स्तेनइति॥ मेषवर्ज्यमन्यराशौ लग्नगते मेषांशे चौरः १। एवमग्रेपि॥ वृषां
शे भोगशालः २ मिथुनांशे पंडितः ३। कर्कांशे वित्तवान् ४ सिंहांशे राजा ५। कन्यांशे नपुं ॥६३॥
सकः ६ तुलांशे युद्धप्रियः ७ वृश्चिकांशे परादेशकरः ८। धनुरंशे नीचवृत्तिः ९। मकरांशे
पापी। १०। कुंभांशे घातुकः ११। मीनांशे निर्भयः १२। अथादितिपाठे निर्बुद्धिः॥ वर्गोत्तम

नवांशे श्रुते षांस्तेनादीनां स्वामिनः मेषलग्ने मेषांशे चौराणां स्वामी॥ वृषलग्ने वृषां
शे भोगीशः॥ एवमग्रेपि। द्वादशांशे राशिवत्फलानि॥ मेषादिस्थे चंद्रे यानि फलानि पुंस्त्वा
दिकानि तान्यत्र दृग्गिस्यादीनि तान्येव मेषादिद्वादशांशे जातस्य वाच्यानि॥७॥ भौमशन्यो
स्वत्रिंशांशस्थयोः फलं वसंततिलकेनाह॥ ॥ जायान्वितइति॥ स्त्रीयुतः॥ बीयलिंक्षी
रौदार्यैर्युतिः तेजस्वी अधमः छिलकारीईदृशः स्वत्रिंशांशगे कुजे॥ शुक्रफले त्रिंशांशो
पादानादत्र भागरन्ध्रेन त्रिंशांशाः॥ एमग्रेपि। व्याधितः विपन्नभार्यः। क्रूरस्वभावः द्वितीय
स्त्रीकः ६ स्वयुतः॥ रूपयादिपरिवारोपेतः मज्जान्वितः॥ ईदृशः शनौ त्रिंशांशगे जातोन
वाति॥ ८॥ गुरुबुधयोः स्वत्रिंशांशगयोः फलमाह॥ स्वांशइति॥ धनी यशस्वी। सुखी
धीमान्। मान्यः स्वस्थदेहः उत्तमशीलः॥ भोगी॥ ईदृशो गुरौ स्वत्रिंशांशगे। धीमान् गा
नवाद्यादिकुशलः दंभी कविश्रान्तः। वावदूकः नीचकर्माशा स्वान्वितः अर्थवान् अधमोऽसि
तकारी अतिहृज्यः ईदृशो बुधे स्वत्रिंशांशगे ।८। स्वत्रिंशांशगयोः शुक्रफलं सोमादित्रिंशा
त्रांस्थयोरवाड्यो स्वफलं मंदाक्रांतयाह॥ ॥ स्वत्रिंशांशइति॥ बहुपुत्रः॥ बहुसुखः॥ नीरोगः॥
भाग्यवान्। धनी। रूपवान्। भार्याथेतिपाठे पत्नीवान् क्रूरः सुंदरः अजितेंद्रियो विषयासक्त

इत्यर्थः। इद्विशः शुक्रे स्वत्रिंशभागे॥ शूरेति॥ आरस्य त्रिंशांशके भौमजादि त्रिंशांशेषु आरादयस्थि-
१९ तांशो ज्ञेया ह्याः॥ तेन कुजन्नशा निरुक्तं बुध शुक्र त्रिंशांशो वो बुध विज्ञा स्वीयेषु ते शुक्र माशूरा-
आ॰ अ॰ द्यः स्युः॥ अयमर्थः॥ कुजांशकस्थे ऽर्के शूरः॥ चंद्रे चिरकार्यकारी॥ शनित्रिंशांशभागे रवौ क्रूरस्व-
भावः॥ चंद्रे वधरुचिः॥ गुरुत्रिंशांशभागे ऽर्के येकुशायुतः चंद्रे धनाढ्यः॥ बुध त्रिंशांशभागे ऽर्के
सुखी चंद्रे पंडितः॥ शुक्र त्रिंशांशभागे ऽर्के सुंदरतनुः चंद्रे सर्वजनप्रियइति॥१०॥ इतिमहीधरक-
ते बृहज्जातक विवरणे आश्रयाध्यायएकोनविंशतितमः॥१९॥ ॥अथ प्रकीर्णकाध्यायः॥
तत्र ग्रहाणां परस्परं कारकसंज्ञां वैतालीयेनाह॥ ॥स्वर्क्षेति॥ स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे च स्थि-
तोग्रहो यदि लग्नकेंद्रगो भवति तस्यासौ ग्रहः स्वक्षेत्रादिस्थितः एव केंद्रगस्तदा ते परस्परं
कारकाः स्युर्भवंतः॥ एवं यावंतो ग्रहाः स्वोच्चस्वगृहे वा तेन्योन्यं कारकसंज्ञाः कर्मगइति॥ अने-
न वि॥ धिना यो यस्माद्दशमस्थः स विशेषेण कारकसंज्ञः॥१॥ अत्रोदाहरणं रथोद्धतयाह॥ ॥
कुकटेति॥ कर्कलग्नगश्चंद्रः मकरे कुजः तुलायां शनिः मेषेर्कः॥ कर्केगुरुः॥ एवं योगे मस्ते ते स्प- ॥ दि॥
र्वेऽन्योन्यकारकाः॥ अनेनोदाहरणेन तदुक्तं॥ यथा नरस्य जन्म कर्कलग्नात् केंद्रे दिनाद्यु-
द्यपि स्वक्षेत्रस्वोच्च मूलत्रिकोणगाः संतः परस्परं केंद्रगास्तथापि कारकाख्या न लभंते

लग्नगस्येति॥ लग्नस्थग्रहस्य दशमस्थो ग्रहश्चतुर्थस्थोपि ग्रहः कारकसंज्ञो भवति॥ अ-
नेनैतदुक्तं॥ लग्नगो ग्रहो यदि स्वक्षेत्रादिस्थो न तस्माद्दशमचतुर्थोपि यदि स्वक्षेत्रादिगुन
स्यात्तथापि लग्नस्य दशमश्चतुर्थो वा कारकाख्यो भवत्येवेति॥ यदुक्तं॥ लग्नगस्य सकलो-
ऽबुरां बुगइति॥२॥ अन्यत्कारकलक्षणमनुष्टुभाह॥ स्वेति॥ लग्नकेंद्रं विनापि स्वक्षेत्रे मूलत्रि- छ
कोणान्यतमस्थो ग्रहो रवेः कारकः स्यात्॥ यदि तस्यान्यो ग्रहो मित्रभूतः स्वक्षेत्रस्वोच्चा-
दिस्थः सन्दशमो भवति किं न स्यो पीदृशोः कारको भवति॥ यन्मित्रं स्वा॥ भाविकं नाम कि-
कं मित्रं अधिमित्र इति केचित्॥३॥ कारकसंज्ञा प्रयोजनमाह॥ ॥शुभं वर्गोत्तमे जन्म वे-
शिस्थाने च यहरुह॥ अशून्येषु च केंद्रेषु कारकाख्यग्रहेषु चेति॥ लग्ने स्वांशस्थे सूर्य इति हिता
यजनने शोभ्य ग्रहः शुभे च चतुष्केंद्रेषु ग्रहेषु च कारकसंज्ञग्रहेषु जन्मशोभनं वाच्यं॥
केंद्रगाः सौम्यास्त्वति प्रशस्ताः॥ तदुक्तं॥ एकस्मिन्नपि केंद्रे यदि सौम्यो न ग्रहो स्ति यात्रायां॥ ज-
न्मन्यथ वा कर्मणि न तच्छुभं प्राकृशर्याइति॥ यथा रवद्व स्तया॥ धिकं शुभं॥४॥ यौवने सुख-
योगं दशापतिफलपाकं च वैतालीयेनाह॥ ॥मध्यइति॥ गुरुर्जन्मराशीशो जन्मलग्ने-
शो वा केंद्रगतो यौवने सुखदाता॥ सर्वेषां धिक्यं॥ तदुक्तं॥ लग्नाधिपो जन्मपतिश्च येषां चतु-

२० भट्टो

ष्टये स्याद्बलवान् गुरुर्वा॥ चतुर्थ्युदितो न दिक्षु संगमं गत्वेच्छतु र्वर्यः कालफलप्रदः स्यादि
ति॥ दृष्टेति॥ दशेशाः दृष्टोदयादिगाः क्रमाद्दशांतर्मध्यादिकुफलप्रदाः॥ अयमर्थः॥ ७
दशापतिर्दशाप्रवेशकाले प्रष्टोदयराशिगः स्वदशांते फलदः॥ शीर्षराशिगो दशामध्ये फल
दः॥ शीर्षोदयगो दशादौ फलदः कंशीर्षे॥ तदुक्तं॥ आद्यंतमध्यफलदः स्थिरः पृष्ठोदयादि उ
योदयाः॥ दशाप्रवेशसमये तिष्ठन् वा चोदशापतिरिति॥ ५॥ अष्टकवर्गफलं पुष्पिताग्र
याह॥ दिनकरेति॥ चारवशात्प्रक्रियाकालेष्टकमष्टकवर्गफलं रविकुजौ राशेराद्य
त्रिभागस्थौ प्रयच्छतः॥ गुरुशुक्रौ राशिमध्यत्रिभागगौ फलं दत्तः॥ शनिचंद्रौ राशेरंत्यत्रिभा
गगौ फलप्रदौ॥ बुधो यावद्राशौ तिष्ठति तावत्सर्वमशुभं फलं ददाति॥ ५॥ इति श्रीधर
कृते जातकविवरणे प्रकीर्णाध्यायो विंशः॥ २०॥ ॥ अथानिष्टाध्यायः॥ तत्र स्त्रीतनयना
शयोगं शार्दूलेनाह॥ ॥ लग्नादिति॥ लग्नाद्वादशपंचमस्थ समं चंद्रं पापग्रहैः स्वस्वामिनाच॥ ६५॥
युक्तं दृष्टं वा पुत्रदारा यस्य दं स्यात्॥ तयोः पुत्रस्वत्वयोर्योगद्वयनिरासार्थं सुतकलत्र भावौ
क्रियेचा॥ कन्यास्थलग्नगैर्वा संपत्तमे चनाशो स्त्रीनाशः॥ कन्यालग्नगैरर्के पंचमे कुजे पुत्रना
शः॥ सुतकलत्रपदमुपलक्षकं मन्ये पंचलग्नाद्वादशौ तन्वादिनां भावानां शुभस्वेशयुतदृष्ट

नां हृष्टिं तदभावे हानिः॥ १॥ भार्यानिमित्तियोगत्रयं रुचिरयाह॥ उदयगइति॥ शुक्रो चतुर्थ
ष्टमगैरवि कुजैरर्थेनाशस्त्रीनाशः॥ एकस्मिन्नाशौ भिन्नराशौ वा पापद्वयमध्यगते
शुक्रे पत्न्या भार्यानाशः॥ २॥ सोम्याभावमनुष्यत मेन शुक्रे विरहिते शुक्रे नवलो कितेवा पा
शाश्रयनिवृ॥ बंधनेनात्मानं स्त्री व्यापादयतीत्यर्थः॥ तदुक्तं॥ चतुर्थ्यष्टमगैर्भुक्ते सौरा
राकैर्हताश्रनात्॥ तेषां मध्यस्थिते पापमध्यस्थिते तथा शुक्रे निपातजः॥ शुक्रे सद्योगदृष्टिहीने पाशाश्र
यदि वधोभवेदिति॥ २॥ कारणविकलदारयोगद्वयं वसंततिलकेनाह॥ ॥ लग्नादिति
॥ यस्य द्वादशे चंद्रः सप्तमेऽर्कः स भार्यः काणोभवति॥ यस्य शुक्रो केन्द्रगतो युतो सप्तमे न व
मे पंचमे वा स्थः तद्भार्याहीनांगी॥ तदुक्तं॥ पंचमे नवमे द्यूने सहितौ सितभास्करौ॥ यस्य
स्यात्तां भवेद्भार्या तस्य कोणविवर्जितेति॥ ३॥ वंध्यापति योगं सुतकलत्रा भवयोगं चर
त्नमालयाह॥ ॥ कोणेति॥ यस्य लग्नेशानि क्रौंतिमीनान्यतमनवमनवांशगः शु
क्रः सप्तमः यदि पंचमस्थानं सौम्ययुतं न तस्य भार्या वंध्या स्यात्॥ अयं योगो मकरवृष
कन्यालग्ने भवत्यं भवति। वंध्यायाग्रहणमेतदूरूपयति॥ यस्य रिणीता वंध्या भवति। रु

सुरजा·माद्रा·नाष्वी।

द्वादिकार्यांनुसुतोनवर्त्तेव॥ किंच पापग्रहेकुशानिभौमार्कैश्चयथासंभवं द्वादशस्थ लग्नगे शुक्रे लग्नचंद्रे पंचमे भार्याहीनः पुत्रहीनश्च॥ ॥ परस्त्रीगमनादियोगं हरिरप्याह॥ २९
भासितेति॥ ॥यस्य शनिकुजास्यतमवर्गस्थः शनिकुजास्यतमदृष्टः शुक्रः सप्तमः सः
परदारगामी॥१॥ अस्मिन्नेवयोगे यदि शनिकुजावेकराशिगौ सचंद्रौ च। अयमर्थः।
२९ शनिकुजास्यतमवर्गस्थः शनिकुजचंद्रैरेकस्थैर्दृष्टः शुक्रः सप्तम इति। तदा नायश्चिद्व्य
भ्रौनि. भिचारी। पापिनरगामिनीत्यर्थः।२॥ यत्रतत्रैकस्थौ भौमशुक्रौ द्युने सप्तमे यदि शनिकु
जौ तदा भार्याहीनः सुतहीनो वा॥३॥ स्त्रीचनाचस्त्रीनरौतयोः स्त्रीनरयोरुयोरेकराशि
गयोः सकाशात्सप्तमे यदि भौमशुक्रदृष्टौ शनिकुजौस्तस्तदा दंपती परिणततनू वृद्धौ॥
वृद्धत्वं वृद्धभार्यत्वं भवतीत्यर्थः॥४॥ अन्यान्योगानंदाकांतयाह॥ ॥ वंशछेत्ते
ति॥ यस्य चंद्रोदशमः शुक्रः सप्तमः पापाश्चतुर्थः स वंशनाशकोर्द्धृयेधनभाग्यइत्यर्थः॥ ॥६६॥
१॥ बुधयुतरवेर्द्धादशेकेन्द्रगद्वानिदृष्टेशिल्पी। अयमर्थः। यराशौ सबंधितिरेखाले बुधः
स्थितः परा शीर्यादिकेन्द्रस्थेनशनिनादृष्टस्तदा चित्रकर्मादिनाजीवतीत्यर्थः॥२॥ शनि

नवांशगे गुरौ द्वादशो दासीपुत्रः॥३॥ शनिदृष्टे रवौ द्यूयदि सप्तमौ तदानुचितकर्मकृत्॥४॥
॥ अन्यानि पुयोगानू शार्दूलेनाह॥ ॥पापेति॥ पापदृष्टे भौमशुक्रकुजौ यस्य सप्तमौ तस्य
वातव्याधिः। बाईरुगिति पाठे मूत्ररोगः॥१॥ यत्र यत्र राशौ चंद्रो वृश्चिकोन नवांशगः कर्क
नवांशगो वा पापयुतस्तदा गुह्यरुग्कुष्ठव्याधिः॥२॥ शनिकुजौ द्वादशाष्टितायौ। चंद्रोल
ग्नेरविः सप्तमेक्ष्व्यश्च॥३॥ चंद्रो दशमः कुजः सप्तमः शनिः स्वस्थिनगस्तदा हीनांगः॥४॥७॥
अन्यान्योगाननूवसंतेनाह॥ ॥अंतरिति॥ यत्र तत्रस्थे चंद्रे शनिकुजमध्यगे रवौ तु मकर
गे श्वासादिमान्॥ क्षयो धातुक्षयः॥१॥ शिशो वामकुक्षिस्थो मांसपिंडः। विद्रधि व्रणविशेषः॥
गुल्मलक्षणो तु रुग्स्यारंतरगूंथिः। अंचारी युदि वाचलः॥ वृत्तश्चपापचयवान् गुल्मइत्यपि
धीयते इति॥ रवौ द्वोरन्यो न्ययरांशो वा गतयोः शोषवाग्नू तृक्षया। अयमर्थः। कर्केऽर्कः सिंहेचं
द्रेयद्वाय त्र तत्रराशौ सिंहनवांशे चंद्रः कर्कनवांशेऽर्कः तदा शोषीति। तदुक्तं। परपरस्परगृहे यातौ
यदिवापि तदंशगौ नवेतामृक्षणौ तौ स्तदा शोषीप्रजायतइति॥ दोत्र इति॥ तुल्यद्वालतयोरेवा
न्योन्यदेनगयोर्वाशौ बालक्षशोवा। अयमर्थः। सिंहेऽर्केहकर्के वा तदापि क्षयी दुर्बलोवा॥८॥
अन्यानि यियोगानाह॥ चंद्र इति॥ धनुः पंचमनवांशगर्भेदीय दि शनिकुज युक्तस्तदाष्टावा

॥ इजा॰मरा॰ष्टं॥

२९ ऋक्षनि

तदा कुष्टी॥ यद्वा यत्र तत्र राशौ मीनकर्कमकरमेषान्यतमनवांशगश्चंद्रः कुजशन्यन्यत ३०
मयुक्तो दृष्टो वा तदापि कुष्टी॥ वृश्चिककर्कमकराणामन्यतमः पापयुतो दृष्टो वा यदि पंच
मो नवमो वा तदापि कुष्टी॥ एवं योगो के चंद्रे शुभदृष्टे कंडूरेव न कुष्टी॥ तदुक्तं॥ मेषांशके
मीनगृहांशके वा चंद्रस्थितोऽत्रैव हि पापदृष्टः॥ किलासकुष्टादि करोति देहे मिष्टे क्षितेः कं
डुर्विकारिणी चेति॥६॥ अन्यान्योगान्वैतालीयत्रयेणाह॥ ॥निधने ति॥ रवौ कुजशा
नयोर्यथाकथंचिदष्टमषष्ठद्वितीयद्वादशस्थे॥ यथातथेति क्रमाभावः॥ तदा नेत्रनाशः॥
कथं बलवदिति॥ चतुर्णां मध्याद्यो बलवांस्तस्य यो वातपित्तश्लेष्मणां मध्याद्दोष उक्तस्तत्प्र
कोपेन नेत्रनाशः॥१०॥ नवमेति॥ पापग्रहा नवमैकादशात्तृतीयापंचमाः शुभैरदृष्टाः सं
तो बलवत्क्रूरदोषकारणेनैव बाधिर्यकराः॥ सप्तमाः क्रूराः शुभैरदृष्टास्तथैव वदंति विकारकराः
अत्राशुभैरदृष्टैरेव श्लोकोक्ताश्चंद्रशुक्रशनिकुजा एव ग्राह्याः॥११॥ उडुपतीति॥ शशिनि सेने
रेलग्नगे शनिकुजयोस्त्रिकोणगयोः पिशाचाधिष्ठितः स्यात्॥ एवं रवावपि॥१२॥ अन्ययो ॥६७॥
गान्दशाहदेनाह॥ ॥पंचमस्थइति॥ पंचमे शनौ लग्नगे गुरौ वा शुभस्थः॥ पंचमे कुजे लग्ने
गुरौ उन्मत्तो विचित्र इत्यर्थः॥२॥ लग्नगेऽर्के कुजे नवमपंचमग

मस्थे पित्तोन्मत्त एव॥३॥ रात्रियुत्तरीणोदौ कादशगे पित्तोन्मत्त एव॥१३॥ अन्ययोगान्वचंतेना
ह॥ राशीति॥ यन्नवांशे चंद्रः स राशिपेशः तस्य यः पतिः स राशिपेशपः रविश्चंद्रः गुरुः एते यदि स्व
नीचराशिपतिनवांशे रिपुनवांशे वा स्थिता स्तदा दास्यो भवति॥ एष्यइति॥ एवाम लग्न एकः
दौ मध्यो॥ त्रयश्चारो बहवः॥ उक्तग्रहेषु यस्यैको नीचाधिपनवांशगोऽरिनवांशगो वा सत्र
म्युपगमेनात्मनो जीवनार्थं नदास्य॥ यस्य द्वौ स क्रयदास॥ अन्येन क्रीतः सनु दासः॥ यस्य
त्रयश्चारो चेद्ग्रहाः स गर्भदास्य॥ दासस्य दास्या वा पुत्रो लोकगृहे जातः स्यात्॥१४॥ अन्ययो
गान्हिरण्याह॥ ॥बिद्धतेति॥ मेषवृषधनुषामन्यतमे लग्ने पापदृष्टे विरूपदंतः॥ मेषालि
सिंहमकरकुंभधनुर्वृषान्यतमे लग्ने पापलक्ष्ये खल्वाटः॥२॥ पापेक्षिते र्के नवमे पंचमे वा अं
दनेत्रः॥३॥ शनौ पापदृष्टे नवमे पंचमे वा बहुरोगः॥४॥ कुजे नवमे पंचमे वा पापदृष्टे हीनां
गः॥५॥१५॥ अन्यानिह योगानुपुष्पिताग्रयाह॥ ॥व्ययभुतेति॥ पापेषु द्वादशपंचमेष्ट
द्वितीयनवमेषु जातस्य बंधनं वाच्यं॥ तच्च बंधनं लग्नराशिस्तुल्यं॥ लग्नराशे र्येनिविधि
ना बध्यते स मनस्तथा बध्यते॥ यथा मेषवृषधनुरन्यतमे लग्ने जातस्य रज्वादिना बं
धनं॥ मिथुनतुलाकुंभकन्यान्यतमे निगडैः॥ कर्कसिंहमकरमीनलग्ने शरारबंधनविना
दुर्गरहितः॥ ॥वृश्चिकलग्ने गृहे॥ भुजगेति॥ लग्नदृक्काणो भुजगश्चेत्तदा निगडपाशान्तकः॥

बृहज्जा० मञ्जरी भाष्ये॥

२१ ॥निगडपाशाच्चदित्येक एव पाशान्ततः पृथग पाठात्॥ अचेद्बलवता पापेन दृष्टस्तदापि भव
नतुल्यं बंधो वाच्यः॥ भुजगदृक्काणउक्तः॥ निगडन्तदृक्काणो मकराद्यः॥१५॥ अस्मान प्रियो

श्री नि गान्नाह रिणाह॥ परुषेति॥ शनियुते चंद्रे कुजदृष्टे तत्कालं परिवेषयुते च जातो दुर्वचनः॥
अपस्मारपीडितः क्षयपुतश्च॥ अयमर्थः॥ चंद्रे शनियुते काठिण्यवाक्॥ तादृशे एव कुजदृ
ष्टेऽपस्मारान्वितश्च शनियुते कुजदृष्टे च चंद्रे अपरिवेषे दुर्वाग्अपस्मारक्षयवान्॥ रविकुजयुत
कुजेरिति॥ सौम्यग्रहादृष्टेषु रविकुजशनिषु नृत्यो भवति॥ तवीदृष्टे रव्याद्यैरुत्तमाधम
मध्यमान्त्यास्युः॥ अयमर्थः॥ त्रयाणामेकस्मिन् सौम्यादृष्टे दशमे दृष्टेस्मो पांनृतिं करो
ति॥ द्वयोर्मध्यमो त्रिषु अधमो जुगुप्सितां नतिं करोतीति॥१७॥ ॥इति मञ्जरी धरकृते जातक
विवरणे निष्टाध्याय एकविंशः॥२१॥ ॥अथ स्त्रीजातकाध्यायः॥ ॥७॥ ॥॥
तत्र पुंजन्मोक्तफलानि निर्दिशंतदधिकं च वक्ष्यंतत्तिलकेनाह॥ ॥यद्यदिति॥ नरस्यैव पुंजन्म ॥६८॥
नियतं यत्फलं स्त्रीणां भयोग्यं राज्यादिषु भर्तृषणनाशादिपापां तनुस्त्वर्भुवदेत्॥ ॥
दृष्नाता स्वदेगुहे स्यादियस्त्रीयोग्यं तन्नाभ्यामपि वाच्यं॥ सुनफादियोगफलमुभयोरपि
एवं त्रिविधानि फलानि काणि विरस्त्रीयोग्यानि कानि चिन्नरेष्यकानि चिदुभयोरपि॥ यद्वा

अर्वं स्त्रीफलेयतिद्धेव॥ विशेषमाह॥ लाग्यामिति॥ पतिस्थितिरष्टमे वाच्या॥ लग्नादिंदोश्च शरीरं
सौजाग्यं याहक् पतिस्थिता दृष्टास्तदुभयं सप्तमे वाच्यं॥ तत्सर्वं वल्पाति॥ यदुक्तं॥ वपुर्लग्नेंदुगं तदा
ह॥ युग्मइति॥ समराशिगयोर्लग्नेंद्वोः स्त्रीस्वभावाकारा तयोरेव सौम्यदृष्टयोः शीलवती वाल
कारयुक्ता च॥ लग्नेंद्वोर्विषमराशिगयोः पुमाकारा पुंस्वभावा च॥ तयोरेव पापदृष्टयोः पापकर्म
युतान्हीना च॥ एवं लग्नद्वोरन्यथात्वे मध्यमात्वं वाच्यं॥१॥ कुजराशौ लग्ने कुजादित्रिंशांशजाता
याः फलमिंद्रवज्रयाह॥ ॥कन्येति॥ मेषवृश्चिकान्यतमे लग्नेमेषालिगे चंद्रे वास्ति तत्र कुज
त्रिंशांशे जाता कन्यैव व्यभिचरति॥१॥ शनित्रिंशांशे दासी॥२॥ गुरुत्रिंशांशे सती॥३॥ बुधत्रिंशांशे
मायाशाठ्ययुता॥४॥ शुक्रत्रिंशांशे दुर्वृत्ता॥५॥३॥ शुक्रबुधराशौ लग्नगे चंद्रगे वा कुजादित्रिं
शांशफलमाह॥ दुष्टेति॥ वृषतुलास्थे लग्ने चंद्रे वा कुजत्रिंशांशजा दुष्टस्वभावा॥१॥ शनित्रिंशांशे
विवाहानंतरमन्यभार्या॥२॥ गुरुत्रिंशांशे गुणवती॥३॥ बुधत्रिंशांशे कलाचतुरा॥४॥ शुक्रत्रिंशांशे वि
नयादिभिः प्रसिद्धा॥५॥ मिथुनकन्यास्थे लग्ने चंद्रे वा कुजत्रिंशांशे कपटनी॥१॥ शनित्रिं
शांशे नपुंसकतुल्या॥२॥ गुरुत्रिंशांशे साध्वी॥३॥ बुधत्रिंशांशे गुणवती॥४॥ शुक्रत्रिंशांशे कामाकुला॥५॥
॥८॥ चंद्रार्कगुरुशनिराशिगे लग्ने चंद्रे वा त्रिंशांशफलं शार्दूलविक्रीडितेनाह॥ ॥स्वच्छंदेति॥॥

२२ स्त्री०

कर्कगे लग्ने चंद्रे वा तत्र कुजत्रिंशांशे स्वैरिणी १ शन्यंशे [illegible] धी २ गुर्वंशे गुणवती ३
बुधांशे शिल्पकर्मरता ४ शुक्रांशे कुलटा ५ । सिंहलग्ने चंद्रे वा कुजांशे पुरुषाकारा १ शा
चारेति पाठे कुचरिता वा चारो यस्याः शन्यंशे पांसुला २ गुर्वंशे राजपत्नी ३ बुधांशे पुरुषस्व
भावा ४ शुक्रांशे गुरुगामिनी ५ धनुर्मीनगे लग्ने चंद्रे वा कुजांशे बहुगुणवती १ शन्यंशे स्वल्प
कामा २ गुर्वंशे ऽत्यंतगुणवती ३ बुधांशे कर्माणि विज्ञानवती ४ शुक्रांशे ऽल्पधीः ५ । मकर
कुंभगे लग्ने चंद्रे वा कुजांशे दासी १ शन्यंशे ऽधमसंगरता २ गुर्वंशे साध्वी ३ बुधांशे दुष्टा ४
शुक्रांशे ज्ञाला वंध्या ५ भवति । एवं स्वांशे फलं ज्ञेयं ॥५॥ तदेवानुष्टुभाह ॥ ॥त्रिंशांशेति। इदं
सर्वोक्तं फलं चंद्रलग्नाश्रिते त्रिंशांशे बोध्यं। भिन्नफलयोश्चंद्रलग्नयोर्यो बलीन स्फलं ज्ञेयं।
यो बलहीनस्तत्फलेन स्यात्॥६॥ ॥स्त्रीणां स्त्रीभिर्मैथुनकारक योगद्वयं प्रहर्षिण्याह। द्यु
क्रास्त्राइति॥ शुक्रार्कीवन्योन्यं परस्परं तौ यद्यन्योन्यनवांशगतौ तदेको योगः॥ द्वितीयस्तु
लाभ्य तमे लग्ने कुंभनवांशस्तदा द्वितीयः॥ आसमन्योगद्वये नारी जघन्यात बद्धनमनिपति ॥ दृष्टि॥
गया ऽन्यनार्या मैथुनं कारयति ७ ॥ अस्तमये पतिरिति यदुक्तं तच्छार्दूलेनाह ॥ ॥शून्य
इति॥ लग्नाच्चंद्राद्वा सप्तमः शून्यः स्याद्दृष्टो बलहीनो ग्रहवर्जितश्च तदा तत्कुत्सितः

स्यात्॥१॥ लग्नेंदोः सप्तमे राशिर्बुधयुतेन क्लीबपतिः॥२॥ तयोः सप्तमे चरे प्रवासी॥ अथ हि
रेग्रहे स्थिरे एव। द्विस्वभावे कदाचित्प्रवासी कदाचिद्गृहे स्थिरः ३ तयोः सप्तमे रवौ पति
त्यक्ता स्यात्॥४॥ तत्सप्तमे कुजे अक्षतयोनिर्बाला ५ शनौ वृद्धो मूढश्च तत्सप्तमे केऽभावे बिवाहेन
प्राप्नोतीत्यर्थः॥६॥ ता आग्नेयैरिति॥ एकैकस्मिन्सप्तमे फलमुक्तं॥ आग्नेयैः क्रूरैर्बहुभिः
सप्तमे विधवैव। क्रूरसौम्ये सप्तमे द्विःसंस्कृता २ निर्बले सौम्यदृष्टे च क्रूरे सप्तमे नष्टप
तिका ३ यत्र तत्र स्थौ कुजशुक्रौ परस्परनवांशगौ तदा परपुरुषगामिनी॥४ चंद्रयुतौ कुजशुक्रौ
सप्तमौ तदा पत्याज्ञया व्यभिचारिणी॥५॥२॥ योगत्रयं शालिन्याह॥ मौरेति। मकरकुंभमेष
वृश्चिकास्तमे लग्ने चंद्रे शुक्रयुक्ते क्रूरदृष्टे च जननपरिता व्यभिचारिणी॥१॥ सप्तमे कुज
नवांशे शनिदृष्टे च रोगार्त्ता॥२॥ ध्रुवं सप्तमस्तमये तदाह॥ चाविति॥ सप्तमे सौम्यन
वांशे शोभनचरणा पतिप्रिया च॥३॥१७॥ गुणान्सप्तमे राशिनिर्दिशति लग्नात्स्यामाह॥ ॥
वृद्धइति। मकरकुंभास्तमे तन्नवांशे वा सप्तमगे वृद्धो मूर्खश्च पतिर्भवति१ मेषवृश्चिकास्त
मे तन्नवांशे वा सप्तमे वा नारीप्रियः क्रोधी च २ वृषतुलास्तमे तन्नवांशे गे वा
सप्तमे पतिः सुंदरो जनप्रियश्च॥३॥ मिथुनकन्यास्तमे तन्नवांशे वा सप्तमे पंडितः सत्सद्दृष्टि
श्च पतिः॥४॥ मदनेति॥ कर्के तन्नवांशे वा सप्तमे कामी कोमलचित्तश्च पतिः॥५॥ धनुर्मीनास्तमे

२२ स्त्री॰

तत्रवांद्रोवाम्सप्तमेगुणी अदिनम्भयतिः ॥६॥ सिंहे तत्रवांद्रोवासप्तमे कोमलतरोबहुव्यापारकर्त्री
चपतिः ॥७॥ एवंसप्तमराशेरंशस्यचफलमुक्तं।यदाराशिरन्योंशश्चान्यस्तदातयोर्बलवत्त्वःफ
लंवाच्यं॥१२॥ योगविशेषान्चमंतितिलकास्यामाह॥ ईर्ष्येति॥ लग्नेचंद्रेशुक्रयुतेमत्सरिणी।
सुखाभक्ताच। चंद्रबुधयुतेकलासुकुशलासुखवतीगुणवतीच। शुक्रबुधयुतेदर्शनीयासक
लकलावतीच॥ ३ बुधगुरुशुक्रयुतेलग्नेनेकधनाबहुसुखावहुगुणाच ॥१३॥ सप्त
मरणंनिधनेइतियदुक्तंतदाह॥ ॥ क्रूरेति॥ अष्टमेक्रूरेविधवा॥ केंद्रेसाह॥निधनेति॥ अष्ट
माधीशोयस्मिन्नवपसिस्थितः एकंवनविंशतितिरित्यादिनाग्रहेणवंधिवयउक्तंतनुल्ये
वयसिविधवास्यात्॥ केचिद्वयःशब्देनदशांवदंति॥ अष्टमेग्रहदशायांविनाशोन्नरकल्पि
तार्थः। अष्टमेषक्रूरेपिधनगेसौम्येनार्थवादोम्रियते॥ किंच॥ कन्यावृश्चिकवृषसिंह
गेचंद्रेस्तोकसुता॥१४॥ योगद्वयंशार्दूलेनाह॥ शौरइति॥ शनावतिवलिनिचंद्रशुक्रबु
धेष्वबलिषुरविकुजगुरुषुबलवत्सुविषमराशौलग्नेजातापुरुषवत्प्रगल्भा॥ गुरुकुज
शुक्रबुधेषुबलिषुसमराशौलग्नेकीर्तिमतीशास्त्रज्ञामोक्षपरायणाच॥१५॥ प्रवृज्यां ॥७०॥
सप्तर्षिरपाह॥ पापइति॥ सप्तमगृहफलंयदुक्तंतद्विशायनवमेग्रहेसतिनवमलग्नेसौम्य
वोक्तांप्रवृज्यामाप्नोति॥ अत्राध्यायोगात्कारस्तेविवाहकलेकन्यामार्गणकालेवावदा

२२ स्त्री॰

नकालेप्रश्नकालेचवर्त्तमानउक्तफलअपदास्तु॥ ॥ इतिमहीधरकृते जातकवि
वरणेस्त्रीजातकाध्यायोद्वाविंशः॥२२॥ ॥ अथनिर्याणाध्यायः॥ तत्राष्टमेस्थग्रहे
नऊर्ध्ववामतिप्रकारंशार्दूलेनाह॥ मृत्युरिति॥ यस्याष्टमंग्रहेणेक्षितंलग्नपस्तुःपरपाति
तस्यधातुःपित्तादिसत्कोपान्मृतिः॥ यथारविकुजयोःपित्तेगुरौकफःशनेर्वातः शु
क्रेंदोवातिकफौ। बुधस्यत्रयइति॥ वदंतदिति। तेनाष्टमेनसंयुक्तं यस्मात्गत्रयंराशिर्
गंतत्क्षेमृतिः। अयमर्थः। अष्टमोराशिःकालांगेयत्रास्थितदंगेप्रोक्तदोषकोपान्मृति
रिति। नद्वोवलिनोयद्यमंपश्यतितदातत्तद्धातुकोपान्मृतिःअग्नीति॥ रवावष्टमे
ऽग्निनामृतिः॥ २ चंद्रेजलेन ३ कुजेशस्त्रेण ४ बुधेज्वरेण ५ गुरुवज्ञातरोगेण ६ शुक्रेक्षु
पा। ७ शनौतृधया ८ एतेष्वबलिष्टकोमृत्युःस्वकर्मणि॥ बलहीनेष्वप्युमेन॥ मध्येपृपि
ष्याकर्मणि। मरणप्रदेशमाह॥ निधनइति॥ अष्टमेचरराशौप्रदेशेमृतिःस्वदेशेतुस्थिर
राशौ। द्विस्वभावेपथिमृतिः॥१॥ अन्यान्मृतियोगान्शार्दूलैश्चतुर्भिराह॥ शैलाग्रेति॥
सूर्यारवोदशमेकुजेचतुर्थेगिरिघातान्मृतिः॥१॥ चतुर्थेशनौसप्तमेचंद्रेदशमेकुजेकूपेम
तिः॥२॥ चंद्रार्कौक्रिरैदिनौयदिकन्याराशिगतौतदास्वजनान्मृतिः॥३॥ द्विस्वभावेलग्न
गतेयदिचंद्राकौतिदाजलेमृतिः॥४॥ मंदेकर्कटगेजलोदरकृतान्मृति

ॐ इं मड़ा ज्ञाख्यं॥

ति। कर्कगे ज्ञा नौ चंद्रे मकरगे जलोदरव्याधिना मृतिः ५ मेषवृश्चिकान्यतमगे चंद्रे पाप
२३ नि द्वयमध्यगे मतिशस्त्रेणाग्निना वा मृतिः ६ कन्यागते चंद्रे पापद्वयमध्यगे रुधिरक्षो
यो भात्‌ शोषाद्वा मृतिः ७ मकरकुंभगे चंद्रे पापद्वयमगे रज्वाग्निनापतनेन वा मृतिः ८
३॥ बुधादिति॥ मीन्याद्दृष्टौ क्रूरौ यदि पंचमनवमौ तदा बंधनेन मृतिः। ९। अष्टमे दृ
क्काले पाशसर्पनिगडद्युते बंधनेनैव मृतिः॥ कर्कद्वितीयो सौ वृश्चिकाध द्वितीयो एते
सर्पादृक्काणाः पाशाख्यु॥ मकरा द्यमी नांत्यौ निगडदृक्काणौ॥ १०। मीने लग्नगते अष्टमे कु
न्यास्थे चंद्रे [illegible] युते शुक्रे मेषगे रवौ लग्नगते स्वगृहे स्त्री निमित्ता मृतिः॥ ११। स्वा
ति॥ कुजे सूर्ये वा चतुर्थे शनौ दशमे शूलारोपितस्य मृतिः १२ रविकुजशनिक्षीण
चंद्रेषु यथासंख्यं पंचमनवमलग्नगेषु शूलादेव मृतिः॥ १२। चतुर्थे क्षीणचंद्रे दृष्टे
कुजे दशमे च काराद्वशलादेव मृतिः। १३। अस्मिन्नेव योगे रवौ चतुर्थे दशमे कुजे शनि
दृष्टे काष्ठेन मृतिः॥ १४। अस्यान्मृतियोगानुवर्तनात् स्यात् स्मात्॥ रंध्रोति॥ क्षीणे दौ दृष्ट ॥७१॥
मः कुजो दशमः शनिर्लग्नगः रविश्चतुर्थस्तदा यदि प्रदृश्शाम्मृतिः। १५। क्षीणे दुर्द
शमः कुजो नवमः शनिर्लग्ने रविः पंचमस्तदा धूमाकुलतया वह्निना वा बंधनेन

वा शरीरस्य निकृंतनेमुष्टिखड्गादिप्रहारस्तेन वा मृतिः॥ १६। वं धीति॥ कुजश्चतुर्थः र
विः सप्तमः शनिर्दशमस्तदा खड्गादिना वह्निना नृपक्रोधेन वा मृतिः। १७। शनिर्द्वितीयः चंद्र
श्चतुर्थः कुजो दशमस्तदा व्रणोत्पन्नैः कृमिभिर्मृतिः॥ १८। अस्यायोगादृशार्द्दू लेनाह॥ ॥
स्थे रव इति। रविर्दशमः कुजश्चतुर्थस्तदा रथाश्वादेवाहनात्पतनेन मृतिः। १९ कुजः सप्त
मः क्षीणचंद्र कैवानयोर्लग्ने तदा तैलादियंत्रपीडया मृतिः॥ २०। अ तुलायां कुजः मेषे शनिः
मकरकुंभान्यतमे चंद्रस्तदा विष्टाम ध्ये मृतिः॥ २१। क्षीणेंदुर्दशमः सूर्यः सप्तमः कुजश्चतु
र्थः वायद्दशा दृत्न दापि विष्ठायां मृतिः॥ २२॥ ८। योगांतरे वैतालीयेनाह॥ बीयन्विते ति
तत्र तत्रास्थितश्चंद्रो बलवता कुजेन दृष्टः शनिरष्टमः तदा गुह्योत्पन्नरोगोग्निना
गं दशादिस्तत्पीडया कृमिपतनेन शस्त्रकर्मणा वाग्निदाहेन वा मृतिर्भवति। २३। ८
योगांतरे वसंततिलकेनाह॥ ॥अस्तइति॥ रविकुजौ सप्तमौ शनिरष्टमः क्षीणेंदुश्चतुर्थः
तदा पाद्दौ चलाम्मृतिः। २४। ८ अग्निसंस्काराभाव इत्यर्थः॥ लग्नेऽर्कः कुजः पंचमः शौनिर
ष्टमः चंद्रो नवमः। तदा पर्वताग्रात्पतनेन वज्रपातेन भित्तिपातेन वा मृतिः। २५॥ १०॥ ॥ ८
यस्योक्तयोगानामभावः न चाष्टमं केनचिद्युतं दृष्टं वा तन्मृतिं वैतालीयेनाह॥ ॥

[illegible]

द्वाविंशा इति॥ लग्नद्रेष्काणात् द्वाविंशो द्रेष्काणो मृतिहेतुर्बुधैरुक्तः। तदेवाह॥ तस्येति तस्य द्वाविंशद्रेष्काणस्य स्वामी यद्रूपोऽष्टमो धाशो वा स्वगुणैरग्नं द्यायुधेत्यादिनो क्तैर्मृतिं ददाति॥ अयमर्थः। द्वाविंशो द्रेष्काणोऽष्टमराशौ भवति॥ तत्रायं नियमः॥ यदि लग्नस्यादि द्रेष्काणस्तदा अष्टमस्य ~~द्रेष्का~~ भवनस्यापि प्रथमः॥ लग्नस्य द्विती येऽष्टमे वापि स्यापि यदि वा लग्नस्य तृतीये द्रेष्काणेऽष्टमस्यापि तृतीयः॥ सर्वदा शीला भियमेव व्यवस्था॥ तेन यस्योक्तयोगानाम भावोऽष्टमे च यद्रूयोगदर्शनात् वस्त दा द्वाविंशद्रेष्काणेशात्पापाष्टमेशयोर्यो बली तदुक्तदोषैः ~~मृत्ये~~ मृतिरिति॥ ७५॥ मृतिर्मृ मिश्रानं वच्यंत तिलके नाह॥ होरेति॥ लग्नस्य योनवांशस्तदीश नयुक्तो यो राशि लग्ननवांशेशाश्रितस्तत्तुल्य मृत्यौ मृतिर्वाच्या॥ तद्यथा॥ लग्ननवांशाधिपे यदि मि थुनस्थे यरेमृतिः॥ कर्कक न्यामकरमीनाख्यतमस्थेऽन्यूपे। सिंहस्थे अरण्ये तुला स्थे अहृन्मृत्यौ ~~मिति~~॥ न केवलं नवांशाधिपाश्रितराशिवशेन मृत्यौर्वाच्या। किंतु ॥७२॥ योगेहलादिभिरिष्येतत्क व्यं। अयमर्थः। लग्ननवांशाधिपो यस्य राशौ स्थितस्तात्र यो दृश्य ग्रहस्य योगो दर्शनं वा तदा ग्रहस्य मृतिर्वा शिखि विहारेत्यादिनोक्ता वा

॥

च्या॥ बहूनां योगे दर्शने बलिनोऽन्य वच्छि॥ मोहइति॥ लग्नस्योदितोऽनुदितान वांशास्ते षां संपीडितानं यावत्कालस्तावत्कालं मृतिमयमोहो ज्ञानानां बाध्यः। लग्ने स्वपति दृष्टे स एव कालो द्विगुणो मोहे वाच्यः। शुभग्रहदृष्टे लग्नेऽयं कालस्त्रिगुणो वाच्यः॥ एवं स्वामिना शु भग्रहेण दृष्टे लग्नेऽयं कालः षड्गुणो मोहे वाच्यः॥ ७२॥ मृतस्य शरीरपरिणाममाहियाह॥ दहनेति॥ अष्टमभवनगते दहनजलविमिश्रद्रेष्काणैः शवस्य क्रमात्तन्मस्मसंक्लेदशो षाः परिणामाः स्युः॥ अयमर्थः॥ लग्नद्रेष्काणात् द्वाविंशो द्रेष्काणो यदि दहनद्रेष्काणस्तदा पापदृष्टाणस्तदा मृतदेहोऽग्निना दह्यते। भस्मरूपपरिणामः। अष्टमद्रेष्काणो यदि ज लद्रेष्काणः सौम्यग्रहद्रेष्काणस्तदा संक्लेदः। मृतदेहो जले क्षिप्यते॥ यदि मिश्रद्रेष्काणस्त दा शोषः। न दह्यते नापि जले क्षिप्यते॥ एवमेवं शुष्यति॥ सौम्यदृष्टाः पापयुक्तो मिश्रः॥ पाप दृष्टाणो वा सौम्ययुक्तो मिश्र इति। व्यालेति॥ अष्टमस्थे व्यालवर्गेः सर्पदृष्टाणो दिउं तः॥ विष्टाणवांतः परिणामो यस्य शवः सम्न्तः श्वशृगालादिभिर्भक्षितइत्यर्थः॥ कं कांथ्यःक्षिती यो हा श्विकाद्यः। द्वितीयो भौनौ स्य स्य व्यालद्रेष्काणः॥ तदुक्तं॥ पाशी ग्रहकवपरगोकीटस्यमी नपश्चिमो भागः॥ निधनस्य द्रेष्काणस्य च मृतस्य मांसानि जुजंतवाय भग्नाः॥ आणि नपश्चिमो भागः। निधनयस्य द्रेष्काणस्य च मृतस्य मांसानि शुनाते वायमश्राः। आणि

।तिनरोऽन्नमात्रे। नि। श्रितं प्रवदेत्॥ एवं सौम्यदृक्काणे जलमध्ये छिप्यते नरो ऽग्निमति
२३ ३॥ सौम्यदृक्काणः पापैः पापदृक्काणोपि सौम्यैर्युक्तः। यस्याष्टमभवनगतः सौम्यं प्रा
प्तो। निमरणं तं कृतिः॥ एवं शवकस्य परिणामो यथोक्तो विचिंत्यम्॥ गत्यनूका दिष्ट
निर्या॰ श्रु। वीक्षितं कृतं येन द्रेक्काणमिदमेव॥ तस्माच्चिवार्थं॥ मृतिका गतिर्भविष्यतीति गतिः
कस्मात् लोकादयमागत इत्यनूकमतीतजन्म आदिशाक्षाच्चात्र कीदृगासीदित्याह॥ ॥तत्रा
नूकज्ञानं मालिन्याह॥ गुरुरुडुपतिशुक्रौ सूर्येति॥ गुवदियो विबुधादिलोकगानूजनावू
अनूके प्राग्जन्मनि कुर्युः। किंतु तांस्तु वदियः दिनकरेति रावि चंद्रयोर्यो वीर्यवानद्बली
तेनाश्रितो यस्मिन्नंशो द्रेक्काणस्तस्य नाथः स्वामिनः मंतव्य इत्यर्थः॥ अयमर्थः। सूर्ये द्वामध्या
द्बलिनाश्रितद्रेक्काणेशो गुरो देवलोकादागत इति वाच्यो। चंद्रशुक्रयोरन्यतमे द्रेक्काणे
शोपि पितृलोकादागतः। रविकुजयोरन्यतमे द्रेक्काणेशो तिर्यग्लोकादागतः। शनिबुधयोरन्यतमे
द्रेक्काणेशो नरकादागत इति॥ तत्रापिश्रेष्ठसमध्यहीनत्वज्ञानमाह॥ प्रवरेति॥ तुंगस्थ इत्याद्
उच्चस्थानचलनाक्रमेण प्रवरसमनिकृष्टानुत्तममध्यमहीनान् त्र्यस्राः। एवं कर्तुः कुर्युः॥ ॥७३॥
अयमर्थः। यस्य यद्द्रेस्य लोकादागतः सचेदुच्चस्थस्तदा तत्र लोके प्रधान आसीत्। उच्चमुसाशि
श्रुतो नीचमपा इ स्थस्तदा योऽमध्य आसीत्॥ लोके योग्य हेय यदि नीचस्थस्तदा तत्र लोकेऽध

म आसीदिह ज्ञेयं॥ ॥मृतिगतिं मालिन्याह॥ गातिरापीति॥ रिपुरंध्रत्रिकोणाय॥ षष्ठाष्टम
द्रेक्काणे योगतिर्गतिप्रदः। एवं श्लोकोक्तं गतिं ददातीत्यर्थः॥ अयमर्थः॥ यस्य जन्मलग्ना
त्षष्ठाष्टमयष्ठमानि भान्यानि तस्य तत्कालेऽयष्टे योऽद्रेक्काणेयथाष्टमे द्रेक्काणः न
थीय विधिपतीत यो यो बलवान् तस्य लोकाय एवं ज्ञेयः। अवान्तस्य गति ग्रितितेनमृ
तेन तत्र गंतव्यमित्यर्थः॥ अस्त्येवाशङ्कस्यार्थः॥ यत्सम स्थ प्रकारात् षष्ठाष्टमगम्भ
यहो निजगतिप्रदो भवति यदि षष्ठाष्टमयस्तमानां मध्ये द्वेत्रितावायग्रहाणा
तथैव स्मिन्नपि ग्याद योग्यस्तदा तेषां यो बली तद्ग्लोके मृतिगतिर्वाच्या॥ तदुक्तं॥
गुरपितृतीर्यग्नरकान् गुरु रिंदुसितावसृग्यवाइयमौ॥ रिपुरंध्रत्रिंशकपान्नयं
ति चास्तारि निधनस्थाद्रति॥ मोक्षगतिमाह॥ गुरुरिति॥ कर्कस्थो गुरुः षष्टः केंद्रगो
ष्टमो वा लदेकयोगः॥ मीनेलग्नगते शुभग्रह नवांशे गो गुरुः अन्ये बलहीनास्तदा द्वि
तीयो योगः॥ एतद्योगद्वये जातस्य मोक्षगतिः॥ अस्ययोगो मृतिकालेपि वर्तमानो
मोक्षदो॥ तदुक्तं॥ षष्ठाष्टमकंटकोगो गुरुरुच्चे वा ऽवसाने लग्ने वा॥ शेषैरबलैर्जन्मि
निमरणे वा मोक्षगतिमाकुरिति॥ ॥इति महीधरकृते जातकविवरणे निर्याणाध्या

उत्रि यं।

यत्त्रयो विंशः॥२३॥ ॥ अथ नष्टजातकाध्यायः॥ ॥ तत्र प्रसूतिकालमिश्रवृत्त्यया
ह॥ ॥७॥ ॥ आधानेति॥ यस्याधानकालो ज्ञायते तस्याधानकालादेव जन्मोक्तं॥
तत्कालमिंदुसहितो इत्यादिना जन्मकालोपि व्याख्यात एव॥ आधानजन्मकालयोरज्ञा
ने पृष्टुः प्रश्नलग्नात् कल्पयेत्॥ प्रष्टालग्नं यहोरास्य स्पष्टानुक्त्वा वक्ष्यमाणविधिना
स्पष्टीकृत्य मित्यर्थः॥ तत्रानयनमाह॥ पूर्वेति॥ प्रष्टालग्नस्य पूर्वापराद्धयोः सूर्यो नर
दाक्षिणायनयो र्जन्म वदेत्॥ अयमर्थः॥ लग्ना होरायां मकरादिराशिषट्कगते उदगयने ज
न्म वाच्यं॥ लग्न द्वितीयहोरायां कर्कषट्कगते दक्षिणायने वा ज्ञातिः॥१॥ वय श्चतुर्थं च पुनर्जा
त्यादु॥ लग्नेति॥ लग्नत्रिकोणेषु प्रश्नलग्नपंचमनवमेषु त्रिभागोलग्नद्रेष्काणे गुरुं
कल्पयेत्॥ अयमर्थः॥ प्रश्नलग्नस्य प्रथमद्रेष्काणोदये यदा वा लग्नराशिं तत्रस्थे गुरौ
जन्म वाच्यं॥ लग्ने द्वितीयद्रेष्काणोदये लग्नात्पंचमराशिस्थे गुरौ जन्म वाच्यं॥ लग्ने
तृतीये द्रेष्काणोदये लग्नान्नवमराशिगे गुरौ जन्मेति॥ यद्यप्यत्र सामान्येन गुर्वस्था ॥७७॥
नष्टजा नमुक्तं॥ तथापि द्वादशांशक्रमेण प्रतिराशि गुरोः संचारणीयः॥ यथा प्रश्नलग्न
स्य प्रथमद्वादशांशोदये लग्नराशि गुरौ जातः॥ द्वितीयद्वादशांशोदये द्वितीयस्थे गुरौ

जातः॥ एवं तृतीयादिद्वादशांशोदये तृतीयादिगुरुरूह्यः॥ कि कल्प्येति॥ एवं गुरौ रवस्था
नं ज्ञात्वा तस्य वयोनुमानाद् वर्षाणि कल्प्य वदेत्॥ अयमर्थः॥ तस्याकृतिभेदे स्य वयोनुमा
नेकार्यः॥ तत्र द्वादशवर्षे गुरोः राशिचक्रभ्रमणं भवति॥ तत्र पुरुषलक्षणलोकेन दशाद्
शाविभागेन द्वादशवार्षिकी दशांशेषु परिकल्प्य तत्र तेंग अस्य शरीरज्ञानं॥ तथो
क्तं पुरुषलक्षणे॥ पादौ सगुल्फौ प्रथमे प्रदिष्टे जंघे द्वितीयं तु सजानुचक्रे॥ मेढ्रोरुमु
ष्कं च ततस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः॥१॥ उदरं कथयंति पंचमं हृदयं षष्ठमथ
स्तनान्वितं॥ अथ सप्तमेंस जत्रुणीकथयंत्यष्टमभोष्ठकंधरे॥२॥ नवमं नयने च स
भ्रुणी सललाटं दशमं शिरस्तथा॥ अशुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभन
मिति॥३॥ एवं विंशत्यधिके वर्षशतेऽतीते वर्षज्ञानोपायो नास्ति॥ एवं वर्षे ज्ञाते ऋतुज्ञा
नमाह॥ ग्रीष्मेति॥ दृष्टालग्ने गते द्रेष्काणो वा ग्रीष्मो ज्ञेयः शेषैश्चैव शशिस्तरेष्काणा
गैर्वा लग्नगैः कथिता ऋतवः स्वभुक्त्या इत्यर्थः॥ उक्तं च॥ द्रेष्काणेः शशिरादयः शुक्र चक्र
ग्वादि स्युत्यस्तु वा इति॥ तद्यथा॥ लग्नगे शनौ लग्ने द्रेष्काणे वा शशिरः॥ एवं शुक्रे वसंतः॥
कुजे ग्रीष्मः॥ चंद्रे वर्षा॥ बुधे शरत्॥ गुरौ हेमंत इति॥ बहु लग्ने बलिन ऋतुः॥॥॥॥॥

८४

न॰ टी॰

सग्नेग्रहात्वावेदेक्ष॰ रोवाऋतुः। अन्येतु॥ अयस्मिन्नयने॰ यस्मिं ऋतौ रविचार
वशेन ऋतुर्ज्ञेयः। अयमर्थः। सर्वापराईभवनस्य विंशाऋतुबुदग्दक्षिणगे प्रसूतिमित्यु
क्तं॥ तत्रोत्तरायणे ज्ञाते यदा ग्रहोक्त ऋतुर्न संभवति। तदार्कचारवशेन ऋतुर्वाच्यः। म
कराद्गिर रवौ शिशिरादिर्वाच्य इत्यर्थः॥ ३॥ अयन॰ विपर्यये ग्रहपरिवर्तनादृतुज्ञा
नं मासतिथिज्ञानं चेंद्रवज्जयाह॥ ॥ चंद्रेऽति॥ अयने विलोमे विपरीते प्रतिलग्नग
ग्रहवशादृतुज्ञाने यद्ययनं विपरीतं भवति तदा चंद्रबुधगुरवः शुक्रकुजशनिभिः परि
वर्त्याः। व्यत्ययेन स्थाप्याः। चंद्रः शुक्रेण। बुधः कुजेन। गुरुः शनिना। अयमर्थः। यद्यु
त्तरणे वसंतोऽज्ञातस्तदा वसंतो ज्ञेयः। एवं चंद्रः शुक्रेण परिवर्तितः। अथ दक्षिणायने वसं
तस्तदा वर्षाः ज्ञेयेति॥ शुक्रश्चंद्रेण परिवर्तितः। अथोत्तरायणे प्राप्ते तदा ग्रीष्मः। द
क्षिणायने ग्रीष्मे च शरदिबुधकुजावन्योन्यं परिवर्तितौ॥ उत्तरायणे हेमंते। शिशिरः दक्षि
णायने। शिशिरे च प्राप्ते हेमंत इति गुरुशनी परिवर्तिताविति। एवमृतौ ज्ञाते मासज्ञानमाह॥ ॥१५॥
द्रेक्काणेति॥ प्रश्नलग्नद्रेष्काणस्य पूर्वभागे सर्वज्ञातादृतोः पूर्वो मासः द्रेष्काणोत्तरार्द्धे तदु
स्थ॰ त्तो द्वितीयो मास इत्यर्थः॥ ॥ नेन मासज्ञानं॥ तिथिज्ञानमाह॥ अनुपातादिति॥ अनुपा
तात्त्रैराशिकात्तिथिः कल्प्यो लग्नस्य द्रेष्काणे ज्ञाते तानि द्रेष्काणः तेन च ऋतुज्ञानं तद्दे

लिप्तात्मा तत्रयं लेनमासज्ञाने॥ अत्रानुपातात्तिथिर्लिप्तादशैकेनेकेकाज्ञेयाः॥ एवाति॥ थि
रादित्यभागः॥ एवमर्कस्य राशयो भागाश्च ज्ञेयाः॥ मायाराशयोस्तिथयो भागाः ज्ञातवर्षे यथा
प्रदर्शितांशोऽर्कस्तस्तिथौ जन्मेति ज्ञेयं॥ ३॥ चांद्रमासेन तिथिमाह॥ ॥ अत्रापीति॥ अत्र ति
थिज्ञाने होराशास्त्रज्ञा मुनयोऽर्कभाग प्रमां तिथिं वदंति॥ प्रश्नकाले लग्नकालिकार्कराया
वंतोंऽशा भुक्तास्तावंतो भुक्ता प्रतिपदादयस्तिथयो भुक्ता वाच्याः। अत्र चंद्रमाने मकरराशौ ज्ञा
ते माघो माघो ज्ञेयः। एवमन्येष्वपि मासकल्पना॥ तदुक्तं। इष्टकाले यावतोंऽशाः स्फुटेन संयु
क्ताः राशेस्ताः तिथयः सुः शुक्लादावर्कमासस्येति॥ एवं दिनेज्ञाने रात्रिदिवाजन्मज्ञान
माह। रात्रीति॥ रात्रिसंज्ञा राशयः पूर्वमुक्ताः गोजाश्वीत्यादिना रात्रिदिनसंज्ञेषु लग्नेषु विप
रीतं ज्ञेयं जन्म॥ अयमर्थः। मेषवृषमिथुनकर्कधनुर्मकरान्यतमे प्रश्नलग्ने दिने जन्म॥ ॥
अन्येषु रात्राविति॥ एवं दिनरात्रिज्ञाने विलोममाह॥ ॥ भागैरिति॥ लग्नभागैः क्रमशः
परिपाठ्यावेलाकल्प्या जन्मसमयो ज्ञेयः॥ अयमर्थः। जन्मदिने रविज्ञाते तस्मादिनरात्रिप्र
मा तामानीय यदि दिवाजन्म तदा दिनप्रमाणेन रात्रिजन्मनि रात्रिप्रमाणेन तत्कालप्रश्नल
ग्नं तु कल्प्यता निसंगु एपतस्य स्वदेशराश्युदयमानेन भागमपहृत्य वा लब्धवेला तावति
काले दिनस्य रात्रेर्वा गते जन्म वाच्यं॥ ॥ मतांतरेण मासमाह॥ केचिदिति॥ के॰ केचिद्बंद्र

स्पष्टार्कांशं त्वं वांशान्त्सूर्यक्रान्त्यंशं मासं वदंति॥ अयमर्थः॥ जन्मकाले यस्मिन्नंशे चंद्रस्तम
२४ पि नवांशं न यथा कृत्वा यस्मिन्नवांशे नवमेंशे चंद्रस्तद्भुक्तेन तत्र मन्वेष्यं॥ तन्न तत्र मंबोधि
नक्ष० निष्प्रक्रान्त्यंशे सोमसितिजनवाच्यं॥ यथा कृत्तिकायुक्त कार्त्तिकी पौर्णमासी तया
युक्तः कार्त्तिकः एवं मार्गादौ॥ यस्य न तत्र स्पष्टक्रान्त्यंशे सोमासो नाम्नोत स्पष्टक्रान्तो क्तवि
धिना सूर्यक्रान्त्यंशे सोमासः कल्प्यः॥ तदुक्तं॥ नक्षत्रेणाग्रहोदयमस्तं वा यातियेन सुरमं
त्री॥ तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव॥ १॥ वर्षाणि कार्त्तिकादिन्याग्नेयाद्भद्वयानुयो
गीनि॥ क्रमशस्त्रिभं तु पंचममुपांत्यमंत्यं च यद्वर्षमिति॥ तत्र चंद्रे वृषनवांशे तन्नवांशे
सप्तके स्पार्वाञ्चिवतिलदा कार्त्तिको ज्ञेयः॥ वृषनवांशे तदंशा सप्तके ध्रुवे मिथुननवांशे तत
दंशाष्टक सप्तवर्त्तिदा मार्गशीर्षः॥ मिथुननवांशे तन्नवांशाष्टकोर्ध्वं कर्कनवांशे तदंशापंच
कावधि पौषः॥ कर्कनवांशे तन्नवांशपंचकोर्ध्वं सिंहनवांशे तन्नवांशचतुष्टयावधि माघः
॥ सिंहनवांशे तन्नवांशचतुष्कोर्ध्वं कन्यानवांशे तन्नवांशसप्तकावधि फाल्गुनः ॥७६॥
॥ कन्यानवांशे तन्नवांशसप्तकोर्ध्वं तुलानवांशे तन्नवांशाष्टकावधिश्चैत्रः॥ ७॥ तुलान
वांशे तन्नवांशाष्टकोर्ध्वं वृश्चिकनवांशे तन्नवांशपंचकावधिर्वैशाखः॥ ८॥ वृश्चिकनवां
शे तन्नवांशपंचकोर्ध्वं धनुर्नवांशे तन्नवांशचतुष्टयावधिर्ज्येष्ठः॥ ९॥ धनुर्नवांशे तन्नवां

शाचतुष्टयोर्ध्वं मकरनवांशे तन्नवांशत्रयावधिरेव त्वाषाढः॥ १०॥ मकरनवांशे तन्नवांशत्रयोर्ध्वं
कुंभनवांशे तन्नवांशद्वयावधिः श्रावणः॥ ११॥ कुंभनवांशे तदंशाद्वयोर्ध्वं मीननवांशे तन्नवां
शापंचकावधिर्भाद्रपदः॥ मीननवांशे तन्नवांशपंचकोर्ध्वं मेषनवांशे तन्नवांशाष्टकावधि
रेवाश्विनः॥ १२॥ अथ मेषनवांशे तदंशाष्टकादूर्ध्वं कार्त्तिक इति॥ यस्मान्नक्षत्रोक्तविधिना कृत्ति
कादि द्विशः कार्त्तिकः॥ १॥ मृगार्द्रे मार्गः॥ २॥ पुनर्वसुपुष्यौ पौषः॥ ३॥ आश्लेषामघे माघः॥ ४॥ पूर्वादित्रयं
फाल्गुनः॥ त्रिभं पंचममित्युक्तेः॥ ५॥ चित्रास्वाती चैत्रः॥ ६॥ विशाखानुराधे वैशाखः॥ ७॥ ज्येष्ठामूले
ज्येष्ठः॥ ८॥ पूर्वोत्तराषाढे त्वाषाढः॥ ९॥ श्रवणधनिष्ठे श्रावणः॥ १०॥ शततारादित्रयं भाद्रपदः
॥ ११॥ रेवत्यादित्रयमाश्विनः॥ १२॥ उपांत्यमंत्यं चेत्युक्तेः॥ शुक्लांत्ययग्रहणेन तद्ज्ञापयति॥ यत्कृष्ण
प्रतिपदादियोगेन नक्षत्रेणायुक्तस्तु उपलक्षितो मासो वाच्यः॥ यथा शुक्लप्रतिपदंते कृत्तिकारो
हिणीपत्यंतमेन युक्ते कार्त्तिको मासः॥ एवमन्येपि पूर्वोक्तविधिना मासा ज्ञेयाः॥ मासस्तु कृष्ण
प्रतिपदादिरेव व्याख्यातः तदुक्तं॥ यश्शशी यस्मिन्मासे शीतांशुः जन्मकालेन वांशके स्थितः स्याद्राशिपः सूर्य
यस्मिन्नुद्भवति चंद्रमा॥ जन्ममासः स निर्दिष्टः पुरुषस्तु दृष्टतः॥ कृष्णपक्षे तिथौ मासो
विज्ञेयः॥ ग्रहविपाकस्थितेतिमासे ज्ञाते शास्त्रज्ञानेमास॥ लग्नेति॥ जन्मलग्नस्पष्टस्य नवमपंच
मयोर्मध्ये उत्तमेनोत्कृष्टेन बलेन युक्तं राशिरुच्यते॥ लग्नत्रिकोणयोर्बलीतरा राशिमें

२४ चंद्रेजन्मवाच्यमित्यर्थः। तदुक्तं॥ होरादिवीर्याधिकलग्नभाजि स्थाने त्रिकोणे शशिनोऽवधार्य
मिति॥ पद्यांतरमाह॥ अंगेति॥ अंगं स्पृष्ट्वा रादित्रिं वा राशिरीड्यः। अयमर्थः॥ कालांगानीत्या
नष्ट दिना कालनरउक्तः॥ तेन प्रष्टा प्रश्नकाले शिर आदि यदंगं स्पृशति तदंग संबंधी चंद्रराशि
रीड्य इति॥ आदिपदात् शिरोक्रमत्वां मांद्रनिश्चयलोग्रह्यते॥५॥ प्रकारांतरेण राशिज्ञानं जन्म
माह॥ यावदिति॥ इष्टकाललग्नाद्रवियावद्दूरः यावति राशौ स्थितः तावति थे राशौ चंद्रो ज्ञेयः॥
एवं चंद्रात् जन्मराशिं वदेत्॥ मीनेति॥ मीनप्रश्नलग्ने मीनयुगे मीनराशिरेव ज्ञेयो न हर्षोक्तः
एवमन्यक्षाराशौ प्राह्येविद्यो मा मा ह॥ नष्टेति॥ नष्टे एणदृग् रणेमाकारेण कृतेन शब्देन चिं
त्यराशिर्विचार्यः। अयमर्थः॥ यद्राशेः यैव धिक्स्पर्शव्ये तद्धर्षविधियो नरो दृश्यते आनीयते वा त
दाकारो वा दृश्यते तत्र आलिंगे राशौ वा प्ररूपते तद्राशिगे चंद्रे जातो ज्ञेयः॥ यथा मार्जारादि दर्शने
सिंहः। मार्गादौ वृष इत्यादि॥६॥ एवं जन्मराशिज्ञाने लग्नमाह॥ होरेति॥ प्रश्नलग्ने यो नवांशस्त
त्तुल्यं लग्नं वाच्यं॥ प्रश्नलग्ननवांशराशिरेव लग्नमित्यर्थः॥ पद्यांतरमाह॥ लग्नात्प्रश्नलग्ना
त्तु दृक्काणाद्वा यावत्तिथसंख्ये के दूरे दृक्काणे रविः स्थितः तस्मात्तावति तत्संख्ये ॥७७॥
नि राशौ इष्ट प्रश्नतो जन्मलग्नं वदेत् इति शास्त्रे वदति॥ न मया कल्पितमुच्यते इत्यर्थः॥ दृक्काण
गणनयाद्वादशांशाधिके द्वादशांशोगं कृत्वा शेषसंख्यया लग्नं वाच्यं॥ तदुक्तं॥ प्रश्नलग्ननवां

शास्पयोराशिः प्रोक्त्याहमं॥ तस्मिन्नु लग्नगते राशौ वक्तव्यं जन्म इष्टतः॥ यावत्संख्ये गतो
लग्नात्दूरेः काले दिनकृन्नतः॥ तावत्संख्ये कृते राशौ इष्टुर्जन्म विनिर्दिशेत्॥ इति॥७॥ प्र
कारांतरेण लग्नानयनमिश्रवत्प्रयाह॥ जन्मेति॥ ॥ लग्नगते ग्रहे बहूनां लग्नगत्वे ब
लवति॥ लग्नगत्वाभावे अर्द्धं बलग्रहे छायांगुलप्रैर्मितिद्वादशाहृतशेषं जन्मलग्नं वदे
त्॥ अयमर्थः॥ इष्टकाललग्नगते ग्रहे तात्कालिकस्य स्पष्टस्य कला लिप्ता पिंडं कृत्वा ततः समभू
मौ द्वादशांगुलशंकुं संस्थाप्य तस्य छाया यावत्यंगुलानि तैर्लिप्ता पिंडं संगुण्य द्वादशभागे
र्जितेत्॥ यावानेकोऽवशिष्ट स्तत्संख्यं मेषादि लग्नं ज्ञेयं॥ जन्मनीति॥ प्रकारांतरमाह॥ आ
सीनेति॥ आसीनस्सुप्तोत्थितस्थितो चतुर्णां इष्टकानां क्रमात्प्रश्ने यात्सुरवाद्यो दयगं जन्मल
ग्नं प्रदिष्टं॥ अयमर्थः॥ उपविष्टे प्रष्टे तु प्रश्नलग्नात् सप्तमं जन्मलग्नं ज्ञेयं शयने प्रष्ट तिष्ठ
प्रश्नलग्नाच्चतुर्थं जन्मलग्नं ज्ञेयं उत्थिते व्रजति इष्ट तिष्ठ प्रश्नलग्नाद्दशमं जन्मलग्नं॥ तिष्ठति
इष्टके सति प्रश्नलग्नमेव जन्मलग्नमिति॥ उक्तं च॥ उन्निष्टतो विलग्नात् सुप्तः सुप्तस्य बंधुल
ग्नाच्च उपविष्टस्यास्तमये व्रजतो मेषूरणस्थादिति॥ ८॥ प्रकारांतरेण मर्वेन इष्ट जातकं शा
र्दूलविक्रीडितेनाह॥ गोसिंहाविति॥ गोसिंहादयः प्रश्नलग्नगताः लिप्तापिंडीकृताः सं
तः क्रमात् दशादिभिरंकैः संवर्ग्याः गुणनीयाः शेषाः अनुक्तास्वसंख्यागुणनीयाः॥ अयमर्थः
वृषसिंहौ प्रश्नलग्नगतौ स्पष्टौ लिप्तापिंडीकृतौ दशभिर्गुणयेत्॥ मिथुनवृश्चिकौ विंशत्या अष्ट

२४ नि॰ २॥ मेषतुले यहान्नि॰ ३ कन्यामकरौ पंच नि॰ ४ कर्कचतुर्नि॰ ५ धनुर्वृश्चिक[illegible] ६ कुंभमेकादशान्नि॰ ७
मीने द्वादशान्नि॰ ॥ ८॥ एवं राशीनां विधिनियतः उक्तः॥ ग्रहगुणैर्लग्नैस्त्वहर्गणा ग्रहगुणान्नाचक्र
नष्ट॰ र्व्या तामेवाह॥ जीवेति॥ गुरु कुज शुक्र बुधाः प्रथमवत् दश का दिग्नि॰ क्रमात् गुणनीया॥ अय
मर्थः॥ गुरौ लग्नगते तमेव लग्नं स्वगुणाकारहतं दशभिर्गुणयेत्॥ कुजे ऽष्टाभिः शुक्रे सप्तभिः बुधेप
च[illegible] निरिति॥ शीघ्राग्रहाः रविचंद्रशनयः सौम्यवत् बुधवत् पंचभिर्गुणनीया इत्यर्थः॥ बक्र
स्तु लग्नगे कुम्भवेषा गुणकैर्लव लग्नं गुणयेत्॥ एवं गुणितांकान् स्थापयेत्॥ ९॥ तस्मान्नक्षत्रा
नयनं बध्यंत तिलकेनाह॥ सप्ताहतमिति॥ संस्थापितांकः सप्तगुणः कार्यः तत्र न व देयाः शो
ध्या वा॥ पश्चान्नवनशोध्या न देया इत्यर्थः॥ अयमर्थः॥ चरे लग्नगे नवदेयाः स्थिरे नव शोध्याः
द्विस्वभावे न देया न शोध्याः॥ केचिन्मते लग्नप्रथमद्रेष्काणे नव देयाः॥ द्वितीये शोध्याः
तृतीये नो नयमिति॥ एवं कृत्वा त्रियनेन सप्तविंशत्या तत्र ऽवासेस्पष्टाः शेषांके ऽश्वन्यादि
जन्म नक्षत्रं ज्ञेयं॥ केषांचिन्मते सप्तविंशतिम् कानंतरं नवकदानशोधने कार्ये इति॥ एवमिति
प्रश्नलग्नात्सप्तादिराशिस्थो लग्नवशेन दृष्टस्तेषां फलत्रादीनां जन्मवदेत्॥ अयमर्थः॥ यदा १८॥
भार्यायानष्टजातकं पृच्छति तदा तात्कालिके लग्ने राशिसप्तकं देयं॥ मातुःप्रश्ने राशिद्वयं देयं॥
पुत्रप्रश्ने चतुष्टयं॥ रिपुनष्टजातकप्रश्ने राशिपंचकं लग्ने देयं॥ एवं कृते तदेवोदयं

दयराशिं परिकल्प्य तदुक्तगुणकारेण संगुण्य तत्स्थग्रहगुणकारेणापि संगुण्य नवक
दानविशोधने कृत्वा सप्तविंशत्या विभज्य शेषांकतुल्यं भार्यादीनां जन्मनक्षत्रं वाच्यं॥
इदमुपलक्षणं॥ भ्रातृ पितृ सुतानां तात्कालिकाल्लग्नात् मातुरपि जन्मभं वाच्यं॥ एवं नवयुलस्पि
तुरपि॥ एवमन्यस्यापि॥ १०॥ वर्षाद्यानयने वध्यंतेनाह॥ ॥वर्षेति॥ एवं वर्षादयः
प्रश्नदशादिर्गुणिताः॥ नवकदान विशोधनाभ्यां च युताः स्वविकल्पेन ऽग्रकाः संतो व
र्षादिभ्यः स्यादयो जन्मनि स्युः॥ अयमर्थः॥ प्रश्नलग्नं लिखापिंडीकृत्य राशिगुणकारहतं ग्रह
स्वे ग्रहगुणकारहते पस्स्थापित मस्तिनत्स्थानचतुष्टये संस्थाप्येकत्र दश त्रि द्वितीये
ऽष्टभिस्तृतीये सप्तभिश्चतुर्थे पंचभिर्गुणयेत्॥ ततस्तस्मिन् राशिचतुष्टयेपि नवकदा
न विशोधने प्राग्वत्कृत्वा स्वविकल्पेन गिमपकृत्य वर्षादियो ज्ञेयाः इति॥ ११॥ तदेव वर्षा
द्यानयनमनुष्टुप्छंदेनाह॥ ॥विज्ञेया इति॥ दशकेष्विति बहुत्वे बहुयोगित्वात्॥ वर्षा
र्तुमासाः दशकेषु ज्ञेयाः पक्षतिथयो ऽष्टकेषु ज्ञेयाः॥ अयमर्थः॥ दशगुणितांशं स्व
विकल्पेन परमायुषा विंशत्यधिकवर्षशतेन विभज्यों ऽको विशिष्यते तावंति जन्मवर्षा
णि प्रज्ञेयानि॥ १॥ तमेव राशिं स्वविकल्पकृतुः षट्संख्यया विभज्या वशिष्टः ऋतुः॥ ऋतुमपि

द्विधा विभज्यैकाद्विवृद्धो वक्रतोः प्रथमो मासः ॥ अन्यश्चेद्द्वितीयः॥ एवं कृत्वाद्वादशगुणो राशिरपा
२४ स्तमीयः॥ यो यावन्तं ततो राशिः स्फुटा स्तं विभज्यैकावशेषे शुक्लपक्षः ॥ अन्यथा कृष्णपक्षः ॥ त
नष्ट· मेषराशिं तिथिसंख्यया पंचदशा भिर्विभज्य शेषांकसमा तिथिर्ज्ञेया॥ एवमष्टगुणो राशि
रपास्यः॥ १२ ॥ दिवेति॥ अष्टहते राशौ दिनरात्रिप्रश्नं वेत्तुं नक्षत्रं च ज्ञेयं॥ तद्यथा॥ अष्टहतरा
शिद्वाभ्यां विभज्यैकावशेषे दिने जन्म ॥ अन्यथा रात्रौ ॥ तमेव समस्तं विंशत्या हत्वा ऽवशिष्टां
कसमम् अश्विन्यादि नक्षत्रं॥ बाहुल्योपयोगान्नक्षत्रस्पष्टनरान्वयुने॥ १३॥ विलेमेति॥ वे
लालग्नहोराशान् पंचके विंधात्॥ तद्यथा॥ यद्दिने जन्म ज्ञातं रात्रौ वा। तद्दिनरात्रिप्रमाणं
कृत्वा तेन पंचहतराशिं विभज्यावशिष्टांकसमे दिनस्य रात्रेर्वा घटिकादि काले गते जन्म
ज्ञेयं॥ एवं काले ज्ञाते राश्यादि लग्नं कार्यं॥ तस्य च होरा द्रेष्काण नवांश द्वादशत्रिंशांशाः
कार्याः॥ तात्कालिका ग्रहाः कार्याः॥ उक्तविधिना दशाष्टकवर्गादि निर्दिशेत्॥ एवं नष्टजा
तकं साधयेत्॥ १४॥ अथ प्रकारान्तरेण नक्षत्रानयनमार्ययाह॥ संस्कारेति॥ संस्कारो
नाम करणारव्यस्तत्कर्तुर्नरस्य नामतस्य यामात्रा हृस्वस्य एकमात्रा॥ दीर्घो द्विमात्रः॥ ।७८।।
हलर्धमात्रे॥ एवं गणनया या नाम्नो मात्रास्ता द्विगुणाः कृत्वा प्रश्नकालीन द्वादशांगुलशंकु
छायांगुलसंख्यया युक्ताः कार्याः॥ त्रिनवकेन यद्वाविंशत्या तामात्रा विभज्यावशिष्टांक

२४ समं धनिष्ठादि नक्षत्रं ज्ञेयं॥ १५॥ प्रकारान्तरेण नक्षत्रमार्ययाह॥ ॥ द्विन्नीति॥ द्वौ नय
नष्ट· चतुर्दश। दश॥ तिथयः॥ पंचदश॥ गुणाः त्रिगुणाः॥ अष्टौ कुविंशतिः॥ नव॥ अष्टौ॥ एते इन्द्राद्याः सर्वा
द्यादिशामंका ज्ञेयाः॥ अयमर्थः॥ पूर्वाभिमुखे प्रष्टके पृच्छति सति द्वावंकौ स्थाप्यौ॥ एवमा
ग्नेयादिमुखे पृच्छति आदयोंका यावत्॥ एवं दिगभिमुखप्रष्टुरंको नाकमादाय पंददशगुणि
तः कार्यः। तद्दिग्मुखान्वितप्रश्नत आदेशोतद्दिग्मुखाः प्रष्टा यो दिगभिमुखस्तन्मुखा यावंतोन
रास्तत्संख्यया युक्तश्च कार्यः॥ एवं कृतेयोंकस्तस्य सप्तविंशत्या हृत्वा ऽवशिष्टांकसमं धनि
ष्ठादितो जन्मनक्षत्रं वाच्यं॥ १६॥ नष्टजातकोपसंहारमाह॥ ॥ इति नष्टेति॥ इति शब्दउप
संहारे एवं नष्टजातकमिदं नानाविधमुक्तं। समीचीनं। शिष्यैः यत्नेन परीक्ष्य यथा भवति
सत्यं स्पष्टं वदति तथा॥ तो स्मान्मडक्तात्याह्यं॥ १७॥ इति महीधरकृते जातकविवरणेन
ष्टजातकाध्यायः षड्विंशः॥ २६॥ ॥ श्री॥ ॥ श्री॥ ॥ अथ द्रेष्काणाध्यायः॥ तत्र मे
षाद्यद्रेष्काणस्वरूपं वैतालीयेनाह॥ ॥ कट्यामिति॥ अधनेष्वेतवस्त्रेवेष्टितं येनस्य॥
श्यामवर्णः॥ आचिमुख्येन रक्षां कर्तुं समर्थ इव भीषणः॥ लोहितनेत्रो नरः उद्धृतेउ
द्यतं धरति। एष नरद्रेष्काणः सायुधः क्रूरजकृष्ण॥ १॥ मेषद्वितीयरूपमिंरवजयाह॥ रक्तां
बरेति॥ लोहितवस्त्रा॥ अलंकारे भोजने च मनो यस्याः॥ आम्रठोदरी॥ अश्ववदनापि पासिता

२५ एकचरणो नोपलक्षिता। इदि कुमे बद्वितीयरेष्काणो यव नैरुक्तं। एषचतुष्पद देष्काणः स्त्रीरे
६ ष्काणोऽर्क श्रेकष्य॥३॥ मेषत्रतीय स्वरूप माह॥ कूरइति॥ विक्रम स्वभावः। कलाचतुरः पिंगलः
कर्माभिलाषुकः। स्वव लिङ्गनियम॥ आभिमुख्येनोद्यतो दंडः पाणौ यस्य सः। रक्तवस्त्रवै
धरः॥ क्रोधनः॥ इदरगोमेषत्रतीयः। एषसायुधो नररूपरेष्काणो जीवस्य कथ्य॥३॥ वृषप्रथमे
दोध्य केनाह॥ कुंचितेति॥ कुटिलाः। कल्पिताः। केशाः यस्याः सा। कुंभोदरी। दग्धवस्त्रा। पिपा
सुः। भोजने चित्तं यस्याः सा। भूषणेछुः एषस्त्री रेष्काणः सास्त्रिकः शुक्रस्य कथ्य॥ ४॥ वृषद्वि
तीयं स्वागतयाह॥ क्षेत्रेति॥ केदारेषु धान्यादिषु वेश्मसु गोषु धेनुषु नृत्य गीत वादित्रादिषु कु
शाल॥ हलशकटयोः प्रवीणः वृषस्कंधः। बुभुक्षुः। छागमुखः। मलिनांबरः एषचतुष्पदरेष्का
णो बुधस्य कथ्य॥ ५॥ वृषत्रतीयं मोक्तिमालयाह॥ द्विपेति॥ महाशरीरः। नतु इस्ति वपुः। श्वेत
दंतः। वृहत्पादः। नत्वाष्टापदचरणः। कपिलांगः। अविनां मृगाणां लोमार्थे व्यग्रे चित्तं यस्य
सः। एष चतुष्पदरेष्काणः शनिस्य कथ्य॥ ६॥ मिथुनाद्यं वंशस्थेनाह॥ सूच्येति॥ सूच्याश्रि ॥८०॥
तकर्मयीवने क्रियाते मिष्ठ तीर्मिति स्त्रीरूपा भूषणं कार्ये कृतधय त्ना॥ अपनपत्या। ऊर्ध्व
बाहुः रजस्वला। एषस्त्रीरेष्काणो बुधस्य कः॥ ७॥ मिथुनद्वितीय मुपजात्याह॥ ॥उद्याने ति॥
उपवनस्थः। वर्मन्वितः। चापहस्तः। रणप्रियः। शस्त्रधर्ता। गुरुडवक्रः। क्रीडायां पुत्रे पुत्रार्थ
लोभार्थे च चित्तं यस्य एषकुद्यालाउधः स्वगोनरः शुक्रस्य कः॥ ८॥ मिथुनत्रतीयं स्वागतयाह॥ ॥
भूषितइति॥ अलंकृतः। समुखलु अन्नतमणिः। इषुधि धारी वर्मन्वितः चापधरः। नृत्ये वादित्रे
चित्रादि कलासु च प्रवीणः। कवित्वकृत् एषनररेष्काणः सायुधः शनिस्य कः॥ ९॥ कर्कायं स्वा
गतयाह॥ पत्रेति॥ पत्राणि मूलानि फलानि च धरिति॥ गजशरीरः। वनेचंदन वृक्षागतः। स
रभ तुल्यपादः। सूकरमुखः। अश्वगावीवां एषचतुष्पदरेष्काणो नरस्वंद्रस्य कथ्य॥ १०॥ कर्कद्वि
तीयमिंद्रवज्रयाह॥ ॥पद्मेति॥ नारी कंभशिरा यि कमलैः सज्जिता। सर्पयुता। कठोराणां गौ
यौवनयुक्तेत्यर्थः॥ वने आक्रोशयति॥ पुलाशाखां दृढां धास्वा स्पृक्का। एषस्त्री व्यालरेष्काणो भौ
मस्य कः॥ ११॥ कर्कत्रितीवेतालीयेनाह॥ नार्येति। जायायाः अलंकारनिमित्तं समुद्रेनाविगतः॥
सुजगावृत्तगोयाति॥ कनकाभरणवान्॥ चिपटमुखः एषोनरो व्यालो गुरुस्य कः॥ १२॥ सिं
हाद्यं रथोद्धतयाह॥ शाल्मलइति॥ गृध्रपक्षी। श्वा गालः। सामेपि। मलिनवस्त्रो जननीजनक
विरहान रमशाल्मल तरूपरि क्रोशाति एषरेष्काणो नरचतुष्पद स्वरूपः रवेः सूर्यस्य कः॥ १३॥
सिंहद्वितीयं वंशस्थेनाह॥ हयाकृतिरिति॥ तुरगाकारः श्वेतपुष्पशिराः। नरः कृष्णमृगत्व
चं कंबलं च धारयति॥ केसरीवदुःसाध्यः। गृहीतधनुः॥ नम्रनासिकायः। एषनरश्चतुष्पदः
सायुधो गुरुस्य कः॥ १४॥ सिंहत्रतीयमुपजात्याह॥ कृषानमेति॥ ऋक्षमुखः। कपिस्वभावः॥
हस्ते

आयुधमाल्यादिफलं सौम्यं च धारयति॥ दीर्घश्मश्रु॥ ऊं॥ चिलके शेरूपालक्षितो नरो एष
२५ चतुष्पदः आयुधः कुजपक्षः॥१५॥ कन्यामुपजात्याह॥ कृष्णेति॥ कुसुमहरितकुं॥ कुंभे पज
हिता॥ मलिनवस्त्रवेष्टितस्वरूपा॥ शारीरा॥ वायोरव्ययोः संबंधि मिछति॥ ऊरु कुं ले॥ बि
६० ताकन्या एषस्त्री रेक्काणो बुधपक्षस्य॥१६॥ कन्याद्वितीयं वैतालीयेनाह॥ कुरुपइति॥ यया
स्त्रा॥ णीलिखं तेषां लेखनी कुष्ठवर्णः॥ पटवेष्टितमस्तकः॥ बद्धशिराइतिपाठे संयतमू
र्द्धा॥ धनस्य व्ययगणकः॥ विस्तीर्णधनुर्धरा॥ लीनयशाः॥ ईदृशो नरदृक्कलाः आयुधः शनि
पक्षः॥१७॥ कन्यातृतीयमुपजात्याह॥ गौरांगी॥ गौरवर्णा प्रक्षालिता न्यग्रा णि प्रांत भागा
यस्पे दृशो नदुकूलेनाछादिता॥ दुकूलहस्तेति पाठे उक्त॥ घटद्वयं युतपाणिः॥ देवालयं गंतुमु
द्यता॥ प्रसन्हिता॥ ईदृशी नारी॥ एषस्त्री रेक्काणः शुक्रपक्षः॥१८॥ तुलाद्यं वंशस्थेनाह॥ वी
थ्यंतरेति॥ मार्गमध्ये यद्दापणं तद्दृस्तत्रस्थितः॥ घटस्थिस्सहितः॥ उन्माने उर्ध्वमाने तुला
दौ माने तिर्यग्माने कुडवादौ च प्रवीणः॥ येन स्वर्णरत्नादि परिछिद्यते तत्प्रतिमानं हस्ते ॥८१॥
यस्य॥ भांडः क्रयरूपं तस्य मूल्यं ध्यायति॥ ईदृशो नरस्तुलाद्यो यवनोक्तः॥ एषनररेक्का
णो शुक्रपक्षः॥१९॥ तुलाद्वितीयं तोटकेनाह॥ कलशामिति॥ तुलामस्तद्ध्यस्थो नरो यतः

क्षुधार्त्तो नायं पुत्रांश्च मनस्याप्यातिस्मरति॥ ततो घटमादय निर्गंतुमिच्छति॥ एषध्रास्यः
एषनररेक्काणः स्वगःशनिपक्षः॥२०॥ तुलातृतीयं वंशस्थेनाह॥ विनीषयन्निति॥ मलिन
चित्तः सुवर्णे धुग्धिधारा स्वर्णकवचधारी धनुर्नृत्ये देवविशेषरूपधारी वानरेति पाठे कपि
रूपधरो वने मृगान्त्रासयन्नुत्तिष्ठन्नेत्यर्थः॥ एष वानराकारो नरश्चतुष्पदः आयुधो
बुधपक्षः॥२१॥ वृश्चिकाद्यमुपजात्याह॥ वस्त्रैरिति॥ वासोभिर्भूषणैश्च रहिता स्थानच्युता
भुजगनियमितचरणा सुंदरा स्त्री मद्या हेर्मिध्यालार मागछति॥ एषस्त्री रेक्काणो व्यालः
कुजपक्षस्य॥२२॥ वृश्चिकद्वितीयं दोधकेनाह॥ स्थानसुखेति॥ अपछादितांगी कूर्मघटु
स्यदेहा नारी पति निमित्तं स्थानं सुखानि च छति॥ स्त्री व्यालरेक्काणो गुरुपक्षस्य॥२३॥ वृ
श्चिकतृतीयं पुष्पिताग्रयाह॥ पृथुलेति॥ विस्तीर्णं चिपिटं कच्छपसदृशं मुखं यस्य सः॥
सारमेयहरिणजंबुककोडानां च पंकरो नरश्चंदनोत्पत्तिस्थानं रक्षति सिंहाकारश्च॥ एष
नरश्चतुष्पदरेक्काणश्चैरपक्षः॥२४॥ धनुःसर्वमिरवज्रयाह॥ मनुष्येति॥ नरो नरः तुरगस
दृशदेहः तपस्विनामाश्रमगतः॥ इदृशश्चापदीर्घमादाय यज्ञोपकरणानि स्त्रकुस्त्रक वा
दीनि तापसानां श्चपालयति॥ एषनरश्चतुष्पदरेक्काणः आयुधो गुरुपक्षः॥२५॥ धनुर्द्वि
तीयमुपजात्याह॥ मनोरमेति॥ चित्राह्लादकरी चंपककुसुमैः कनकेन च तुल्यच्छातिः नो॥ ति

शोभनानाभ्य शोभना भाजनमलंकृत्यालयंती स्त्री सिंहासने तिष्ठति एषः स्त्री द्रेष्काणः
कुजस्यक्तः ।२६। धनुस्तृतीयमाह ॥ कूर्चेति ॥ दीर्घश्मश्रुः सुवर्णचंपकपुष्पप्रभाकांतिः
२५ सिंहासनस्थो दंडहस्तो नरो हि कुलमृगचर्मणा धारयतो नरद्रेष्काणः आद्यु धो केश्मकश्च ॥
६- २७। मकराद्यं द्रेष्काणमाह ॥ रोमेति ॥ लोमशांगः मकरतुल्यदंष्ट्रः ॥ वराहतुल्यदेहः योत्रं
ज वृषमयो नंजालकं पाशिग्राहकं बंधनं निगडादि ॥ एतत्त्रयधरशीलः । विकृताननः एष
नरद्रेष्काणः अग्निडाडश्चत्रुष्पाद्गो नियक्तः ।२८। मकरद्वितीयमुपजात्याह ॥ कलास्विति
नृत्यादिकलाप्रवीणा । पद्मपत्रनेत्रा । श्यामवर्णा । नानावस्तून्यन्वेषयंती । आभरणैः शो
भिता । लोहाभरणयुक्तकर्णा नारी । एषः स्त्री द्रेष्काणः शुक्रस्यक्तः ।२९। मकरतृतीयं रथो
द्धतयाह ॥ ॥ किंनरेति ॥ देवयोनिसमांगः । कंबलयुत उत्तरीयधि धनुर्वर्मधारितो नरो मणि
युतं विलसंतं गंधघटं धारयति ॥ एष नरद्रेष्काणः बुधस्यक्तश्च ॥ ३० ॥ कुंभाद्यमाह ॥
स्नेहेति ॥ तैलमद्यपानीयाहारनानां प्राप्त्याव्यग्रं चित्तं यस्य सः कंबलयुतः दुकूलवासाः ॥ ॥८२॥
मृगचर्मयुक्तः गृध्रपक्षिसमास्यः ॥ एष नरद्रेष्काणः खगः शनिसक्तः ३१। कुंभद्विती
यं वैतालीयेनाह ॥ ॥ दग्धेति ॥ मलीमसोबरामस्तकारोपितभांडवह्निदग्धे शाल्मलि
तरुयुते शकटे स्थिता स्त्री अरण्ये लोहानि गृह्णाति । एष स्त्री द्रेष्काणः भार्गिको बुधस्यक्तः

॥३२॥ कुंभतृतीयं मिंद्रवज्रयाह ॥ कृष्णवर्णो लोमश कर्णौ मौलियुतो नरो भूः त्वक्चर्मप
त्राणि दलानि निर्यासो वृक्षरसो गुग्गुलादिः फलमाम्रादिः एतैः सुहलोहयुतानि पा
त्राणि धारयति ॥ तानि चैतस्ततश्चालयति स्थानांतरं नयतीत्यर्थः । एष नरद्रेष्काणः
शुक्रस्यक्तः ॥३३॥ मीनाद्यमाह ॥ स्रुग्भांडेति ॥ यज्ञोपकरणपात्रैर्मुक्ताफलैः रत्नैः शंखै
श्चैकीकृतैर्व्यग्रहस्तः । आभरणयुतो नरः । स्त्रीणां भूषणनिमित्तं नावारुह्य समुद्रं
गच्छति ॥ एष नरद्रेष्काणो गुरुस्यक्तः ॥३४॥ मीनद्वितीयं वंशस्थेनाह ॥ अत्युच्चेति ॥
वर्णेन कांत्या चंपककुसुमं मुष्णाति तिरस्करोतीति चंपकमुषी कनकवर्णा अत्युच्च
नास्त्री युवत्युच्चा ध्वजाः पताकाश्च यत्र ईदृशः पोतं नावमारोहति ॥ समुद्रस्यतटं प्रयाति ॥
एषः स्त्री द्रेष्काणः भौमस्यक्तः ॥३५॥ मीनतृतीयं द्रेष्काणरूपमिंद्रवज्रयाह ॥ श्वभ्रेति ॥ ॥
भुजगाद्वेष्टितदेहो नग्नतस्करवह्निव्याकुलचित्तो नरो वने गर्त्तसमीपे रोदिति ॥ एष व्या
लद्रेष्काणः कुजस्यक्तः ॥३६॥ द्रेष्काणस्वरूपस्य प्रयोजनं स्तुतेस्थले प्रोक्तेयात्रायां च
वक्ष्यति ॥ द्रेष्काणाकारवेषा गुणप्रद शफलं यो जयेत्‌ ॥ हिते तौ द्रेष्काणो यो यस्य रूपे कु
सुमफलयुते रत्नभांडान्विते च ॥ सौम्यैर्दृष्टे जयः स्यात्प्रहरणसहिते पापदृष्टे च

गः॥ स्वाग्नौ देशो थवेधः॥ अनुजग निगडे पाप युक्तेपि पाशै दिति॥ अथ चौर हानं
२५ च॥ अंशकादृशा यत्तेरव्यं देष्क्का णेस्तक रास्मना॥ रा॥ शित्थः काल दिग्देशा वयो
जातिश्च लग्नपादिति॥ ३५॥ इति श्रीमहीधरकृते जातक विवरणे देष्क्काणाध्याय
६ पंच विंशः॥ २५॥ ~~[illegible]~~ ॥ अथोपसंहाराध्यायः॥ ॥ तत्रादौ ग्रंथकर्त्ता पित्रादिनामा
नि वक्ष्यंत तिलकेनाह॥ ॥ आदित्येति॥ आदित्यदासनाम्नो विप्रस्य पुत्रस्तस्मादादि
त्यदासादेव प्राप्तज्ञानः कापित्थग्रामेयः अवितारविस्तदारा धनेन तस्मात्त्वा
हो वररूप पवस्मादो येन सः॥ आवंतिकः उज्जयनीवासी वराहमिहराचार्यः मुनिम
तानि ऋषिप्रणीत शास्त्राणि सम्यक् संप्रदायेन विचार्य शोभनां होरां जातकशास्त्रं
कृतवान्॥ अध्यायसंग्रहमुपजात्याह॥ राशीति॥ राशिप्रभेदाध्यायः प्रथमः॥१॥ ग्रह
योनिभेदो द्वितीयः॥२ वियोनिजन्म तृतीयः॥३॥ निषेकाध्यायश्चतुर्थः॥४ जन्माध्यायः ॥ ६३॥
पंचमः॥५ रिष्टाध्याये षष्ठः॥ ६॥ आयुर्दायाध्यायः सप्तमः॥ ७ दशाध्यायोऽष्टमः॥ ८॥ अष्ट
कवर्गो नवमः॥ ९॥ कर्माजीवाणां च ज्ञा शालिन्या नामाह॥ ॥ कर्माजीवइति॥ कर्माजी
वो दशमः॥ १०॥ राजयोग एकादशः॥ ११॥ नाभसयोगो द्वादशः॥ १२ चंद्रयोगस्त्रयोदशः॥ १३

८८

द्विग्रहयोगश्चतुर्दशः॥ १४ प्रव्रज्या पंचदशः॥ १५॥ राशिशीलं षोडशः॥ १६॥ दृष्टिफलं सप्तद
शः॥ १७ भावाध्यायोऽष्टादशः॥ १८॥ आश्रय एकोनविंशः॥ १९॥ प्रकीर्णो विंशः॥ २०॥ अनि
ष्टाध्याय इति॥ अनिष्टयोगैकविंशः॥ २१॥ स्त्रीजातको द्वाविंशः॥ २२॥ निर्याणं त्रयोविंशः
॥ २३॥ नष्टजन्म चतुर्विंशः॥ २४॥ देष्क्काणाध्यायः पंचविंशः॥ २५॥ एवं जन्मनि जातके पंच
विंशतिरध्यायः॥ इदानीं के योगयात्रायां निबद्धमध्याय संग्रह मर्द्धक पद्यत्रिषष्ठे
॥ ३॥ ते देवोपजातित्रयेणाह॥ प्रश्न इति॥ प्रश्नाध्यायः॥ १॥ तिथिबलाध्यायः॥ २॥ नक्षत्र ३
दिवसो वारफलं ४ मुहूर्ताध्यायः ५॥ चंद्रबलं ६ करणनिश्चयः ७॥ लग्नभेदो होरा देष्क्काणाध्या
यः॥ ८॥ ~~॥ विवाहेति॥~~ ग्रहशांति ९ कुडलिफलं ९॥ अपवादाध्यायः॥ १०॥ मिश्रकाध्या
यः॥ ११॥ अंगस्फुरणं॥ १२॥ ५॥ अतइति॥ गुह्यकार्चनं॥ १३॥ स्वप्नाध्यायः॥ १४॥ स्नान
विधिः॥ १५॥ ग्रहयज्ञः॥ १६॥ प्रस्थाने ७ शकुनाध्यायः॥ १८॥ ६॥ विवाहेति॥ विवाह
कालः॥ १९॥ ग्रहस्पष्टता २०॥ ग्रहकरणस्पष्टिकस्ती गाशिरवा २१॥ एवं ज्योतिर्विदां हि
ताय त्रिभिः स्कंधैर्गणित संहिता होरा रव्यैस्यं मयाज्योतिः शास्त्रं समग्रं होरा चिते
॥ ७॥ संक्षेपकरणं मालिन्याह॥ इकुविरचितमिति॥ एतत्सकलं शास्त्रमन्यैराचार्यैर्वि

स्त्रीर्हर्यंकृते॥तदेतत् मयास्वल्पंकृतंकाद्दर्शलब्धदेशार्थे॥तैनाचार्यैरुपदिष्टा यपित्र।
।तथा था।विषाणामल्पत्वेबुद्धिभ्रंग निर्मलिकरणोद्यमं॥इत्युक्थेनमयतद्धकृत
त्वं डितैः हसन्यतां॥८॥अतं प्रार्थनां वसंततिलकेनाह॥ग्रंथस्येति॥घचरमाणस्य
स्पग्रंथस्यस्पय हेत्रखालेखकदोषात् नष्टपत्ति॥यद्वामयात्रयत्सितंकृतं॥अल्पंवाकृतं
कर्त्व्यं नकृतंवा।तद्धऊम्भ्रूतानां पंडितानां मुखात्योधिगम्योज्ञानंतत्स्पविषाद्यावि
डयामात्सर्यंविहाय कार्यं॥मद्ग्रंथोननाशनीयः॥शोधनीयेध्वेत्यर्थः॥५॥शास्त्रा
वस्थाने अत्तांनतिमर्यपाद॥ ॥दिनेति॥रवेर्वरिष्ठाद्धिमुनीनामादित्यदास्यस्य
चचरणनत्वाकृतः अभ्याह्वैनेर्मल्यं यस्याईदृशीमतिर्यस्पतेनमयेदंशास्त्रमुप
।दिष्टं॥तस्मात्सर्वविधानां स्पः सर्वशास्त्रकृतेभ्योनतिरस्तु॥१०॥इतिश्रीमुरलीधर
कृतेजातकविवरणउपसंहाराध्यायः षड्विंशः॥श्रीगुरुर्जयति॥श्रीरस्तुयेजिय ॥८८॥
तु॥शिष्याणां॥श्रीवरदमूर्तिर्जयति धरित्र्यां॥ ॥श्री॥ ॥श्री॥ ॥श्री॥
ख्ननेत्रेषुमितांशु१५२०शाके वर्तितेमहीमासि धातुस्तिथौ सोमवारे॥मद्ददा

No. 86